ॐ श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्तमहागुरवे नमः ।

सङ्कल्पसूर्योदयः

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वरदार्यमहं वन्दे वरणीयगुणाकरम् ।
वनस्पतीनामपि यद्वाणी वाचस्पतित्वदा ॥
अत्यन्तगूढं तत्त्वानां त्रिकं तद्गुरुप्रसादतः ।
स्फुटं पश्यति मन्दोऽपि तं वेदान्तगुरुं भजे ॥
वेदान्तोत्तंसभूतस्य वेदान्ताचार्यसूक्तयः ।
क्रियासमभिहारेण कुर्युस्सुश्रेयसान्ततिम् ॥
क्वाहं मन्दमतिः क्वासौ वेदान्तार्यगिरां गतिः ।
साहसं महदेतन्मे क्षन्तुमर्हन्ति सत्तमाः ॥

इह खलु भगवानशेषशेषी श्रीमान्नारायणस्तापत्रयातुरसकलसंसारिचेतनोज्जीविषया श्रौपनिषदुद्बोधितांस्तत्त्वहितपुरुषार्थान् सम्यक्प्रदर्शयितुकामः शठ पुनाथयोगियामुनाचार्ययमीन्द्रप्रमुखानवतार्य तत्तत्प्रणीतानेकप्रबन्धमुखेन समीचीनमुत्पाद्य कांश्चिन् कृतार्थान्विधाय तत्तत्समयमतिलंघ्य जातानां दुर्दशामवेक्ष्य करुणापरवशः स्वयमेव कविकथककण्ठीरवदेशिकात्मनावततार ।

अत्रेयं कथानुसन्धेया । पुराकिल भगवान् श्रीवेङ्कटेशस्तोण्डमान्चक्रवर्तिनाम्ना भागवतेन सह सम्भाषमाणश्चिरमवर्तत । तदानीं भगवंस्तव प्रतियुगं साधुपरित्राणादिसिद्धयेऽवताराः सन्ति किल । अस्मिन्युगे कोऽवतार इति राज्ञा पृष्टस्समुवाच ।

यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं संसृतिशर्वरीं क्षिपति यत्सङ्कल्पसूर्योदयः ।

राजन्विश्वामित्रगोत्रे वेदान्तार्य इति भविष्यामि स च मदंशज इति ज्ञापनाय वेङ्कटनाथ इति मन्नामा भविष्यतीति । स च पुनराह भगवन्तं तर्हि मम सदानुसन्धेयं किञ्चित्तद्विषयं पद्यं त्वयोपदिश्यतामिति । तदैवमुक्तवते राज्ञे । **श्रीमान्वेङ्कटनाथार्य** इत्यादिकं पद्यमुपादिशत् भगवान् तदाप्रभृत्येतत्सात्त्विकैरनुसन्धीयत इति । स च विंशत्यब्दे विश्रुतनानाविधविद्यास्त्रिंशद्वारं श्रावितशारीरकभाष्यः श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यपदः कवितार्किकसिंहदेशिकस्तत्तदन्तेवासिमनोरथपूर्त्तये संस्कृतद्राविडात्मनानेकान् प्रबन्धान् विरचय्य तदनधिकारिजनानुजिघृक्षया **सङ्कल्पसूर्योदयाख्यं** तत्त्वोपायपुमर्थप्रकाशनप्रकटितपाटवं नाटकवरं निरममीत । तस्येदमाद्यमनवद्यं पद्यं-

यद्भक्तीत्यादि-नारायणो मे समस्तविपदुत्तारायास्त्विति सम्बन्धः-नारायण इति देवताविशेषनिश्चयः-**नारायणशब्देन** तत्पुरुषबहुव्रीहिसमासद्वयावगतवात्सल्यस्वामित्वसौशील्यसौलभ्याद्यनन्तकल्याणगुणगणः परमपुरुषो हि प्रतीयते । एतादृशगुणवत्तास्य कथमित्यत आह ।

श्रीमानिति-अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजेत्युक्तरीत्यास्य-श्रियः पतित्वादेवायमुत्कर्षः मदुपाश्रियो नित्ययोगः प्रतीयते-लक्ष्मीविशिष्टस्य हि विपन्निरासकपूर्वं रक्षकत्वं-

लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया ।
रक्षकस्सर्वसिद्धान्ते वेदान्तेषु च गीयते ॥ इत्युक्तेः ।

विपच्छब्दश्च प्रारीप्सितग्रन्थपरिसमाप्तिप्रतिबन्धकपरः-सांसारिकक्लेशपरो वा-तेषामुत्तरायनिस्तरणायास्तु । आशिषि लोट् । कीदृश इत्यत आह । यदित्यादिना । यद्विषयाभक्तिर्यद्भक्तिस्तस्याः प्रचय उत्कर्षस्तदात्मके तत्स्वरूपे दिनमुखे प्रत्यूषे-प्रत्यूषोऽहर्मुखं कल्यमित्यमरः-दृष्टिक्षमः दर्शनयोग्यः यस्य भगवतस्सङ्कल्पः मोक्षयिष्यामीत्येवं रूपः स एव सूर्यः तस्योदयः उत्पत्तिः क्षेत्रिणः जीवस्य-क्षेत्रशब्दश्शरीरवाची-**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते** इत्युक्तेः-कर्मकृतशरीरभाजो बद्धचेतनस्येत्यर्थः-

संसृतिस्संसरणं सैव शर्वरी तां क्षिप्रं क्षिपति नाशयति सूर्योदयस्य दिनमुखदृश्यत्वं शर्वरीनाशकत्वं च स्वभावः-तत्त्वैः चेतनाचेतनवस्तुभिः अस्त्रविभूषणैः अस्त्ररूपैर्विभूषणरूपैश्चाधिगतस्सेवितः-यथोक्तं भगवता पराशरेण ·

आत्मानमस्य जगतो निर्लेपमगुणामलम् ।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान्हरिः ॥
श्रीवत्ससंस्थानधरमनन्ते च समाश्रितं ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ॥

तत्वैरस्त्रविभूषणैरधिगतस्वाधीननित्योन्नतिः
श्रीमानस्तु समे समस्तविपदुत्ताराय नारायणः ॥१॥

भूतादिमिन्द्रियादिं च द्विधाहङ्कारमीश्वरः ।
बिभर्त्ति शंखरूपेण शार्ङ्गरूपेण च स्थितम् ॥
चलस्वरूपमत्यन्तजवेनान्तरितानिलं ।
चक्रस्वरूपं च मनो धत्ते विष्णुःकरे स्थितम् ॥
पञ्चरूपा तु या माला वैजयन्ती गदाभृतः ।
साभूतहेतुसंघातभूतमाला च वैद्विज ॥
यानीन्द्रियाण्यशेषाणि बुद्धिकर्मात्मकानिवै ।
शररूपाण्यशेषाणि तानि धत्ते जनार्दनः ॥
बिभर्त्ति यच्चासिरत्नमच्युतेऽत्यन्तनिर्मलम् ।
विद्यामयन्तु तज्ज्ञानमविद्याचर्मसंस्थितं ॥
इत्थं पुमान्प्रधानं च बुद्ध्यहंकारमेव च ।
भूतानि च हृषीकेशे मनस्सर्वेन्द्रियाणि च ॥
विद्याविद्ये च मैत्रेय सर्वमेतत्समाश्रितं ।

स्वाधीना स्वायत्ता–नित्याचोन्नतिरुच्छ्रायो माहात्म्यं यस्य स तथोक्तः–ननु स्वरूपाविर्भावस्य हि पुरुषार्थत्वं कथं अपुरुषार्थभूतस्य विपदुत्तारस्याशीर्विषयत्वमुच्यते। यद्यप्यस्यापुरुषार्थता तथापि तत्पूर्वभावित्वेन तदुत्पादकस्य तथात्वोपपत्तेः प्रकृतिसम्बन्धापाये स्वरूपाविर्भावस्स्वयमेव सिध्यति। तदुक्तं–

यथा न क्रियते ज्योत्स्नामलप्रक्षालनान्मणेः ।
दोषप्रहाणान्नज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतस्सम्भवः कुतः । इति ॥

किं च तापत्रयातुरस्य तन्निवृत्तिरेव प्रथममाशासनीया।

यथा दुस्सहे कारागृहे निगलितस्य राजपुत्रस्य राज्यलाभादपि निगलविगलनमेव पुरुषार्थो भवति। सेयं अष्टादशपदा नान्दी–यथोक्तं–

नान्दीपदैर्द्वादशभिरष्टाभिर्वाप्यलंकृता ।
अष्टादशपदावापि द्वाविंशतिपदापि च । इति ॥

लक्ष्ये यत्र श्रुतिमितगुणाकृष्टिलब्धावधानैः
प्रत्यग्बाणः प्रणवधनुषा सत्त्ववद्भिः प्रयुक्तः ।
मध्ये वक्षः स्फुरति महसा पत्रलः कौस्तुभात्मा
पद्माकान्तस्स भवतु दयादुग्धसिन्धुश्श्रियै वः ॥२॥

श्रीशब्दप्रयोगान्मङ्गलशंसनीत्वं । पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलमिति । परममङ्गलभूतस्य भगवतो नारायणस्याभिधानाच्च मङ्गल्यसूर्योदयस्संसृतिशर्वरीं क्षिपतीति काव्यार्थसूचनं । भक्तिप्रचयशब्देन तैलधारावदविच्छिन्नस्मृतिसन्तानरूपमहरहरभ्यासाधेयातिशयं प्रत्यक्षसमानाकारं निदिध्यासनं प्रतीयते–तत्त्वज्ञानजन्यज्ञानमात्रान्मोक्षं प्रत्युक्ताः ।

नारायणस्यैव विपदुत्तारकत्वकथनात् पाशुपतनिरासः . तत्त्वैरक्षविभूषणैरधिगत इत्यनेन भगवतो विग्रहमनभ्युपगच्छन्तः प्रतिक्षिप्ताः··श्रीमानित्यनेन श्रियोऽनुपायत्ववादिनो व्युदस्ताः ॥ १ ॥

एवं भगवतो भक्तिलभ्यत्वमुक्त्वा किञ्चनाधिकारप्रपदनलभ्यत्वं प्रतिपादयति ।

लक्ष्य इति–तदुक्तं ।

भक्त्या परमया वापि प्रपत्त्या वा महामते ।
प्राप्योऽहं नान्यथा प्राप्यो मम कैङ्कर्यलिप्सुभिः ॥

इति . अत्र भक्त्या प्रपत्त्यावेति विकल्पश्शक्ताशक्तविषयः ।

प्रणवो धनुश्शरो ह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥

इति–अत्र श्रुतमेवार्थमनेन श्लोकेनाह . श्रुतयस्तद्विद्यादिकास्ताभिर्मिता उपात्ताः ये गुणाः आनन्दादयः तेषामाकृष्टिरुपसंहारस्तस्या लब्धावधानैः प्राप्तैकाग्र्यैः–धानुष्कपक्षे । श्रुतिश्श्रोत्रं तन्मितं तत्पर्यन्तं यो गुणः ज्या तस्याकृष्टिराकर्षणं तस्मिन् लब्धावधानैः । सत्त्ववद्भिस्सत्त्वगुणनिष्ठैरन्यत्र बलवद्भिः । लक्ष्ये शरव्ये यत्र भगवति प्रणवधनुषाप्रयुक्तः निक्षिप्तः प्रत्यक् जीवः स एव बाणः मध्ये वक्षः वक्षसो मध्ये महसा कान्त्या पत्रलः पत्रवान् कौस्तुभात्मा कौस्तुभस्वरूपस्स्फुरति प्रकाशते-कौस्तुभस्य जीवाधिष्ठातृत्वात् । दयादुग्धसिन्धुः दुग्धशब्देन भोग्यत्वं सिन्धुशब्देनापरिच्छिन्नत्वं च सूच्यते . सः पद्माकान्तः श्रीवल्लभः वः युष्माकं श्रियै संपदे··अत्र श्रीशब्दो मुक्तैश्वर्यं लक्षयति • तदेव हि अत्र प्रधानप्रतिपाद्यं भवतु । इयमपि अष्टादशपदा । अत्रापि श्रीशब्दः प्रयुक्तः पूर्वरङ्गस्य द्वाविंशदङ्गस्याङ्गान्तराणां नटैरेव प्रयोज्यत्वकथाश्रयत्वाभावाच्च नान्दीरूपस्य तु काव्यार्थसूचकत्वान्नान्दीश्वरप्रियत्वाच्च नाट्यादौ कविभिरवश्यकर्तव्यत्वं । तदुक्तं •

यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तेषामवश्यं कर्तव्या नान्दीनान्दीश्वरप्रिया ॥

इति । अस्याश्चेदं लक्षणं ।

नान्द्यन्ते सूत्रधारः ।

आदिष्टोऽस्मि निखिलसुरासुरकोटीमणिनिकरनीराजितपादपीठस्य, शरणागतपरित्राणसप्ततन्तुदीक्षितस्य, सरसीरुहवासिनीसहचरितधर्मणः, संसरणदवदहनतापनिर्वापणबलाहकस्य, सर्वेश्वरस्य भगवतः श्रीरङ्गवृषगिरिसत्यव्रतयदुगिरिपुरुषोत्तमपाण्डुरंगप्रभृतिषु दिव्याभिव्यक्तिप्रदेशेषु यथाभिमतयात्रोत्सवसेवाहेवाकविहितगतागतचटुलचरणनलिनधूलीपटलपवित्रितक्ष्मातलैः यदृच्छया मदगृहान्तरीपमध्यमध्यासीनैः, शेषशेषाशनगरुडनिर्विशेषैः अशेषजनसंभावनीयैः असंभवदवद्यगन्धैः अभिजनविद्यासमुचितसदाचारशीलशालिभिः, अनादिमायामहावर्तविभ्रम्यमाणबाल्यकथकरंभावनमथनगंधसिंधुरैः, अधिजिगमिषितमुक्तिघण्टापथैः, अखण्डदिङ्मण्डलशिखण्डकैः, औपनिषदरहस्योपदेशदेशिकैः, अवगतसकलकलाकलापैः, अत्रभवद्भिरार्यमिश्रैः——यदुत

आशीर्नमस्क्रियारूप श्श्लोकः काव्यमुखोदितः ।
नान्दीति कथ्यते तस्यां पदानां नियमोऽपि वा ॥
मङ्गल्यशङ्खचक्राब्जकोककैरवशंसिनी । इति ॥ २ ॥

एवं नान्दीं प्रयुज्य प्रस्तुतार्थप्रकटनाय तदाकारमेव नटान्तरं प्रवेशयति-नान्द्यन्ते सूत्रधार-इति-नान्दीप्रयोगान्ते तस्मिन्यवनिकां प्रविष्टे तादृश एवान्योरङ्गं प्रविशतीत्यर्थः । तदुक्तं ।

पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरं काव्यार्थं स्थापयेन्नटः ॥

पूर्वरङ्गे तदङ्गभूतां नान्दीं किमाहेत्यत आह ।

आदिष्टोऽस्मीत्यादि—कोटीर शब्दः किरीटवाची किरणैर्नीराजितं पादपीठं यस्य सः तथोक्तः तस्य भगवत्पादपीठनिकटे प्रणमतां सुरासुराणां मकुटतटीप्रत्युप्तमाणिक्यघृणयस्तस्य नीराजनं कुर्वाणा इव परितः प्रसरन्ति-तत एवमुक्तं न वाच्यं सुरास्तावत् भगवन्तं प्रति प्रणतिं कुर्वन्तु कथमसुराः प्रणमन्तीति प्रह्लादादीनामिवासुरेष्वपि केषांचित्सम्भवात् । सप्ततन्तुर्यज्ञः । सरसीरुहवासिन्या सहचरितस्सहानुष्ठितः धर्मश्शरणागतपरित्राणरूपो यस्य सहचरितधर्मा तस्य निर्वापणं प्रशमनं दिव्याश्चते अभिव्यक्तदेशाश्चेति कर्मधारयः तेषु यात्रावीथीषु सञ्चरणं तन्वन्त उत्सवा- यथाभिमतमभिमतमनतिक्रम्य तेषां सेवा दर्शनप्रणामादिः तस्यां हेवाकोऽभिलाषः

ललितमनसां प्रीत्यै बिभ्रद्रसान्तरभूमिकां
अनवमगुणो यस्मिन्नाट्ये रसो नवमः स्थितः ।
जननपदवीजङ्घालार्तिच्छिदानुगुणीभव
न्नटपरिषदा तेनास्वादं सतामुपचिन्विति ॥ ३ ॥

परिगृहीता च मया भरतमतोपाध्यायस्य सन्मार्गवर्धनस्यान्तेवासिनस्सन्तोषपालकनामधेयस्य शैलूषचक्रवर्तिनः पुत्रेण, प्रतिभटकुशीलवकुञ्जरकण्ठीरवेण वैकुण्ठविनोदिना सप्रतिज्ञं विदुषामाज्ञा, दिव्यप्रयोगदिदृक्षादत्तक्षणा विचक्षणाश्च समुदितास्सामाजिकाः——तथाहि

मरुद्वृधा कावेरी तस्या अन्तरीपं द्वीपं । शेषाशनस्सेनेशः समुचितस्ववर्णाश्रमयोस्समुचितस्सदाचारस्सद्भिरनुष्ठित आचारश्शीलं स्वभावं । अनादिमाया प्रकृतिः–अजामेकां इति श्रुतेरनादित्वं तस्याः-मायां तु प्रकृतिं विद्यात् । इति श्रुतेर्मायाशब्दवाच्यत्वं च तस्याः आवर्ताः भ्रमयः गतागतानि बाह्याः अवैदिकाः (कुत्सितादृष्टिः दर्शनं येषां ते कुदृष्टयः) प्रामाण्यमभ्युपगच्छन्त इव तद्विरुद्धार्थवादिनः गन्धसिन्धुरैः गन्धहस्तिभिः। अधिजिगमिषतः अधिगन्तुमिष्टः मुक्तेः घण्टापथं घण्टावान्मार्गं महापथः । अखण्डदिङ्मण्डलशिखण्डकैः अशेषदिक्चक्रचूडाभूतैः । औपनिषदं यद्रहस्यं भगवत्स्वरूपरूपादि–एतद्वै महोपनिषदं देवानां गुह्यमित्युक्तं प्रपदनं वा तदुपदेशे देशिकैः स्वभावभिज्ञैः । कलापः समूहः अत्रभवद्भिः पूज्यैः आर्यमिश्रैः श्रेष्ठतमैरित्यर्थः । आदिष्टोऽस्मीति पूर्वेणान्वयः ।

कथमित्यपेक्षायामाह ।

यदुतेति–यत् किलेत्यर्थः । ललितं मृदु मनो येषां ते तथोक्ताः सोपब्रह्मणा वेदान्तविचाराक्षमचेतसामिति यावत् । प्रीत्यै रसान्तरस्य वीररसस्य भूमिकां वेषं बिभ्रत् । अनवमाः अक्षुद्राः गुणा यस्य स तथा–अस्यानवमगुणत्वमुपरिष्टादुच्यते असभ्यपरिपाटिकामित्यादिना नवमोरसश्शान्तः । शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः । बीभत्सरौद्रशान्ताख्या रसा इत्युक्तेः । यस्मिन्नाट्ये स्थितः स्थायी भवति । जननपदवी संसारमार्गः तत्र जंघालानां धावतामार्त्तिं तापत्रयजन्यां छिनत्तीति छित् नृगुणाः विवेकादयः तत्भावापन्ननटानां परिषत् समूहो यस्मिंस्तेन । नान्येन । सतामास्वादं रसानुभवजनितसन्तोषमुपचिनु वर्धयेति यत् । स एवादेश इत्यर्थः ॥ ३ ॥

स च मयांगीकृत इत्याह . **परिगृहीति** । भरतमतं । भरतमुनिप्रणीतं शास्त्रं तस्य उपाध्यायः अध्यापकः तस्य सन्मार्गवर्धन इति तस्य नाम । वैकुण्ठविनोदिना वैकुण्ठेन भगवता विनोदः कालयापनमस्यास्तीति तद्विनोदि तेन । सामाजिकसंपत्तिमाह । **दिव्यइति** । दिव्यः अद्भुतः प्रयोगः कथासन्दर्भः तस्यदिदृक्षा द्रष्टुमिच्छा तया दत्तक्षणाःदत्तोत्सवाः कृतोत्साहा इत्यर्थः । तेषां संसदं स्तौति–

अवधारितनाट्यदेशिमार्गै
रसमीचीनपराङ्मुखैरमीभिः ।
भरतागमदैवतैरिवैषा
परिषत्संप्रति भासते महद्भिः ॥ ४ ॥

तदहमशेषविद्यास्थानसंपदुपलंभिनीमभूतपूर्वबहुविधभूमिकापरिग्रहेष्वतिरस्कृतपारम्यामनवबोधजलधिकुक्षिंभरीमनन्यभक्त्युन्मीलिनी मादिमां देवतामभिगच्छामि ।

'अवधारितेति–अवधारितौ निश्चितौ नाट्ये वर्तमानौ देशिमार्गौ यैस्तैः आद्यं पदार्थमिनयोमार्गो देशी तथा परमिति तयोर्लक्षणं तु । असमीचीनेभ्यः शास्त्रेभ्यः पराङ्मुखैः । भरतागमस्यभरतशास्त्रस्य दैवतैरिव स्थितैः देशिकैरिवेति पाठान्तरं महद्भिः साध्वसाधुविचारनिपुणैः ॥ ४ ॥

स्वकृत्यमाह तदित्यादिना–। तत् यस्मात् आर्यमिश्राः देशम्याङ्गीकारः सामाजिकसम्मेलनं च जातं . तस्मादित्यर्थः । विद्या ज्ञानं तस्य स्थानानि शास्त्राणि ज्ञानजनकत्वेन शास्त्राणां तत्स्थानत्वोक्तिः अशेषाणि च तानि विद्यास्थानानि च तान्येव सम्पत्तस्या उपलम्भिनीं प्रापिकां . भूतपूर्वाः पूर्वमुत्पन्नास्ता न भवन्तीति अभूतपूर्वाः । बहुविधाश्च भूमिकाः तासां परिग्रहे स्वीकारेऽपि भूमिका शब्देनावतार उच्यन्ते । ततश्चावताराणां ऐच्छिकत्वात्तत्गतदोषास्पृष्टत्वं च भगवतस्सूच्यते । गीतं ह्येतत् भगवता ।

अजोऽपि सन्नव्ययात्माभूतानामीश्वरोऽपिसन् ।
प्रकृतिं स्वामधिष्टाय सम्भवाम्यात्ममायया ॥

इति । अत्र मायाशब्दस्सङ्कल्परूपज्ञानवाची । मायावयुनं ज्ञानमिति निघण्टुपाठात् । अतिरस्कृतं अतिरोहितं पारम्यं परत्वं यस्यास्सा तथा । जटायु घण्टाकर्णादीनां मोक्षप्रदानादिदर्शनात् अबोधशब्देन ज्ञानानुदयान्यथाज्ञान विपरीतज्ञानान्युच्यन्ते । तदन्यतद्विरुद्धतदभावेषु नञोवर्तमानत्वात् स एव' जलधि स्तेन कुक्षिम्भरीं उदरम्भरीं तन्नाशिनीमित्यर्थः ।

अनन्याः प्रयोजनान्तरविमुख्याः भक्तिरुन्मीलिनीं उत्पादयित्रीं

नाहं वेदैर्नतपसा न दानेन न चेज्यया ।
भक्त्यात्वनन्ययाशक्यअहमेवं विधोऽर्जुन ।
ज्ञातुं द्रष्टुञ्च तत्वेन प्रवेष्टुञ्च परन्तप ॥

इत्युक्तानन्यभक्तिस्सैवात्र विवक्षिता । आदिमां सकलजगत्कारण-

प्राची संध्या काचिदन्तर्निशायाः
प्रज्ञादृष्टेरंजनश्रीरपूर्वा ।
वक्त्री वेदान् भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः ॥ ५ ॥

अंजलिं बध्वा ।

देवो नश्शुभमातनोतु दशधा निर्वर्तयन् भूमिकां
रंगे धामनि लब्धनिर्भररसैरध्यक्षितो भावुकैः ।

भूतां देवतां । अत्र देवता शब्दस्साधारणोपि देवताविशेष नारायणे वर्त्तते । अन्यथा आदिमामित्येतच्चोपपद्यते. तस्यैव जगत्कारणत्वात् । नारायणाद्ब्रह्मा जायते-नारायणाद्रुद्रो जायते सर्वाणि भूतानि नारायणादेवसमुत्पद्यन्ते नारायणे प्रलीयन्ते । इत्यादि श्रुतेः ।

विष्णोस्सकाशादुद्भूतं जगदत्रैव च स्थितं ।
स्थितिसंयमकर्त्तासौ जगतोस्यजगच्चसः ॥

इति स्मृतेश्च । अभिगच्छामि नमस्करोमि इत्यर्थः ।

उक्तमेवानुतिष्ठति .

प्राचीति—। अन्तर्निशायाः मनसि वर्त्तमानाया अज्ञानरूपाया रात्र्याः मनसि वर्त्तमानमज्ञानं रात्रिरिव पदार्थविवेचनासामर्थ्यमापादयतीति तदुक्तिः । प्राची पूर्वा सन्ध्या प्रातस्सन्ध्येत्यर्थः काचिदित्यनेन ततो वैलक्षण्यं प्रतीयते । यद्वा निशाशब्दस्तत्सम्बन्धि तिमिरमुपलक्षयति । प्रज्ञैव दृष्टिः तस्याः अपूर्वा अभूतपूर्वा अञ्जनश्रीः अञ्जनसम्पत्वेदान्वक्त्री अध्यापयित्री । योवै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । इति श्रुतेः । वाजिनो वक्त्रमिव वक्त्रं यस्याः तथोक्ता वागीश इत्याख्यानाम तस्यास्सा यथोक्ता वासुदेवस्य मूर्त्तिः दिव्यविशेषः मे भातु स्फुरतु प्रार्थनायांलोट् . मनसीति विशेषः ॥ ५ ॥

एवं प्रार्थितवतो अस्य हृदये भगवान्हयग्रीवः स्वविग्रहं प्राचीकशत् । तदनुभवजनिते सन्तोषभक्तितमे तमञ्जलिकरणे समचूचुदतां ।

तत्कृतवानित्याहाञ्जलिं बध्वेति ।

अशेषविद्यास्थानसंप्रदायप्रवर्तकं हयग्रीवमूर्त्तिं प्रणम्य बहुविधभूमिकापरिग्रहेप्यतिरस्कृतपारम्यमित्युक्तवैभवं भगवन्तं प्रार्थयते ।

देव इति—। देवः क्रीडापरः अनेनावताराणां क्रीडाकार्यं व्यज्यते । भूमिकां प्रादुर्भावं दशधा निर्वर्त्तयन्नाचरन् दशधेत्युपलक्षणं सहस्रश इत्यर्थः । अजायमानो बहुधाविजायते । इति हि श्रूयते । बहूनि मे व्यतीतानि जन्मानि तव चार्जुन इति स्मर्यते च । लब्धनिर्भररसैः लब्धा निर्भराः पूर्णा रसा श्रृङ्गारादयो यैस्तैः ।

यद्भावेषु पृथग्विधेष्वनुगुणान् भावान् स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका ॥६॥

(मुहूर्तमिवास्थित्वा ध्यानमभिनीय सोल्लासं), सोहमिदानीं स्वाधीनसर्वतत्त्वसत्ताकस्य स्वतन्त्रदैवतस्य कृपया कटाक्षितः

श्रुतिकिरीटविहारजुषा धिया
सुरभितामिह नाटकपद्धतिम् ।
मुहुरवेक्ष्य विवेकमुपघ्नयन्
मतमपश्चिमयामि विपश्चिताम् ॥ ७ ॥

भावुकैः मङ्गद्भिः । रङ्गं नृत्तशाला तस्मिन्नेव धामनि स्थाने श्रीरङ्गधामनि च अध्युषितः दृष्ठः शुभमातनोतु विस्तारयतु । पृथग्विधेषु यत्भावेषु यस्यावतारेषु अनुगुणान् तत्तदनुरूपान् भावानाविर्भावान् स्वयमेव बिभर्ती ।

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वैकरोत्येषात्मनस्तनुं ॥

इत्युक्तेः । यद्धर्मैर्यस्यधर्मैः धर्मिणी व्यापारवती नानाकृतिः । राघवत्वेभवत्सीता रुक्मिणी कृष्णजन्मनी त्यादि उक्तरीत्या । नानाशरीरा नायिका श्रीः इह विहरते । अनेन स्वस्यापि नायिकानुकूल्यमेवास्त्विति प्रार्थना सूच्यते ॥ ६ ॥

एवं प्रार्थनानन्तरं तस्य व्यापारान् कविराह ।

मुहूर्तमिवेत्यादि । इव शब्दो वाक्यालङ्कारे उल्लासस्सन्तोषः । सोऽहमित्यादि सूत्रधारवाक्यं । स्वाधीना स्वसङ्कल्पायत्ता सर्ववस्तूनां सत्तायस्य तस्य स्वतन्त्रः स्वाधीनः स्वाधीनत्वं भगवत एवासाधारणं । यथोक्तं ।

रुद्रं समाश्रिता देवा रुद्रोब्रह्माणमाश्रितः ।
ब्रह्मा मामाश्रितो देविनाहं कञ्चिदुपाश्रितः ॥
ममाश्रयो न कश्चित्तुसर्वेषामाश्रयोह्यहम् ॥

इति ।

तत्कटाक्षेण किं फलमित्यताह ।

श्रुतीति-। श्रुतिकिरीटेषु वेदान्तेषु विहारजुषा परिचयवत्या । विहारशब्दस्तदभिप्रायवेदनमनायासलब्धमिति सूचयति । धिया सुरभितां परिमलितां नाटकपद्धतिं नाट्यमार्गं इह इदानीं मुहुरवेक्ष्य पर्यालोच्य विवेकमुपघ्नयनवलम्बनं कुर्वन् विपश्चितां विदुषां मतं अपश्चिमयामि अपश्चिमं प्रथमं श्रेष्ठं करोमि । विपश्चितः पश्चितं । इत्यादिषु तथा दर्शनात् । वेदान्तार्थप्रकाशकेनतन्नाटकपरिचयेन एतदुक्तपुरुषार्थश्रेयानिति सर्वेषां निश्चयो भवतीति भावः ॥ ७ ॥

नेपथ्याभिमुखमवलोक्य, आद्रियतान्तावदियमार्यया रंगभूमिः ।

प्रविश्य नटी ।

* अय्य एसम्हि, आणाविज्जउ पिअप्पेसणो, एसोपरिअणो ।

सूत्रधारः—अपि नाम सत्वोपपन्नसामाजिकसमादिष्टनाटकसाधन समुचितभूमिका परिग्रहे सन्नह्यन्ति कुशलाः कुशीलवाः ।

नटी† करचलणादिट्ठिकप्पाखु एदे अय्यस्स किंणतुह चिंतिए तूरंति एदं उण परिपुच्छंमि किंणामअं कीरिसंरूपअं अहिणेदुं आरद्धन्ति ।

सूत्रधारः—आर्ये किन्नजानासि सङ्कल्पसूर्योदयाख्यं नायकीकृतविवेकं नवीनं नाटकं ।

---

* आर्य एषास्मि आज्ञाप्यतां प्रियप्रेषण एषपरिजनः ।

† करचरणदृष्टिकल्पाः खल्वेते आर्यस्य किन्न तव चिन्तिते त्वरन्ते इदं पुनः परिपृच्छामि किन्नामकं कीदृशं रूपकमभिनेतुमारब्धमिति ।

इदानीं । सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखं । इत्यामुखलक्षणात् ॥ प्रस्तावनार्थं नटीमाहूयति । आद्रियतामिति—। इयं रङ्गभूमिरार्यया त्वया आद्रियतां आदरविषयः क्रियतां त्वयात्रागन्तव्यमित्यर्थः । नटी सूत्रभृतोरन्योन्यमार्येति सम्बोधनं कार्यं । तदुक्तं । विप्रामात्यावज्ञाश्चार्य-नटीसूत्रभृतौ मिथः । इति ।

प्रविश्य नटी आहेतिशेषः । किमाहेत्यत आह । आर्य एषास्मि आज्ञाप्यतां प्रयप्रेषण एष परिजनः ।

सत्वोपपन्नाः सत्वगुणोपपन्नाः तेच ते सामाजिकाश्च तैस्समादिष्टस्य साधनं कल्पनं तस्मिन्नुचिताः भूमिका स्सन्नह्यन्ति कुशीलवाः शैलूषाः । अपि नामेति प्रश्ने ।

करचरणदृष्टिकल्पाः खल्वेते आर्यस्य किन्नयुष्मच्चिन्तिते त्वरन्ति , एतत्पुनः परिपृच्छामि किन्नाम कीदृशं रूपकमभिनेतुमारब्धमिति ।

न जानासि किमिति प्रसिद्धिद्योतनं । प्रयोज्यस्य रूपकस्यातिशयमाह ।

भावं विदन्ति परमत्र परावरज्ञाः
प्रज्ञाधनाः प्रगुणनूतनसंविधानम् ।
यस्मिन्गुणास्तनुभृतस्सदसत्प्रकाराः
पात्री भवन्त्यनुगुणैरधिदैवतैः स्वैः ॥ ८ ॥

अपिच-

विवेकप्रागल्भ्यस्फुरितरणवीरव्यतिकरः
परब्रह्मोदन्तप्रकटितदयावीरविभवः ।
प्रबुद्धक्षेत्रज्ञस्थितिघटितशान्ताकृतिरभूत्
प्रयोगश्चित्रोऽयं भवरसभुजामप्यभिमतः ॥ ९ ॥

भावमिति–। अत्र नाट्ये परावरज्ञाः परानवरांश्च जानन्तः प्रज्ञा प्रकृष्टं ज्ञानं धनं येषां ते तथोक्ताः। प्रगुणं प्रकृष्टगुणं नूतनं संविधानं कल्पनं यस्मिन् तं परं उत्कृष्टं भावं स्थायिभावं शमं विदन्ति। यस्मिन्नाट्ये सदसत्प्रकाराः स्वभावाः येषां ते तथा तनुभृतः जीवस्य गुणाः विवेकमहामोहादयः अनुगुणैः अनुरूपैः स्वैः अधिदैवतैः अधिष्ठातृभिः पात्रीभवन्ति पात्राणि भवन्ति। केवलगुणानां तत्सम्भवसामर्थ्याभावात् स्वाभिमानदेवताद्वारा तथात्वं ॥ ८ ॥

एवमस्य नाट्यस्य मुमुक्षुभिरुपादेयत्वमुक्त्वा संसारिभिरप्यादरणीयत्वमाह।

विवेकेति–। विवेकस्य प्रागल्भ्येन प्रौढ्या तद्वर्णनेनेत्यर्थः स्फुरितः प्रकाशितः रणवीरस्य युद्धवीरस्य व्यतिकरस्सम्बन्धो यस्मिन् स तथोक्तः। युद्धवीरदयावीरदानवीरभेदेन वीरस्त्रिविधः। तदुक्तं-वीरो युद्धदयादानभेदेन त्रिविधो भवेत्। इति तेषु च। विषमस्त्रास्त्रपातेषु समरादप्यधावनं। भीताभयप्रदानञ्च युद्धवीरस्य लक्षणं। इति रणवीरस्य लक्षणमुक्तं। परब्रह्मोदन्तेन परमात्मवृत्तान्तकथनेन प्रकटितः प्रपञ्चितः दयावीरस्य विभवो यस्मिन् स तथा। यः परव्यसने दुःखी दयावीरस्स उच्यते। इति तल्लक्षणं। इदं च भगवत एवासाधारणं परदुःखदुःखित्वं। (भगवतः परदुःखदुःखित्वं नाम परदुःखापचिकीर्षिता इति यावत्)

व्यसनेषु मनुष्याणां भृशं भवति दुःखितः।
सञ्जातबाष्पः परवीरहन्ता रामो मुहूर्तं विमनाबभूव।
गोविन्देति यदाक्रन्दत् कृष्णा मां दूरवासिनम्।
ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पति ॥

इत्यादिषु यथा दर्शनात्। प्रबुद्धस्य ज्ञानिनः मुमुक्षोरिति यावत्–क्षेत्रज्ञस्य जीवस्य स्थित्या मुकुलयति विचिकित्सामित्यादिभिरुपरिष्टाद्वक्ष्यमाणया घटिता सम्बद्धा शान्तस्य शान्तिरसस्याकृतिराकारो यस्मिन्स तथा। अत एव चित्रः अयं प्रयोगः भवरसभुजां सांसारिकसुखानुभवितॄणामप्यभिमतो अभूत् ॥ ९ ॥

अमुष्यतावदतिशयोक्तावबधिमपि न संभावयामि । कतिकति न सन्त्यकूपारेशंखाः किन्ते परिष्कृतपुरुषोत्तमपाणिपद्मः पांचजन्यः । किं च

ये लोकानिह वंचयंत्यविरलोदंचन्महःकंचुकाः
ते तिष्ठन्तु महद्गृहेषु मणयःकिन्तैरिदं चिन्त्यतां ।
श्रीवत्सप्रतिवेशदीपरुचिना सार्धं किमाभाष्यते
पद्मोल्लासनदर्पणेन मणिना प्रत्नेषु रत्नेष्वपि ॥१०॥

इतश्चायमतीव बहु मन्तव्यः ।

अपदिश्य किमप्यशेषगुप्त्यै
निगमान्तेषु निरूढगौरवेण ।
प्रविभक्तहिताहितः प्रयोगः
कविना कारुणिकेन कल्पितोसौ ॥ ११ ॥

एतद्बहुभवस्यापरिच्छिन्नतामाह .

अमुष्येति–। अमुष्य नाटकस्यातिशयोक्तौ वैभवकथने क्रियमाणायां सत्यवधिं पर्य्यवसानं न सम्भावयामि । बहुधा विचिन्त्य न पश्यामीत्यर्थः। अपि शब्दः पूर्वोक्तातिशयादतिशयान्तरं समुच्चिनोति । ननु किमेतदेव मुहुः प्रशंससि सहृदयहृदयङ्गमानां रूपकान्तराणामपि बहूनां विद्यमानत्वादित्यत आह .

कतिकतीत्यादि–। कति कति न सन्तीत्यनेन तेषामसंख्यतात्वं द्योत्यते पुरुषोत्तमशब्दो नारायणपरः ।

यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ।
अतोस्मि लोकेवेदे च प्रथितः पुरुषोत्तमः ॥

इत्युक्तेः । परिष्कृतं अलंकृतं पुरुषोत्तमपाणिपद्मं येन स तथोक्तः किन्ते पाञ्चजन्य इत्यनेन पाञ्चजन्यातिशयस्तेषां नास्तीति व्यज्यते उक्तमेवार्थं भंग्यन्तरेणाह ।

यइति–। अविरलं निरन्तरं यथाभवति तथा उदञ्चत् उद्गच्छत् महः कान्तिरेव कञ्चुको येषां ते तथोक्ताः । येमणयः इह लोके लोकान् जनान् । लोकस्तु भुवने जनेत्युक्तत्वात् । वञ्चयन्ति इमे श्लाघ्या मणय इति मोहयन्ति । ते महद्गृहेषु धनिनां गृहेषु तिष्ठन्तु । ततः किमित्यत आह–किन्तैरिति । तैर्नकिञ्चिदपि प्रयोजनमित्यर्थः । इदं वक्ष्यमाणं चिन्त्यतां . श्रीवत्सस्य प्रतिवेशे प्रतिपक्षे यो दीपः स इव रुचिर्यस्य तेन । पद्मायाः श्रियः उल्लासनः सन्तोषहेतुः दर्पणः मुकुरः तथाभूतेन मणिना कौस्तुभेन सार्द्धं तत्सदृशतयेत्यर्थः । प्रत्नेषु पुरातनेष्वपि किञ्चिदाभाष्यते उच्यते किं । अन्यान्यपि रूपकाणि शतशस्सन्तु नाम । तेषु न किञ्चिदप्यनेन सदृशमितिभावः ॥ १० ॥

अस्य बहुमन्तव्यत्वे हेत्वन्तरमाह–इतश्चेति । तत्किमित्यपेक्षायामाह ।

अपदिश्येति–। निगमान्तेषु उपनिषत्सु निरूढं स्थिरं गौरवं गुरुत्वं यस्य

नटी—*अय्य, कस्सउण कइणो पओओ एसो जहु बहु माणेण अह्मे सुवि, पअडिअपक्खवाआ एसा परिसआ

सूत्रधारः—आर्ये किन्न श्रुतमिदन्ते । अस्ति खलु । सकललोकसंभावनीयस्य विश्वातिशायिनो विश्वामित्रगोत्रभूषणस्य विशुद्धविद्याविहारपुण्डरीकस्य पुण्डरीकाक्षसोमसुत्संभवस्यानन्तगुणशेवधेरनन्तसूरेरात्मसंभवः श्रीरंगराजदिव्याज्ञालब्धवेदान्ताचार्यपदः कवितार्किकसिंह इति प्रख्यातगुणसमाख्यः छात्रजननिबद्धजैत्रध्वजप्रसाधितदशदिशासौधः सर्वतन्त्रसङ्कटप्रशमनविशङ्कटमतिः श्रीमद्वेङ्कटनाथोनामकविः ।

---

* आर्य कस्य पुनः कवेःप्रयोग एषः यत्र बहुमानेन अस्मास्वपि प्रकटितपक्षपातेषा परिषत् ।

तेन—अनेन वेदान्ताचार्येणेति सूच्यते । कारुणिकेन दयालुना कविना प्रविभक्त प्रकर्षेण विवेचिते हिताहिते यस्मिन् स तथा । असौ प्रयोगः अशेषगुप्त्यै गोपनाय तदवबोधायेत्यर्थः । कल्पितः किमपि रूपकमपदिश्य व्याजीकृत्य कल्पितः । परमदयालुर्भगवान् कवितार्किकसिंहः सर्वजगदुज्जिजीविषया किञ्चिन्नाट्यं व्याजीकृत्य वेदान्तरहस्यानि प्राचीकशदिति भावः ॥ ११ ॥

कविनेति कविः प्रस्तुतः सकद्विति पृच्छति । आर्य कस्य पुनः कवेः प्रयोग एषः—यत्र बहुमानेनास्मास्वपि प्रकटितपक्षपाता एषा परिषत् ।

यत्र कवौ विशुद्धानां अनवद्यानां देवतान्तरस्पर्शगन्धरहितानां विद्यानां विहारार्थं हृदयपुण्डरीकं यस्य तस्य । पुण्डरीकाक्षसोमसुतः पुण्डरीकाक्षनाम्नः सोमयाजिनः सम्भवः उत्पत्तिर्यस्य तस्य । अनन्तानामसंख्यानां गुणानां शमदमादीनां शेवधेर्निधेः अनन्तसूरेरनन्ताख्यसूरेरात्मनस्सम्भवो यस्य स तथा । श्रीरङ्गराजदिव्याज्ञया लब्धं प्राप्तं वेदान्ताचार्यपदं वेदान्ताचार्यस्थानं यस्य स तथा । प्रसिद्धं ह्येतत् कदाचित् भगवान् श्रीरङ्गनायकस्तद्दिव्यनगरवासिनमेनमाहूय श्रीरामानुजमुनिविरचितं शारीरकमीमांसाभाष्यं त्वन्मुखाच्छ्रोतुकामोऽस्मीत्युक्त्वा स्वयं च दिव्यस्थानमास्थायादित आरभ्यान्तमतिनिपुणमुपन्यासं वदनारविन्दादाकर्ण्य विस्मितहृदयस्तमाभाष्य भगवान् वेदान्तानामाचार्य इति सकललोकसमक्षमाचचक्षे । इति गुणसमाख्या गुणकृत नामधेयं तस्य तथा । दिशा एव सौधानि दिक्शब्दस्यापन्तत्वंवष्टिवागुकरित्यादौ सिद्धं सर्वेषां तन्त्राणां यत्संकटं परस्परविरोधः तत्प्रशमने विशंकटा विशाला मतिर्यस्य स तथा ।

प्रख्यातायोक्तं तदसाधारणचिन्हमाह ।

गौडवैदर्भपाञ्चालमालाकारां सरस्वतीम् ।
यस्य नित्यं प्रशंसन्ति सन्तस्सौरभवेदिनः ॥ १२ ॥

अन्येन्द्रकं भुवनमन्यदनिन्द्रकं वा
कर्तुं क्षमे कविरभूदयमन्ववाये ।
जन्मद्वितीयमृषिभिः कथितं यतस्सा
देवी च विश्वजननी यदनन्यगोत्रा ॥ १३ ॥

अपि च–

वित्रासिनीविबुधवैरिवरूथिनीनां
पद्मासनेन परिचारविधौ प्रयुक्ता ।
उत्प्रेक्ष्यते बुधजनैरुपपत्तिभूम्ना
घण्टाहरेस्समजनिष्ट यदात्मनेति ॥ १४ ॥

गौडेति–॥ गौडवैदर्भपाञ्चालदेशेषु प्रयुज्यमानानां तत्तद्देशनाम्नां पदसन्दर्भविशेषाणां माला पंक्तिस्सैवाकारो यस्यास्तां यस्य सरस्वतीं सौरभवेदिनः तत्परिमलाभिज्ञाः । सौरभशब्दस्तदसाधारणगुणवाची । प्रशंसन्ति श्लाघन्ते । अत्र । काव्येष्वभूता रीतिस्तु विशिष्टापदपद्धतिः । ओजःप्रसादप्रमुखा विशेषास्तु गुणास्मृताः । सा वैदर्भी तथा गौडी पाञ्चालीति त्रिधोदिता । अस्पृष्टा दोषमात्राभिस्समग्रगुणगुम्फिता । विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते । समस्तात्युत्भटपदामोजः कान्तिगुणान्वितां । गौडीयान्तां समाचख्यूरीतिं रीतिविचक्षणाः । अश्लिष्टश्लथभावान्तु पुराणच्छायया-न्वितां । मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः । इत्येतदनुसन्धेयम् ॥ १२ ॥

अस्यान्वयवैभवमाह ।

अन्येन्द्रकमिति ॥ अन्य इन्द्रो यस्य तत् अन्येन्द्रकं । अस्मादन्यत् अनिन्द्रकं । न विद्यते इन्द्रो यस्मिंस्तदनिन्द्रकं वा भुवनं कर्तुं क्षमे समर्थे । अन्ववाये वंशे । वंशोऽन्ववायस्सन्तान–इति निघण्टुपाठात् अयं कविरभूत् । द्वितीयं शरीरोत्पत्त्यपेक्षया जन्म ब्राह्मणयोत्पत्तिः ऋषिभिः यतः यस्याः कारणात्कथितं यथोक्तं । सहि विद्यातस्तञ्जनयति । तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयत इति । विश्वजननी सर्वेषां मातृभूता देवी सावित्री च यदनन्यगोत्रा यस्मादनन्यगोत्रा न सगोत्रेत्यर्थः । सावित्री विश्वामित्रगोत्रेति प्रसिद्धेः । अन्येन्द्रकमनिन्द्रकं वा भुवनं कर्तुं क्षम इत्यन्ववायस्य तत्सामर्थ्यवचनं । तन्मूलभूतस्य विश्वामित्रस्य तत्सम्भवात् । तदुक्तं । अन्यमिन्द्रं करिष्यामि लोको वास्यादनिन्द्रकः इति ॥ १३ ॥

अथास्य नित्यसूर्यावतारतामाह ।

वित्रासिनीति–॥ विबुधवैरिणां वरूथिन्यस्सेनाः तासां वित्रासिनी भयङ्करी पद्मासनाख्यस्य श्रियः पतेः परिचारः परिचरणं तस्य विधौ विधाने प्रयुक्ता प्रकर्षेण युक्ता ।

स च

विंशत्यब्दे विश्रुतनानाविधविद्य
स्त्रिंशद्वारं श्रावित शारीरकभाष्यः ।
श्रेयः श्रीमान्वेङ्कटनाथः श्रुतिपथ्यं
नाथप्रीत्यै नाटकमर्थ्यं व्यधितैतत् ॥ १५ ॥

नटी—*अय्य कहं णाम एअस्स एअन्त णिअमन्त विआण सन्दिअ माण सस्स कक्कसअर तक्ककुलिस णिस्सुडिअ पासण्डद्दुमस ण्डाभारद अह्मारिसकेलिजोग्गिअं रूपअं कुणज्ज

सूत्रधारः (सान्तर्हासं) यदेतदुभयमार्या पर्यनुयुङ्क्ते अत्र ताव-दादौ किमेनमप्रवृत्तनिखिलकरणव्यापारमनुभवैकतानमानसमत्यन्तनिभृ-तावस्थं निबद्धारमवधारयसि· अथापि ब्रूमः ।

---

*आर्य कथन्नाम एतस्य एकान्तनिगमान्तवितानसन्दितमानसस्य कर्कशतरत र्ककुलिशनिस्तु टितपाषण्डद्रुमषण्डाभारती अस्मादृशकेलियोग्यं रूपकं कुर्यात् ।

हरेः घण्टा उपपनिभूम्ना उपप त्तमहिम्ना असुर वित्रासिनभगवदाराधननिरतत्वा द्विरूपर्यासः तस्य भूम्ना अतिशयेन यदात्मना यत्स्वरूपेण यच्छब्दो अयं कविवरः समज-निष्टमज्जातेति अनेनोत्प्रेक्ष्यते । प्रसिद्धमेतत् । कदाचिदनन्तभगवाननन्तसूरिः पत्न्या सह श्रीवेंकटेशं सेवितुं सिंहाचलमासाद्य भगवन्तं प्रणम्य तयासाकं क्वचिदशयिष्ट । तदा तु सा सुप्ता स्ववक्त्रे प्रविशन्तीं भगवतो घण्टामद्राक्षीत् । अथ चाचिरेण गर्भमादत्त सुषुवे च भुवि वेंकटनाथ नामानं सूनुमिति ॥ १४ ॥

एतादृशं वैभवं नानेन विरचितमिदं रूपकमित्याह ।

विंशत्यब्दे इति—। विंशत्यब्दे विंशतिसंख्याकेष्वब्देषु विश्रुताः नानावि-धाः विद्याः येन स तथोक्तः । त्रिंशत् वारान् श्रावितं शारीरकभाष्यं येन स तथा । श्रीमान् वेंकटनाथार्यः श्रेयः श्रेयोरूपं श्रुतिपथ्यं श्रवणहितं अर्थ्यं अर्थादनपेतं अर्थः पर-मपुरुषार्थलक्षणो मोक्षः । तत्प्रापकमित्यर्थः । एतन्नाटकं नाथस्य भगवतः प्रीत्यै व्यधित विरचितवान् । एतन्निर्माणस्य भगवत्प्रीतिरेव फलं । वक्ष्यति खल्वन्ते च । वक्ता श्रोतृ-वचनविषयः प्रियतां वसुदेव इति ॥ १५ ॥

एवमस्यैतादृशं वैभवमाकर्ण्य नटी शंकते । आर्य किन्नामैकान्तनिगमान्तविता नसन्दितमानसस्य कर्कशतरतर्ककुलिशनिस्तुटितपाषण्डद्रुमषण्डा भारती अस्मादृशके-लियोग्यं रूपकं कुर्यात् । एकान्तो निश्चयो येषां ते एकान्ताः भगवदेकपरा इत्यर्थः । सन्दितं निगलितं कुर्यात् किन्नाम—कथं कुर्यादित्यर्थः ।

सान्तर्हासमिति—। कथमिदमस्या बुद्धिमान्द्यमिति जातं । हासं अप्रकाश्ये-त्यर्थः । उभयमिति ललिततररूपकनिर्माणे वेदान्तविचारैकसक्तत्वं तत्परिचयं च

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा
परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति ॥ १६ ॥

अन्यदपि निध्यायतु भवती ।

गंभीरभीषणगतिर्गिरिखण्डनाद्यैः
चूडापदं पशुपतेरपि घूर्णयन्ती ।
स्वादुप्रसन्नसुभगानि वसुन्धरायां
स्रोतांसि दर्शयति किन्नसुरस्रवन्ती ॥ १७ ॥

नटी–(सानन्दं)* जुत्तं एव्व एदं वाहिदं अय्यस्स तहवि सन्तो णाम रसो णट्ठित्ति गन्धव्वागमदेसिएहिं समट्ठिज्जइ ता अट्ठ कहं तारिसस्स रसस्स णिवेसो ।

*युक्तमेवैतत् व्याहृतमार्यस्य तथापि शान्तो नाम रसो नास्तीतिगन्धर्वागमदेशिकैस्समर्थ्यते तस्मादत्र कथं तादृशस्य रसस्य निवेशः ।

विरोधित्वेनोभयं प'नुयुङ्क्ते शंकते । तत्र तयोर्मध्ये आदौ वेदान्तैकपरत्वे । अनुभवैकतानं अनुभवः भगवद्गुणानुभवः । एकमद्वितीयं तानं स्थानं यस्य सतथा । एवं विधं मानसं यस्य सतथा । अत्यन्तनिभृता निश्चला अवस्था यस्य स तथा । निबद्धारं नाटकनिर्मातारं अवधारयसि किं । अथापि ब्रूमः ।

मन्वित्यादि–॥ मन्वादीनामत्यन्तभगवत्परत्वात् तत्परिषदामपि तथा तं सिद्धं । तदर्हाभवत् स्वरूपरूपगुणविभूतिप्रतिपादनात्तदर्हत्वं । असौ अस्य कवेस्सूक्तिः सुधासिक्तासुधयेवार्द्रीकृता सती । निरतिशयभोग्यता सती । क्वचित् अस्मादृशेपि जने स्वयमुदयमन्विच्छति । तदनुभवे अस्मादृशभागमेव हेतुः । अत्रायं दृष्टान्तः । विन्ध्याचलवत्विकटा विशाला यस्य सन्ध्या नटस्य सन्ध्यासु नटनं कुर्वतो हरस्य जटा तस्यां परिभ्रान्ता परिवर्त्तमाना गंगा पंगोरुपरि निपतति यदि । के निरुन्ध्युः नकोपि निरुन्ध्यादित्यर्थः ॥ १६ ॥

निध्यायतु भावयतु । तत् सरसि कस्याप्यस्य वाणी ललितं रूपकमपि करोतीत्यत्र दृष्टान्तमाह ।

गंभीरेति–॥ गिरिः हिमालयः तस्य खण्डनं भेदः आदि शब्देन चालनं कथ्यते । तत्र गंभीरा भीषणा गतिश्च पशुपतेः रुद्रस्य चूडापदं शिरः घूर्णयन्ती भ्रामयन्ती । सुरस्रवन्ती सुरदीर्घिका वसुन्धरायां स्वादूनि मधुराणि प्रसन्नानि च सलिलानि येषु तानि । स्रोतांसि प्रवाहान् न दर्शयति किं दर्शयत्येवेत्यर्थः ॥ १७ ॥

एतद्वयमपि युज्यत इति भावः ।

गन्धर्वागमः भरतशास्त्रं तत्र देशिकैराचार्यैः तस्मात् तदनभिकारात् ।

सूत्रधारः-(सावज्ञावहित्थं,) आर्ये न खलु संभावयामि तानहं भरतमतपारदृश्वनः। (विमृश्य)

अथवा तादृशान्सभ्यान्मत्वा जगति दुर्लभान्।
शंके शान्तिरसोल्लासमशक्यमभिमेनिरे॥ १८॥

अपि च

असभ्यपरिपाटिकामधिकरोति शृङ्गारिता
परस्परतिरस्कृतिं परिचिनोति वीरायतम्।
विरुद्धगतिरद्भुतस्तदलमल्पसारैः परै
श्शमस्तु परिशिष्यते शमितचित्तखेदो रसः॥ १९॥

नटी-*होदु णाम सणअ सणन्दणादि मुणिजण सङ्गहीदे। सोवि तारिसो रसो तहवि कहं णिप्पन्द णिहिलकरण णिप्पादणिज्ज जोअ-प्पहाणो एसो सव्वजण पेक्खणिज्जेण णाडअ उत्तन्तेण संपादइज्ज.

*भवतु नाम सनकसनन्दनादि मुनिजनसंगृहीतस्सोऽपि तादृशो रसः तथापि कथं निष्पन्दनिखिलकरणनिष्पादनीययोगप्रधान एष सर्वजनप्रेक्षणीयेन नाटकवृत्तान्तेन संपाद्यते

अत्र नाटके पि नास्तीति वदन्ति तेष्ववज्ञा अवमानं अवहित्था आकारगुप्तिः ताभ्यां सहितं यथाभवति तथा। तान् भरतमतपारदृश्वनः भरतागमपारद्रष्टॄन् न संभावयामि न मन्ये।

पक्षान्तरमाह।

अथवेति-॥ शान्तिरसोल्लासं शान्तिरसाभिनयं॥ १८॥

शान्तिरसमनभ्युपगन्तॄणामभिप्रायमुक्त्वा रसान्तराणां मनःक्षोभकत्वादरसत्वं शान्तिरसस्य तच्छान्तिकरत्वाद्रसत्वञ्चाह।

असभ्येति-॥ संभोगविप्रलम्भभेदात् द्विविधः शृङ्गारः। तद्वत्ता शृङ्गारिता। असभ्यानां सभानर्हाणां परिपाटीप्रकारः तामधिकरोति प्राप्नोति। वीरायतं वीररसः परस्परतिरस्कृतिं अन्योन्याभिभवं परिचिनोति अभ्यस्यति वीरस्य पराभिभवस्वाभाव्यात्। अद्भुतः अद्भुतरसः विरुद्धगतिः विरुद्धा अघटितघटनात्मिकागतिः प्रवृत्तिर्यस्य स तथा। तत् शृङ्गारवीराद्भुतानामेवं भूतत्वात् अल्पसारैः मन्दैः परैः करुणादिभिः रसैः अलं न किञ्चित्प्रयोजनं शमितः उपशतः चित्तखेदो मनःक्लेशो येन स तथा। शमस्तु रसः शमितचित्तखेदतया भोग्यभूतः परिशिष्यते॥ १९॥

पुनरपि शङ्कते आर्येति। निष्पन्दानि निश्चलानि निखिलकरणानि सकलेन्द्रियाणि येषां ते तथोक्ताः तैः जनैः निष्पादनीयः उत्पादनीयः नटानां वृत्तान्तेन व्यापारेण।

सूत्रधारः—आर्य, मैवं वादीः नहि वयमवधूतनिखिलधर्माणामलेपकानां मतमभिनेष्यामः येनैवमाशङ्कसे सन्ति खलु भगवता गीताचार्येण सहस्रशः प्रतिपादिता सात्त्विकेन त्यागेन परिकर्मिता निवृत्तिधर्मपद्धतिनियता विविधा व्यापाराः यदभिनयेन रङ्गोपजीविनामाजीवावकाशः ।

अपि चेदं नियमयतु निशामयतु वा नाट्यवैभवं भवति । श्रूयते हि ।

न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः ।
नासौ योगो न तज्ज्ञानं नाटके यन्न दृश्यते ॥ २० ॥

अवधूताः अपास्ताः निखिलाः धर्मा यैस्तेषां अलेपकानां बुद्धिपूर्वात्कर्मणामलेपं वदतां मतं अभिनेष्यामः येन मतेनैवमाशङ्कसे ।

संबन्धज्ञानमात्रमेव प्रवृत्तिः वर्णाश्रमोचितसकलधर्मपरित्यागः कार्यः बुद्धिपूर्वोऽप्युत्तरागानिर्लेपत्वमस्ति । भवत्वामेव मोक्षं दास्यतीति किल तेषां मतं । सात्त्विकत्यागेन परिकर्मिताः ।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागस्सात्त्विको मतः ॥

इत्युक्तसात्त्विकत्यागः । निवृत्तिधर्मः अपवर्गैकफलः तस्य पद्धतिः मार्गः तन्नियता रङ्गोपजीविनां नटानां श्रीरङ्गनगरवासिनां च आजीवः जीवनहेतुः तस्यावकाशः ।

एवं तत्कर्मणामभिनेयत्वकथनेन शान्तिरसस्याप्यभिनेयत्वमुक्त्वा सर्वाभिनयक्षमत्वं नटस्यास्तीत्याह ।

अपि चेति—॥ नियमयतु शृणोतु । निशामयतु । मयोपदिश्यमानमर्थं पश्यतु अवलोकयत्वित्यर्थः ।

नेति—॥ शास्त्रं वेदः तस्यैव शासनरूपत्वाच्छास्त्रत्वं । विद्या धर्मशास्त्रेतिहासपुराणानि तेषां तत्त्वज्ञानजननसामर्थ्याद्विद्यात्वं । कारणे कार्योपचारः । शिल्पं गोपुरविमानमण्टपप्राकाररथादिकरणं । कला नृत्तगीतवाद्यादिः । योगः कर्मयोगः ज्ञानं भक्तियोगः तस्यापि ज्ञानविशेषत्वात् । श्रुतिस्मृतीतिहासपुराणानामभिनेयत्वं तदनुदितधर्मोदाहरणात् ॥ २० ॥

नटी—*अदि दुक्करमारद्धं तुम्हेहिं अहं उण इत्थिआसहावघोलन्त हिअआ मच्छरगह गहिआदो पडिवक्ख पडिउ णज्जणादो भअकंपि अम्हि

सूत्र—अलं कातर्येण अद्य अस्मत्स्वामिकमभिमुखं भागधेयं । तथाहि ।

लक्षणसमृद्धिरनघा रसपरिपोषश्च सहृदयग्राह्यः ।
संपतति नाटकेऽस्मिन् स एष शैलूषसुकृतपरिपाकः ॥ २१ ॥

किंच ।

विद्यासंपन्निधिरवहितो वेङ्कटेशः कवीन्द्र-
स्सिद्धारंभश्चिरमभिनये मामकः पात्रवर्गः ।
प्रख्यातेयं परिषदनघा पक्षपातानभिज्ञा
रामादीनां कुलधनमिदं रङ्गतां याति रङ्गम् ॥ २२ ॥

---

*अतिदुष्करमारब्धं युष्माभिः अहं पुनस्स्त्रीस्वभावघूर्णमानहृदया मत्सरग्रहगृहीतात्प्रतिपक्षपक्षितज्जनाद्भयकम्पितास्मि

पुनरपि प्राकृते अतिदुष्करमारब्धमिति । स्त्रीस्वभावेन घूर्णमानं भ्रमत् हृदयं यस्यास्सा तथा । मत्सर एव ग्रहः पिशाचः तेन गृहीतात्तत्परवशादित्यर्थः । प्रतिपक्षभूतात्पण्डितजनात् अतिदुष्करमारब्धमिति प्रथमत उक्तं ।

तत्रालमिति । कातर्यं भयेन कृत इत्यत आह ।

अद्य स्वामित्वेति—॥ भागधेयं भाग्यं ।

लक्षणेति—॥ लक्षणानां नाटकलक्षणानां समृद्धिः पौष्कल्यं तानि च षडङ्गानि मुखसन्ध्यप्रभृतीनि रसस्य स्थायिनः परिपोषः विभावादिभिः पुष्टिः । यथोक्तमनुभावविभावाभ्यां सात्त्विकैः व्यभिचारिभिः प्रतीतप्राप्तैः कर्तव्यमङ्गिनः परिपोषणमिति । सहृदयाः समानहृदयाः तैः ग्राह्यः सहृदयाः तदभिप्रायमवेत्य गृह्णन्ति अनघा लक्षणसमृद्धिः सहृदय ग्राह्यः रसपरिपोषश्चास्मिन्नाटके सम्पततीति यत् स एष शैलूषसुकृतपरिपाकः शैलूषाणां सुकृतस्य परिपाकः ॥ २१ ॥

एवं काव्यप्रशंसां विधाय कविनटादीन् प्रशंसति किंचेति—॥

विद्येति—॥ विद्यानां संपत् समृद्धिस्तस्या निधिः स्थानं । विद्या एव संपत् तासां निधिरिति वा । अवहितः सावधानः कवीन्द्रः । आभ्यां विशेषणाभ्यामस्य कथकस्याखिलविद्यानुसारित्वं तदपास्तास्खलितत्वञ्च व्यज्यते । मामकः मामकीनः मदीय इत्यर्थः पात्राणां वर्गः समूहः चिरं चिरायाभिनये सिद्धारम्भः सिद्धमङ्गलः फलसिद्ध्यविनाभूतारम्भ इति यावत् । अनघा दोषदृष्टिलक्षणपापरहिता इयं परिषत् पक्षपातानभिज्ञा प्रख्याता पक्षपातानभिज्ञतया प्रसिद्धा । रामः दाशरथिः आदिः येषां तेषां

अन्यच्च भवत्या भावनीयम् ।

शमधननिधिं सत्त्वप्रायं प्रयोगमयोगिनः
स्वगुणवशतस्तोतुं यद्वा वरीवृतु निन्दितुं ।
किमिह बहुभिः किंचिच्चित्रं न विश्वमनीश्वरं
तदुपनिहिता जाग्रत्येव चतुर्दशसाक्षिणः ॥ २३ ॥

नूनमतर्किताेपनता अप्यचिरकृतिवदारंभनियतावसाना मनीषिणामीर्ष्यादयः । यद्वा

इक्ष्वाकुपर्यन्तानां राज्ञां कुलधनं कुलधनमिव सर्वस्वभूतमिदं रंगं रंगविमानोपलक्षितनगरं रंगविमानस्य रामादि कुलधनत्वं ।

लब्ध्वा कुलधनं राजा लंकां प्रायाद्विभीषणः ।

इत्युक्तेस्सिद्धं रङ्गतां नृत्तशालात्वं याति ॥ २२ ॥

अनेन प्रस्तावनाङ्गभूता प्ररोचना कृता । कविकाव्यनटादीनां प्रशंसा तु प्ररोचनेति लक्षणात् ।

मत्सरग्रहगृहीतात् प्रतिपक्षपण्डितजनात् भयकम्पितास्मीत्युक्तं-तन्नोत्तरं वक्तुमारभते अन्यच्चेति-॥

शमधनेति-॥ शमः चित्तप्रशान्तिररोष्यावलेपादिराहित्यं स एव धनं येषां ते शमधनाः तेषां निधिं निक्षेपं सत्त्वप्रायं सत्त्वगुणप्रचुरममुमितिशेषः प्रयोगं नाटकप्रयोगिनः योगरहिताः । योगस्सन्नहनोपाय ध्यानसंगतियुक्तिष्विति निघण्टुः । एतदभिप्रायमजानन्त इत्यर्थः । स्वगुणवशतः स्वासाधारणरजस्तमोगुणपारवश्यात् स्तोतुं यद्वा निन्दितुं वरीवृतु वर्तन्तां । इहार्थे बहुभिर्वचनैः किं न किञ्चिदपीत्यर्थः । नः किं चित्रं विश्वं सर्वं जगदनीश्वरं न ईश्वररहितं न ईश्वरस्सर्वत्रास्ति किमित्यर्थः । अस्माभिरीश्वरो न दृश्यत इत्यत्राह । तदुपनिहिताः तेनेश्वरेण उपसर्वेषां समीपे निहिताः (अस्ये) चतुर्दशसाक्षिणः भूम्यादयः जाग्रति अनिद्रावर्तन्त इत्यर्थः । तदुक्तमेव मित्यपरोक्षनिर्देशः ॥ २३ ॥

विदुषां जाता अपि ईर्ष्यादयो न चिरन्तिष्ठन्तीति वक्तुमारभते अपि चेति-॥ अतर्किता उपस्थिताश्च आरम्भेण नियतमवसानं येषां ते तथोक्ताः ।

उक्तमेवार्थं द्रढयति ।

मौनं बिभ्रतु मत्सरेण नमिता स्तुण्वन्तु एवमुत्तं
कालोन्मिद्रकदम्बगोलवपुषः कम्पस्फुरन्मौलयः ।
किंचिद्व्रीडितकुञ्चिताक्षमवशाकूतानदत्ताननाः
प्रस्तोष्यन्त्यवधिं प्रयोगपदवी सारस्यसारस्य नः २४

सन्तु वा निरन्तरनिर्यन्मत्सरनीरन्ध्रहृदया निर्विकाराः तथापि सर्वथा तावत् ।

उपवेदमुदारधीस्वनाम्ना
भरतस्सूचितभावरागतालम् ।
यमुदाहरति स्म विश्वगुप्त्यै
तदभिज्ञैरबहिष्कृता वयं स्मः ॥ २५ ॥

नटी—*अय्य एव्वं एदं तहाव सुदगुरु एसु बहुसु विरुद्धेसु छिद्दं गवेसन्तेसु कहं अप्पमत्तेहिं अम्हेहिं पडिण्णादं णिव्वहणिज्जं

---

*आर्य एवमेतत् तथापि श्रुतगुरुकेषु बहुषु विरुद्धेषु छिद्रं गवेषयत्सु कथमप्रमत्तैरस्माभिः प्रतिज्ञातं निर्वहणीयं

मौनमिति—॥ ईर्ष्यावन्तस्तावत्मत्सरेण निह्निताननः सन्तो मौनं बिभ्रतु धारयन्तु एव तूष्णीम् । काले वर्षाकाले उन्निद्रं विकसितं यत् कदम्बगोलं कदम्बस्तबकः तदिव वपुर्येषां ते तथा सपुलका इत्यर्थः श्लाघया कम्पः तेन स्फुरन्तो मौलयो येषां ते तथा । किं चिद्व्रीडितं वा लितेन लज्जया कुञ्चिते अवनते अक्षिणी यस्मिन् कर्मणि तद्यथा भवति तथा । अवशात् अबुद्ध्येत्यर्थः । उत्तानं उन्नतं यथा भवति तथा दत्ताननं यैस्ते नः अस्माकं प्रयोगपदव्याः अभिनयमार्गस्य यत् सारस्यं सरसत्वं तस्सारस्य मुख्यांशस्यावधिं सीमानं प्रस्तोष्यन्ति ध्रुवं निश्चयः । सर्वदा आरब्धकार्यस्य सुकारत्वात् प्रतिपक्षस्य सूर्यादीनामस्थिरत्वाच्चेत्यर्थः ॥ २४ ॥

उपवेदमिति—॥ उदारधीः अशेषभोग्यभूतनाट्यशास्त्रप्रवर्तनादुदारधीत्वं भरतः भरतमुनिः स्वनाम्ना भरताख्यया सूचितभावरागतालं सूचिता भावरागताला यस्मिंस्तत्तथोक्तं ।

भकारेणोच्यते भावो रेफाद्राग उदीर्यते ।
तकारेणोच्यते तालस्त्वयं भरतंमतम् ॥ इत्युक्तेः ।

यं उपवेदं गान्धर्वं । तस्योपवेदत्वं—आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव चेत्युक्तं । विश्वगुप्त्यै (विश्वभोग्यमिति पाठान्तरे) यद्वा स्वमुदाहरतिस्म प्रणीतवान् । तदभिज्ञैरनेवयमबहिष्कृताः स्मः (अन्तरङ्गतया स्वीकृताः स्म इत्यर्थः) ॥ २५ ॥

पुनरपि छिद्रान्वेषि बहुश्रुतजनभयात् प्रकृते आर्येति—॥

सूत्रधारः—अयि परगुणासन्तोषिणि श्रुतबाहुल्ये तवक्षेपमास्था अथवा । अवधारित परमार्थानामप्यवगतसंवादनार्थमुत्तरोत्तरं परिप्रश्ना प्रवर्तन्तां भवतु नाम विशुद्धविद्यांस्तावदभिमन्यस्व । दृश्यते हि ।

भूयसीरपि कलाः कलङ्किताः ।
प्राप्य कश्चिदपचीयते शनैः ।
एकयापि कलया विशुद्धया
योऽपि कोऽपि भजते गिरीशताम् ॥ २६ ॥

तदहमिदानीं पराशरपाराशर्यादि बहुमतामबहुमतदुर्विनीतजन-वृत्तिमनवरतपरिचितगान्धर्वविद्याविनोदनप्रसादितपरमपुरुषामेतां परिषदमेकतानयामि । सप्रश्रयमञ्जलिं बध्वा ।

परेषां गुणेष्वसन्तोषिणी ।

श्रुतस्य शास्त्रश्रवणस्य बाहुल्ये तव क्षेपमास्थेत्यनेन तेषां श्रुतबाहुल्यमेव नास्ति अतो न शङ्कनीयमिति व्यज्यते । पक्षान्तरमाह ।

अथवेति ॥ अवगतानां ज्ञातानां अर्थानां संवादनं समतया वचनं तदर्थं त्वया यदुक्तं तेषां बहुश्रुतत्वं तत् भवतु नाम बहुश्रुतत्वमेव न गुणाः अपि तु विद्या विशुद्धिः सत्क्रियते हि ।

• भूयसीरिति—॥ कश्चित्पुरुषः चन्द्र इव कलङ्कितास्ताविद्याः लाञ्छनवतीश्च कलाः विद्याः षोडशभागांश्च भूयसीरपि प्राप्य शनैः अपचीयते क्षीयते । योऽपि कोऽपि यः कश्चिदपि शुद्धया विशुद्धया निर्मलया एकयापि कलया गिरिर्गोविषये ईशतां स्वामित्वं रुद्रतां च भजते । गिरीशो गिरिशो मृडइति निघण्टुः ॥ २६ ॥

तत् विशुद्धविद्याया उपादेयत्वात् गान्धर्वविद्यया विनोदः कालक्षेपः तेन प्रसादितस्सञ्जातप्रसादः परमपुरुषो भगवान् यया तां गान्धर्वविद्याविनोदश्च भगवत्प्रसादहेतुः । स्मर्यते च याज्ञवल्क्येन । तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छतीति । शम्यातालप्रयोगेन सन्निपातेन वा पुनः इति भगवता वराहरूपिणा च । एकमद्वितीयं तानं स्थानं यस्यास्सा तथोक्ता तां करोमि एकाग्रां करोमीत्यर्थः ।

सप्रश्रयं सविनयं यथा भवति तथा ।

विवेकप्रारंभे विमतमतभंगप्रयतने
मुमुक्षासंसिद्धौ मुरमथनयोगे च सफले ।
मुखादीन्निधातुं निभृतमिह नाट्ये कृतमुखै
र्भवद्भिः स्थातव्यं भरतमतधौरेयमतिभिः ॥ २७ ॥

(नेपथ्ये) ।

समयनियतैः प्रयोगै
स्सत्पथसीमामनुज्झतो विदुषः ।
किरणैरिव दिवसकृतः
क्षिप्यन्ते तामसारंभाः ॥ २८ ॥

विवेकेति—॥ इहास्मिन्नाट्ये विवेकस्य प्रारम्भे पुरुषमोक्षारम्भे विमतानां विरोधिनां महामोहादीनां मतस्याभिमतस्य यो भङ्गः तस्मिन्प्रयतने मुमुक्षाया मोक्षेच्छायास्संसिद्धौ निष्पत्तौ मुरमथनस्य मुरारेः योगसद्वहने मोक्षयिष्यामीति सङ्कल्पे तस्मिंश्च सफले मोक्षलाभरूपफलसहिते मुखादीन्मुखप्रभृतीन्सन्धीन् निधातुं सम्यक् धारयितुं भरतमतस्य धौरेया धुर्वहा मतिर्येषान्तैः कृतमुखैः शिक्षितैः भवद्भिः निभृतं निश्चलं यथा भवति तथा सावधानैरिति यावत् स्थातव्यं भाव्यमित्यर्थः । मुखादीनित्यनेन मुखप्रतिमुखगर्भावमर्शोपसंहृति संज्ञाः पञ्चसन्धयस्साङ्गा विवक्षिताः । ते च

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशा नियताप्तिफलागमाः ।
बीजबिन्दुपताकाख्य प्रकरी कार्य लक्षणाः ।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ।
अर्थप्रकृतयः पञ्च पञ्चावस्था समन्विताः ।
यथा संख्येन जायन्ते मुखाद्याः पञ्चसन्धयः ।
मुखं प्रतिमुखं गर्भस्सावमर्शोपसंहृतिः । इत्युक्ताः ।

अर्थबीजरूपाया अर्थप्रकृतेरारंभरूपायाः कार्यावस्थायाश्च संधिर्मुखसंज्ञः । एवमेव बिन्दोर्यत्नस्य च सन्धिः प्रतिमुखाख्यः । पताकायाः प्राप्त्याशायाश्च सन्धिर्गर्भाख्यः । प्रकरीनियताप्त्योश्च संधिरवमर्शनामा । कार्यस्य फलागमस्य च सन्धिरुपसंहृतिः । इति ध्येयं ।

एवमुक्तानां सन्धीनामङ्गान्यपि चतुष्षष्टिः । तत्र तत्र यथासम्भवमनुसन्धेयानि ।

इत्थमुत्सुकस्यास्य मनस्युत्साहं वर्धयद्भिः यवनिकान्तस्संगीयते ।

समयेति—॥ सत्पथस्य नक्षत्रमार्गभूतस्य नभसः सतः समीचीनस्य पथः मार्गस्य सीमां भूमिमनुज्झतः अत्यजतः विदुषः निपुणस्य दिवसकृतः किरणैरिव समयनियतैः प्रयोगैः तामसाः तमस्संबन्धिनः आरम्भाः तामसानामारम्भाः तमोगुणाभिभूतानामारम्भाः उद्योगाः क्षिप्यन्ते निरस्यन्ते ॥ २८ ॥

सूत्रधारः—(कर्णं दत्वा) (सानन्दं)।

आर्ये सम्यगवधार्यतां अस्मद्वृत्तिमापवर्गिकीमिव तन्वयन्तीयमौद्घातिकी गीतिः । ततश्च ।

दुर्जनं प्रतिपक्षं च दूरदृष्टिरयं जनः ।
विवेकश्च महामोहं विजेतुं प्रभविष्यतः ॥ २६ ॥

(नेपथ्ये) ।

कः खल्वसौ कुशीलवकुलाङ्गारः करतलकलितकठोरमधुरधन्वनि सुरभिसुकुमारचित्रपुंखे विद्रावितनिखिलवैरिजने जीवति सकलसुरासुरमुनिमनुजचित्तवृत्तिसार्वभौमस्य दुर्मतिसहधर्मचारिणीरमणरङ्गमहानटस्य देवस्य महामोहस्य विवदानर्हं किमपि विपक्षसकाशादाशंसते ।

सूत्रधारः—(सभयसंभ्रमं परिवृत्य पश्यन्)

आर्ये कोऽयममर्षसंप्लवादभ्यधिकलोहितालसलहाय इतोऽभिवर्तते । आः कष्टमवधारितं ।

अस्मद्वृत्तिमिति—॥ स्वोद्युक्तकार्यनिर्वहणं आपवर्गिकीं अपवर्गसम्बन्धिनीं विवेकादिविजिगीषितमुक्तिप्रापणञ्च तन्वयन्ती यौगपद्येन प्रतिपादयन्ती औद्घातकी उद्घातसंबन्धिनी गीतिः गानमवधार्यतां निश्चीयतां । ततः श्रोतॄः अस्माकं विवेकस्य च वृत्तिकथनात् ।

दुर्जनमिति—॥ दूरे दृष्टिः दर्शनं यस्य स तथा अयं जनश्च अहमित्यर्थः विवेकश्च दुर्जनं प्रतिपक्षं च महामोहं च विजेतुं प्रभविष्यतः समर्थौ भविष्यतः ॥ २६ ॥

एवं विवेकान्महामोहस्य पराजयमाकर्ण्य समनन्तरं प्रवेक्ष्यमाणः कामोऽसहमान आह ।

कः खल्विति—॥ कुशीलवस्य कुलस्याङ्गारः अङ्गारवद्दाहकः सुरभिः परिमलवान् सुकुमारः मृदुः अत एव चित्रः आश्चर्यभूतः पुंखः बाणो यस्य तस्मिन् परिजनं मयीतिशेषः । सुरासुरादीनां याश्चित्तवृत्तयः तासां सार्वभौमः सर्वभूमीश्वरः तस्य दुर्मतेस्सहधर्मचारिण्याः पत्युः रङ्गमिव चित्रका तस्याप्यनर्हमयोग्यं । किमपीत्यसम्भावितत्वं द्योतयति ।

अमर्षः कोपः मदः दर्पः तयोस्संप्लवेन व्यतिरेकेण अभ्यधिकं लोहितेक्षणे यस्य स तथा । आः कष्टमिति खेदे अवधारितं ।

अयं हि

अपवर्गविरुद्धेषु त्रिषु वर्गेषु तिष्ठताम् ।
प्रधानपुरुषार्थस्य पश्चिमस्याधिदैवतम् ॥ ३० ॥

किंच

अर्द्धावशेषितमहेश्वरपौरुषोयं
वर्गन्तृतीयमवधीरयतां विनेता ।
रत्यासलीलपरिरंभणलोलगत्या
पुष्पायुधः पुलकितैकभुजोऽभ्युपैति ॥ ३१ ॥

तदिह वयं त्वरितमपसृत्य कालोपपन्नकामोत्सवविहारसंकुले जीवलोके संवलितगुप्तवृत्तयस्समनन्तरकरणीयमाचरामः ।

(इतिनिष्क्रान्तौ)

-प्रस्तावना-

अयमेव इति निश्चितं तदेवाह ।

अपवर्गेति-॥ त्रिषु वर्गेषु धर्मार्थकामेषु तिष्ठतां पुरुषाणां प्रधानपुरुषार्थस्य पश्चिमस्य कामपुरुषार्थस्याधिदैवतं अभिमानिदेवता कामइत्यर्थः ॥ ३० ॥

पुनश्च तदेवाह ।

अर्धेति ॥ अर्धमवशेषितमवशिष्टं कृतं महेश्वरपौरुषं रुद्रपराक्रमो येन तथोक्तः । महेश्वरशब्दः त्रिपुरदहनहालाहलभक्षणादिक्रूरकर्मेति द्योत्यते । तृतीयं वर्गं काममवधीरयतां तिरस्कुर्वतां विनेता शिक्षकः । सलीलं सविभ्रमं यत्परिरम्भणमालिङ्गनं तेन लोला स्खलन्ती गतिर्यस्यास्तया रत्यासह पुलकितः संजातपुलकः एको भुजो यस्य स तथा अभ्युपैति अभिमुखमायाति ॥ ३१ ॥

संवलिताः संयुक्ताः अत एव गुप्ताः वृत्तयः व्यापाराः येषां ते तथोक्ताः अनन्तरकरणीयं अनन्तरकर्तव्यं ।

प्रस्तावनेति-॥ आमुखस्य नामान्तरं प्रस्तावनामुखमिति कवेरिदं वाक्यं । प्रस्तावनामुखयोपन्यासस्त्वं ।

सूत्रधारो नटीं ब्रूते मार्षं वाथ विदूषकं ॥
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्यायत्तदामुखं ।

(ततः प्रविशति वसन्तदत्तहस्तः कान्तासमेतः कामः)

कामः–(कः खल्वित्यादि पुनः पठित्वा) ।

प्रस्तावनाचेत्युक्तं ।

अत्र कथोद्घातेन पात्रप्रवेशः ।

प्रस्थावना वा तत्रस्युः कथोद्घातः प्रवृत्तकम् ॥

प्रयोगातिशयश्चाथ वीथ्यंगानि त्रयोदश ।

स्वेति वृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ॥

गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः ।

कालसाम्यसमाक्षिप्तः प्रवेशस्यात्प्रवृत्तकम् ॥

एषोयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।

पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ॥

इति कथोद्घातादीनां त्रयाणां लक्षणमुक्त्वा ।

एषामन्यतमेनार्थं पात्रं चाक्षिप्यसूत्रभृत् ।

प्रस्तावनान्ते निर्गच्छेत्ततो वस्तुप्रपञ्चयेत् ॥

इति प्रतिपादितः । प्रस्तावनायां वीथ्यंगान्यामुखांगत्वादित्युक्तेरुद्घात्यकादीनि त्रयोदशवीथ्यंगानि च प्रयोक्तव्यानि ।

॥ प्रस्तावना ॥

अथ सूच्यदृश्यभेदाद्वस्तुनो द्वैविध्यं । तयोस्सूच्यार्थोपक्षेपकत्वाच्च विष्कंभादीना-मिदानीं सूच्यार्थोपक्षेपकं विष्कम्भं निबध्नाति । तत इति ।

तदुक्तं ।

सर्वं च द्विविधं वस्तु सूच्यं दृश्यमथापरं ।

अर्थोपक्षेपकैस्सूच्यं पंचभिः प्रतिपादयेत् ।

विष्कम्भचूलिकांकास्यांकावतारप्रवेशकैः ॥

तेषु च ।

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥

इत्युक्तलक्षणो विष्कम्भः । कान्ता रतिः ।

रेरे भरतकुलपांसन ।

दरनमितमनोज्ञभ्रूलताचापभाजां
तरलहृदयलक्ष्ये तादृशस्नेहदिग्धे ।
कुवलयनयनानां कूणिते लोचनास्त्रे
शरणयतु विवेकः कान्दिशं कान्दिशीकः ॥ ३२ ॥

वसन्तः-

(स्वगतम्) उत्पथमनोरथोऽयमुपचितमदोऽविषमशाग्रः अहं पुनरपुनरावृत्तिवर्तनीपथिकानामातिवाहिकगणे परिगणितोऽपि न सहसा परित्यक्तुं शक्नोमि चिरन्तनं चित्तजन्मसौहार्दम् ।

[प्रकाशम्] सखे मकरध्वज एवमेतत् अहं पुनर्महाराजस्य महामोहस्य माङ्गलिकं विवेकविद्रावणं भावत्कं महोत्सवं प्रक्रमयामि । पश्यतु भवान् ।

दरेति-॥ दरमल्पं नमिता मनोज्ञा च या लतेव भ्रूः सैव चापः तं भजन्तीति तद्भाजः तासां कुवलयानि नीलोत्पलानीव नयनानि यासां तासां स्त्रीणां तरलानां चपलानां हृदयमेव लक्ष्यं शरव्यं यस्य तस्मिन् तादृशः परिचयस्नेहस्तेनमनुरागश्च तेन दग्धे कुपिते लोचनमेवास्त्रं तस्मिन् कूणिते सति कान्दिशीकः भयद्रुतः विवेकः कान्दिशमाशां शरणयतु । रक्षकतया प्राप्नोतु । नक्वापितिष्ठतीति भावः ॥ ३२ ॥

स्वगतं मनोगतं स्वमनसि यच्चिन्तितवान् तत् कथयति । उत्पथ उन्मार्गः मनोरथो यस्य स तथा । दुष्प्राप्ये वस्तुन्यभिलाषवानित्यर्थः । न विद्यते पुनरावृत्तिर्यस्यास्सा अपुनरावृत्तिस्सा चासौ वर्तनी च तथा वर्तनी मार्गः तस्यां ये पथिकाः गन्तारः मुक्ताः तेषामातिवाहिकाः अतिवहने नियुक्ताः तेषां गणे परिगणितः उक्तोऽपि अस्यातिवाहिकगणे परिगणितत्वं । वसन्तस्योत्तरायणान्तर्गतत्वादिति मन्तव्यं । प्रकाशमिति । मनोगतं विहाय व्यक्तमाहेत्यर्थः । भावत्कं तावकं महोत्सवं वसन्तोत्सवमित्यर्थः ।

चूडावेल्लितचारुहल्लकभरव्यालम्बिलोलम्बकाः
क्रीडन्त्यत्र हिरण्मयानि दधतश्शृङ्गाणि शृङ्गारिणः ।
तन्वङ्गीकरयन्त्रयन्त्रणकलातन्त्रस्त्रवद्भस्त्रिका
कस्तूरीपरिवाहमेदुरमिलज्जम्बालजम्बालकाः ॥ ३३ ॥

कामः—साधु वसन्त साधु । विशेषतश्चैतत् । सर्वदा विजित एवासौ विवेकहतकः । यदिदमवधीरितत्रिविष्टपविहारकान्तारेषु मरुद्वृधोपान्तभागेषु महोत्सवारंभः । इह च ।

उन्निद्राम्बुजवाटिकामुभयतो रोधोनिरोधोल्लल
त्स्रोतस्सम्भृतसारणीशतकृतस्वच्छन्दकच्छाप्लवाम् ।
खेलच्चोलवधूविधूतकबरीशैवालितामन्वहं
पश्येम प्लवमानहंसमिथुनस्मेरां कवेरात्मजाम् ॥ ३४ ॥

चूडेति—॥ चूडासु केशबन्धेषु आपीडेषु वा वेल्लितः आबद्धः यश्चारुर्हल्लकभरः कल्हारचयः तत्र व्यालम्बिनस्सक्ताः लोलम्बकाः मधुकराः येषां ते तथोक्ता हिरण्मयानि हेमपट्टबन्धानि शृंगाणि गोशृंगकृतपात्रविशेषाणि दधतः वहन्तः तन्वङ्गीनां करा एव यन्त्राणि तेषां यन्त्रणं नियमनं तदेव कला विद्या तया तन्त्रेण सहस्रवन्ती स्रवन्ती भस्त्रिका दृतिः तस्यां यः कस्तूरी परिवाहः कस्तूरीकर्दमः तेन मेदुरास्संमिश्राः अत एव मिलज्जंबालाः पंकिलाः लंबाश्चालका येषां ते तथोक्ताः शृंगारिणः रसिकाः अत्र क्रीडन्ति ॥ ३३ ॥

अवधीरितं निरस्तं त्रिविष्टपे स्वर्गे स्थितं विहारकान्तारं क्रीडोद्यानं नन्दनवनं यैस्तेषु ।

उन्निद्रेति—॥ उन्निद्राः (उत्फुल्ला इति पाठान्तरं) अंबुजवाटिकाः पद्मवनानि यस्यां तां उभयतः पार्श्वयोः रोधसा तीरेण यो निरोधः वारणं तेनोल्ललता वर्धमानेन स्रोतसा प्रवाहेण संभृतानां पूर्णानां सारणीनां कुल्यानां शतेन कृतः स्वच्छन्दं अप्रतिहतः कच्छाप्लवः पर्यन्तदेशमज्जनं यस्यास्तां । खेलन्तीनां विहरन्तीनां चोलवधूनां कबरीभिः शैवालितां संजातशैवालामिव स्थितां प्लवमानैः (स्मयमान इति पाठान्तरं) विलसद्भिः हंसमिथुनैः स्मेरां विहसन्तीमिव स्थितां हंसानां हासस्य धावल्यसाम्यादेवमुक्तं । कवेरस्य सह्यैकदेशभूतगिरिविशेषस्यात्मजां तज्जन्यामित्यर्थः पश्यामि ॥ ३४ ॥

रतिः—*अय्यउत्त आपाअमहुरो एसोमहूसवो दाणिंकिल अह्मकुल सामिणो महामोहस्स अणिवारिणिज्जेण केण विविहिणा अमोहारंभो विवेओ दुज्जओपडिपक्खोत्ति दूमिअं मम्म हिअअं।

कामः—बाले विषमशरजीवितेश्वरि विलासिनीदेवते किमिति नाम समग्रबलजेतव्यलब्ध्यासन्तोष्टव्योपि भावितस्त्रीचापला विवेकवैभवं वर्णयसि । पश्यतु भवती ।

करधृतललितेक्षुधन्वनोमे
भ्रमरगुणार्पितपुष्पमार्गणस्य ।
मरुदनलशरोपि मेरुधन्वा
क्षणमतिलंघितशासनः कथं स्यात् ॥ ३५ ॥

वसन्तः—सखि सत्यमेवैतत् । माखल्विदं विकत्थनं मंस्थाः । नहि जगति भवति मशको मातङ्गस्य प्रतिस्पर्द्धी । अथवा न खलु भवतीविश्ववृत्तान्तवैदेशिकी दृष्टचर एव हि त्वत्प्रियस्यासौ वीरायित वृत्तान्तः । तथा हि ।

---

* आर्यपुत्र आपातमधुर एष महोत्सवः इदानींकिल अस्मत्कुलस्वामिनो महामोहस्यानिवारणीयेन केनापि विधिना अमोघारंभो विवेको दुर्जयः प्रतिपक्ष इति धूपितं मे हृदयम्

एवमुक्तवन्तं कामं रतिराह—आर्येति । आपाततः दर्शनमात्रे मधुरः प्रियः ननु मनसि विचारणे अनिवारणीयेन वैभवमाह ।

करधृतेति—॥ करधृतं ललितं यत् इक्षुधनुः यस्य तस्य । भ्रमरगुणे भ्रमरपंक्ति-रूपे गुणे मौर्व्यां अर्पितस्संहितः पुष्पमेव मार्गणश्शरो यस्य तस्य मे मरुदनलौ वाय्वग्नी शरौ यस्य स तथा मेरुर्हेमाद्रिः धनुर्यस्य स रुद्रोपि अतिलंघितमपाकृतं शासनं यस्य स तथा क्षणमपि कथं स्यात् । न स्यादेवेति भावः ॥ ३५ ॥

इदं कामवचनं विकत्थनं व्यर्थालापं मा मंस्थाः मा मन्यस्व ।

नहीति—। मशकमातंगयोर्यदन्तरं तदन्तरं विवेकमदनयोरप्यस्तीतिभावः ।

अन्यदप्याह ।

अथवेति—। विश्वेषां वृत्तान्तानां वैदेशिकी विदेशभवा अनभिज्ञेति यावत् वीरायितं वीर्यं तस्य ।

वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखै-
र्वरतनुतया वामो भागश्शिवस्य विवर्तते ।
तदपि परमं तत्त्वं गोपीजनस्य वशंवदं
मदनकदनैर्न क्लिश्यन्ते कथन्न्वितरे जनाः ॥ ३६ ॥

कामः—साधु वसन्त साधु । कालानुरूपवादी खल्वसि ।

विश्वं युवतिसात्कर्तुं भवता दत्तसायके ।
विवेकः किन्नु वर्तेत विपक्षे मयि संस्थिते ॥ ३७ ॥

रतिः—*अय्य उत्त एव्वंएदं तहवि विसमत्थिरसंठाणवेरग्ग दुग्गपडिट्ठिओ अप्पमत्तेहिं समदमप्पमुहेहिं अमच्चेहिं अभिरक्खिओ सअं असहायसूरो अणवाअ साहसोअ विपक्खो किण्णाम कदुआ कहिस्सित्ति कलुसि अहि ययम्हि ।

* आर्यपुत्र एवमेतत् तथापि विषमस्थिरसंस्थानवैराग्यदुर्गप्रतिष्ठितोऽप्रमत्तैश्शमदमप्रमुखैरमात्यैरभिरक्षितः स्वयमसहायशूरोऽनपायसाहसश्च विपक्षः किन्नाम कदा करिष्यतीति कलुषितहृदयास्मि

वहतीति—॥ आद्यो वेधा इति दक्षादिव्यावृत्तिः महिलां स्त्रियं सरस्वतीमित्यर्थः । त्रय्या वेदत्रयेण मुखरैः शब्दायमानैः मुखैस्सर्वदाध्ययनपरैर्वदनैर्वहति धत्ते वेदानामपि सरस्वतीत्वात् शिवस्य परिशुद्धतया प्रसिद्धस्य वामो भागः वरतनुतया स्त्रीत्वेन विवर्तते परिणमते । अर्धनारीनरवपुरिति स प्रसिद्धः । तत् वेदान्तप्रसिद्धं परमं तत्त्वं । भगवान्नारायणः तत्त्वं नारायणः परः । इति हि श्रूयते । गोपीजनस्य वशंवदं अधीनं । ननु गोपीजनवशंवदत्वं कृष्णस्य किल । तत्कथं नारायणस्येत्युच्यते नारायणस्यैव कृष्णत्वेनावतारात् । एवं हि स्मर्यते ।

एष नारायणश्श्रीमान् क्षीरार्णवनिकेतनः ।
नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम् ॥ ३६ ॥

कालस्य समयस्य अनुरूपं अनुगुणं वक्तुं शीलमस्यास्तीति अनुरूपवादी ।

विश्वमिति—॥ युवतिसात्कर्तुं युवत्यधीनं कर्तुं मयि संस्थिते सम्यक् स्थिते विवेकः किंनु वर्तेत न वर्ततेत्यर्थः ॥ ३७ ॥

पुनरपि स्वहृदयकालुष्यं तद्धेतुं चाह—आर्येत्यादि । विषमं दुराक्रमं स्थिरसंस्थानं दृढसंस्थानं च यद्वैराग्यमेव दुर्गं तस्मिन्प्रतिष्ठितमनपायमपायरहितं साहसं यस्य स तथा किं नाम कर्म कदा करिष्यतीति अस्मिन्समये ।

कामः—अयि भीरु अलमतिशङ्कया नूनं विपक्षपक्षपातिबालिशजनविप्रलब्धो स्वयूथ्यविभवं न निर्धारयसि । पश्यतावत् विश्वविजयिनस्त्वत्सयस्यमे जगत्त्रयप्रसिद्धजैत्रमुपकरणम् ।

वपुरप्रतिमं नितंबिनीनां
दृढसौन्दर्यगुणं दरावनम्रम् ।
श्रवणावधि नेत्रचित्रपुंखं
धनुराद्यं मम मुष्टिमेयमध्यम् ॥ ३८ ॥

अपि च ।

शैलीं विलोपयति शान्तिमधः करोति
व्रीडां व्युदस्यति विरक्तिमपह्नुते च
कर्णामृतं किमपि तत्कलभाषिणीनां
नामापि किं न विकरोति निशम्यमानम् ॥ ३९॥

वसन्तः—ननु कैमुतिकमेतत्, यदिदं योषितां यदृच्छाकीर्तनश्रवणादिकमपि चित्तसंक्षोभहेतुरिति ।

तिष्ठतु गुणावमर्शः
स्त्रीणामालोकनादिभिस्सार्धम् ।
दोषानुचिन्तनार्था
स्मृतिरपि दूरीकरोति वैराग्यम् ॥ ४० ॥

विपक्षे पक्षपाती सादरः यो बालिशजनः मूर्खजनः तेन विप्रलब्धा वञ्चिता मदुपकरणं किमित्यत आह ।

वपुरिति—॥ अप्रतिमं सदृशवस्त्वन्तररहितं दृढं स्थिरं यत्सौन्दर्यं तदेव गुणः ज्या यस्य तत्तथोक्तं दरमल्पमवनम्रमवनतं श्रवणं श्रोत्रमवधिस्सीमा यस्य तत्तथा दीर्घमित्यर्थः यन्नेत्रं तदेव चित्रः अद्भुतः पुंखः बाणो यस्य तत्तथोक्तं मुष्टिनामेयं मध्यं यस्य तत्तथा । नितंबिनीनां वपुः मम आद्यं आयुधेषु प्रधानं धनुः वपुस्तिष्ठति ॥ ३८ ॥

नामापि विकार हेतुरित्याह ।

शैलीमिति—॥ शैलीं स्वभावं विलोपयति नाशयति व्युदस्यति उन्मूलयति अपह्नुते तिरस्करोति । कर्णयोरमृतं अमृतवदानन्दावहं किमपि अनिर्वचनीयं तत्प्रसिद्धं कलभाषिणीनां निशम्यमानं श्रूयमाणं नामापि न विकरोति किं विकरोत्येवेत्यर्थः ॥ ३९ ॥

कैमुतिकं किमुतेति न्यायसिद्धं ।

तिष्ठत्विति—॥ गुणानां सौन्दर्यसौशील्यादीनां अवमर्शः विचिन्तनं आलोकनादिभिस्सार्धं तिष्ठतु । दोषाणां दौर्जन्यादीनां अनुचिन्तनं अर्थःप्रयोजनं यस्यास्सा तथा स्मृतिस्स्मरणमपि वैराग्यं दूरीकरोति दूरवर्तमानं करोति ॥ ४० ॥

अपि च प्रभूतमदमेदुरात्मनो
विषयाटवीषु विविधासु धावतः ।
स्वबलेन हन्त मनसो निवर्तनं
बिसतन्तुनेव सुरदन्तियन्त्रणम् ॥ ४१ ॥

रतिः— *अय्यउत्त दिढभूमिविब्भमसमुम्मूलणक्खमाणं जोईसराणं दिट्ठिं परिहरंतेण तुए परक्कमणिज्जं

कामः—[विहस्य] प्रिये पश्यामि चक्षुषीवते चेतस्यपिज्ञातयं योजयामि खल्वहं योगीश्वरानपि युवतियोगीश्वरपादे ।

सुभगपरुषैर्मदस्त्रैः
कीलितमन्योन्यकवचितैकार्धं ।
किन्न विदितं भवत्या
किमपि मिथस्स्यूतजीवितं मिथुनम् ॥ ४२ ॥

* आर्यपुत्र दृढभूमिविभ्रमसमुन्मूलनक्षमाणां योगीश्वराणां दृष्टिं परिहरता त्वया पराक्रमणीयम् ।

चञ्चलं हि मनःकृष्ण प्रमाथिबलवद्दृढं ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ॥

इत्युक्तरीत्या चित्तनियमनमशक्यमित्याह ।

अपि चेति—॥ प्रभूतः अधिकः स चासौ मदश्च तेन मेदुरः मिश्रः आत्मा स्वरूपं यस्य । विविधासु विषयाश्शब्दादय ते एवाटव्यः तासु धावतः मनसः स्वबलेन निवर्त्तनं बिसतन्तुना बिसान्तर्वर्त्तितन्तुना सुरदन्तिनः ऐरावतस्य यन्त्रणं बन्धन मिव । हन्तेत्यसंभावितत्वं द्योतयति । जितचित्तानां समीपेन प्रभवति ते पराक्रम इति निश्चिनोमि ॥ ४१ ॥

दृढभूमयः स्थिरतरस्थानाः विभ्रमाः तेषां समुन्मूलने क्षमाणां । युवतय एव योगिनः तेषामीश्वरः प्रधानभूतः तस्य पादे योजयामि तत्वं जानास्येवेत्याह ।

सुभगेति—॥ सुभगत्वे भोग्यत्वेपि परुषैः पुष्पतया सुभगत्वं बाधकत्वात्परुषत्व च मदस्त्रैः मत्सायकैः कीलितं निघातकीलं अत एवान्योन्यं कवचितं सञ्जातकवचं एकैकार्धं मिथः परस्परं स्यूतं संबद्धं जीवितं यस्य तत्तया किमपि मिथुनं ॥ ४२ ॥

रतिः— *अय्यउत्त, अवहारिअं मए तुह माहप्पं दाणिं उण दीह बुद्धि-बलेण देव्वदिण्णहत्थेण जमणिअमप्पमुहबहुसहाअसंपण्णेण अहं तुज्झा-हप्पहुसणमंतसत्तिणा सत्तुणा कादे किं होज्जत्ति पबलपवणाहदआ कअलिएव्व तरलअरह्मि पसिद्धं खु पण्णाबलं मोक्खपेरं ताणं अइदुक्क-राणं सिद्धीणं साहणंति ।

कामः—[सरोषहासं] अयि मुग्धे मञ्जुभाषिणि गुञ्जन्मधुकरशिञ्जिनी संहितविश्वलक्ष्यविषमविशिखस्य नित्यविजयजागरूकस्य त्वमिव यस्य मे सचिवी का पुनः प्रज्ञा । केन वा कस्य मुक्तिर्भविनी किमितिनाम मध्य इव भवत्या मानसेऽपि सौक्ष्म्यमालक्ष्यते । [विहस्य] प्रिय हन्त विदितमेतत् नूनमिदानीं स्तनगतं स्थौल्यमेतदन्तरापि संक्रान्तमिति । अथवा । अविचारितरमणीयमबलाजनस्वाभाव्यं भवत्यामपि वर्तते संपश्यतां भवती ।

मयादिष्टः क्रोधः प्रथयति किमप्यान्ध्यमथच
स्मृतिभ्रंशस्सेद्धा विघटयति बुद्धिं सपदि सः ।
तया मुक्तः क्षेत्री तमसि गहने विन्दति लयं
तथाभूते किं वा जनयति विवेको जडमतिः ॥ ४३ ॥

* आर्यपुत्र अवधारितं मया तव माहात्म्यं इदानीं पुनः दीर्घबुद्धिबलेन दैवदत्तहस्तेन यमनियमप्रमुखबहुसहायसंपन्नेन अखण्डोत्साहप्रभुत्वमन्त्रशक्तिना शत्रुणा कदा किं भवेदिति प्रबलपवनाहता कदलिकेव तरलतरास्मि । प्रसिद्धं खलु प्रज्ञाबलं मोक्षपर्यन्तानामतिदुष्कराणां सिद्धीनां साधनमिति ।

रोषश्च हासश्च रोषहासौ ताभ्यां सहितं यथा भवति तथा मधुकरमय्यां शिञ्जिन्यां संहिताः विश्वं लक्ष्यं येषां ते तथा विषमाश्च विशिखाश्शरा यस्य तस्य मानसे बुद्धावित्यर्थः । स्थौल्यस्य हेतुमाह प्रियेति । अविचारितरमणीयं अविचारितत्वे रमणीयं अबलास्वाभाव्यं स्त्रीस्वभाव इत्यर्थः । संपश्यतां विवेकपराभवप्रकारमिति शेषः ।

मयेति—॥ मया आदिष्टः प्रेरितो क्रोधः किमप्यान्ध्यं कृत्याकृत्यविवेकशून्यतां प्रथयति अथ च स्मृतिभ्रंशस्सेद्धा भविष्यति सः बुद्धिं विघटयति शिथिलयति । तया बुद्ध्या मुक्तः क्षेत्री जीवः गहने तमसि लयं विन्दति । तस्मिन्जीवे तथाभूते मोहं गते सति विवेकः किं जनयति न किंचिदपि कर्तुं शक्नुयादित्यर्थः गीतं चैतद्भगवता ।

तदेवमसह्यवेगमस्मद्व्यूहं विवेकामात्याश्शमदमादयो न प्रसहिष्यन्ते । स्वयञ्च दुर्जयो निखिलसुरासुरकोटीरविन्यस्तवामपादो महामोहः । नहि तरक्षुर्मृगराजस्य परिपन्थी ।

परस्य पुरुषस्येव पञ्चभिश्च ममायुधैः ।
समयेषु विमथ्यन्ते सत्ववन्तोपि शत्रवः ॥ ४४ ॥

अपि च ।

अलमिह विबुधाद्यैरागमग्राह्यवाचो
मुनिपरिषदि धर्मान् गायतो मुक्तिहेतून् ।
तपसि नियतवृत्तेस्तस्य देवस्य शान्तिं
जनितयुवतिरत्नं दर्शयत्यूरुकाण्डम् ॥ ४५ ॥

रतिः—*अय्यउत्त संभावेमि सच्चं तु हभासिअं । अब्बह्मकीडं अप्पडिहअं खु तुह माहप्पं । एदं उण अणाअपुव्वं आणवेदु अय्यउत्तो ।

कामः—किन्तत्

रतिः—† विवेअप्पहुदीणं महामोहप्पहुदीणं अमिअन्दमाअंदाणं विअ किणिमित्तं वेरन्ति ।

* आर्यपुत्र संभावयामि सत्यन्तव भाषितं । आब्रह्मकीटमप्रतिहतं खलु तव माहात्म्यं । एतत्पुनरज्ञातपूर्वमाज्ञापयत्वार्यपुत्रः ।

† विवेकप्रभृतीनां महामोहप्रभृतीनां च मृगेन्द्रमातङ्गानामिव किंनिमित्तं वैरमिति

संगात्संजायते कामः कामात्क्रोधोभिजायते ।
क्रोधाद्भवति संमोहस्संमोहात्स्मृतिविभ्रमः ॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति । इति ॥ ४३ ॥

अस्मद्व्यूहं अस्माकं सेनानिवेशविशेषं । तरक्षुः व्याघ्रः ।

परस्येति—॥ सत्ववन्तः बलवन्तः सत्वगुणनिष्ठा अपि ॥ ४४ ॥

देवास्तिष्ठन्तु ।
साक्षान्नारायणोपि शान्तिविधुरइत्याह ।

अलमिति—॥ इह लोके विबुधाद्यैः विबुधाश्चतुर्मुखप्रभृतयः आद्यशब्देन सनकादयो गृह्यन्ते तैरलं तैस्तिष्ठन्तु आगमैः वेदैः ग्राह्याः ग्रहीतुं योग्याः वाचो यस्य तस्य । मुनीनां परिषदि मुक्तिहेतून् धर्मान् गायतः । तस्येति प्रसिद्धिद्योतिका देवस्य नारायणस्य जनितं युवतिरत्नं येन तत् ऊरुकाण्डं ऊरुदण्डः । काण्डोस्त्रीदण्डबाणार्ववर्गावसरवारिष्विति निघण्टोः काण्डशब्दस्य नपुंसकत्वमप्यस्ति शान्तिं दर्शयति । ऊर्वशीजनको नारायणस्योरुरेव तस्य शान्त्यभावं प्रकटयतीतिभावः ॥ ४५ ॥

कामः—प्रिये आकर्ण्यतामिदमादितः प्रभृति ।

त्रिगुणघटिताद्दोष्कुर्बुद्धिस्सती तदनुव्रता
समयनियतोच्छ्रायस्त्रेधाकुलं समजीजनत् ।
प्रथममिह तद्भोगद्वेष्यं विवेकपुरस्सरं
द्वितयमितरज्जुष्टं राग प्रमोहमुखं मिथः ॥ ४६ ॥

अत्र विवेकश्च महामोहश्च समानशीलाभिः प्रकृतिभिरभिषिक्तौ राजन्यौ । तयोरपि ।

मोहस्य धर्मपत्नी दुर्मतिरपवर्गदोषदृष्टिमयी ।
विषयरसदोषदृष्टि स्सुमतिरनन्या विवेकस्य ॥ ४७ ॥

एवं कामवाक्यमशेषं सत्यं मन्यमाना रतिः सा उभयोर्विवेकमोहयोः वैर कारणं पृच्छति । मध्ये कामः प्रश्नमुपक्षिपति किं तदिति किंनिमित्तं वैरमिति पृच्छन्त्या देव्यास्तयोर्वैरनिमित्तं सम्यक् ज्ञापयितुं जन्मप्रभृति सर्वं ज्ञापयितुकामस्तां संबोधयति प्रियेति ।

त्रिगुणेति—॥ त्रिगुणघटितात् सत्वरजस्तमोरूपगुणत्रययुक्तात् । सर्वस्यापि गुणत्रयमुक्तमस्ति । गीयते हि भगवता ।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात्त्रिभिर्गुणैः । इति ॥

भोक्तुः जीवात्पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते । इति हि स्मर्यते तदनुव्रता तं पुरुषं अनुगता सती साध्वी बुद्धिः समयेषु स्वावसरेषु नियतः व्यवस्थित उच्छ्रायः उन्मेषो यस्य तत् कुलं त्रेधा त्रिप्रकारेण समजीजनत् सम्यक् जनयामास त्रेधेत्युक्तं तत्र किमाद्यं के वापरे इत्याकांक्षायामाह प्रथमेति । भोगद्वेष्यं अननुभूतं विवेकः पुरस्सरः अग्रयायी यस्य तत् । विवेकपुरस्सरं तत्प्रसिद्धं । इह कुलत्रये प्रथम-माद्यं । रागः कामः प्रमोहः महामोहः तौ प्रमुखे निर्वाहकौ ययोस्तत् रागप्रमोह-मुखं मिथः परस्परं जुष्टं संयुक्तं द्वितयं कुलद्वयं । इतरत् रागप्रमोहमुखमित्यनेनास्य कुलस्य रजस्तमः प्रचुरत्वं सूच्यते । भोगद्वेष्यमित्यनेन तस्य सत्वनिष्ठत्वं च ॥ ४६ ॥

समानं शीलं स्वभावो यासां ताभिः राजन्यौ राजानौ । अथैतयोः पत्न्यावाह

मोहस्येति—॥ अपवर्गे मोक्षे दोषतया दृष्टिर्दर्शनं तन्मयी तत्स्वरूपा वर्ण-मयी कुहुरितिवत् । विषयाश्शब्दस्पर्शादयः तदनुभवेन योरसः तस्मिन् दोषाया दृष्टिर्यस्यास्सा तथोक्ता सुमतिः विवेकस्यानन्यापृथक्सिद्धापत्नीत्यर्थः ॥ ४७ ॥

रतिः— *तदोतदो ।

कामः—ततश्च रजःप्रधाना रागादयः तमःप्रसूते संसारचक्रप्रवर्तिने महामोहस्य दैत्यानुकूलरक्षःकुलन्यायेन साचिव्यमाचरन्ति । सत्वसंभवन्तु विवेककुलमसाहयमल्पसारञ्च जगति वर्तते । जनकश्चास्माकं क्षेत्रज्ञः स्वयं मध्यस्थस्वभावोऽपि सहधर्मचारिण्या देव्या बुद्ध्यासहाद्य यावदस्मासु बहुलं दत्तदृष्टिः । तदिदमसहमानानित्यनृशंसाविवेकादयः ज्ञातिवादिन इव स्वभङ्गमप्यनुमन्यमानाः पुरुषस्य भोगं तत्संवर्धकानस्मांश्च उत्सादयितुमीहन्ते । अस्मत्तातेन चानादिभुक्तायां प्रकृतौ विविधान् दोषानुद्घाट्य तातं च तस्यामुपजनितवैराग्यं केनचिदुपायेन विरचय्य महाप्रस्थानेनापुनरावर्तिनं कर्तुमारभन्ते । तथा मर्कटरक्षःपती महापातकिनौ सुग्रीवविभीषणौ स्वकुलोत्सादने प्रमाणयन्ति । न च तदारंभसमये तातस्य दुर्दशाशङ्क्या वर्णयतुं । अयं खलु ।

* ततस्ततः

रतिः कथाश्रवणे प्रीतिं द्योतयति ततस्तत इति । विवेकमोहौ द्वावपि राजानावभिषिक्तौ अन्यट्रागाद्यं कुलं कथमासीदित्यत आह ।

रजःप्रधाना इति—॥ रागमोहकुलयोस्तुल्यत्वेन कथमनयोरेकस्य प्राधान्यं इत्यस्य गुणभाव इत्यत्राह दैत्येति—॥ द्वयोरनयोः कुलयोरन्योन्यसौहार्दात् बलवत्वं अन्यस्य त्वल्पबलत्वमेवेत्याह सत्वसंभवमिति ॥ तु शब्देन व्यावृत्तिर्द्योत्यते । एषां जनकः पुरुषः किं करोतीत्यत्राह जनक इति । मध्यस्थस्साधारणस्वभावो यस्य स तथा । अद्य यावत् एतत्क्षणावधि । ज्ञातिवादिनः व्यक्तिषु ज्ञातिर्नाम काचिदस्तीति वदन्तः त इव स्वभंगं स्वनाशमप्यनुमन्यमाना अभ्युपयन्तः ईहन्ते इच्छन्ति । इच्छामात्रमेव न तत्फलसिद्धिरित्यभिप्रायः । महाप्रस्थानं महाप्रयाणं देहत्याग इत्यर्थः तेन आवर्तः आवृत्तिः आवर्तो अस्यास्तीत्यावृत्तौ पुनरावर्तो न भवतीत्यपुनरावर्तो तं कर्तुं आरभन्ते । एवं स्वकुलध्वंसं केवा कुर्वन्तीत्यत आह ॥

तथेति—॥ प्रकृतिस्स्वभावः । मर्कट प्रकृतिः रक्षःप्रकृतिश्च सुग्रीव विभीषणाविर्त्यर्थः । स्वकुलोत्सादनात् महापातकिनावित्युच्यते प्रमाणयन्ति प्रमाणीकुर्वन्ति कावा दुर्दशेत्यत आहायं खल्विति ॥

जात्यन्धः परदोषदृष्टिषु परीवादेषु मूकाग्रणीः
बाधिर्यप्रथमावतारसरणिर्निन्दासमाकर्णने ।
क्लीबप्रायः परदारसङ्ग्रहविधौ तद्वत्परावर्जने
संपद्येत समीक्षणेऽपि विकलः पापैर्विवेकादिभिः ॥४८॥

अत एवास्माभिरपि परित्यक्तसौभ्रात्रैः तेऽपि दुरात्मानो जिघांसन्ते । ततः प्रवृत्तिनिवृत्तिपद्धती समाश्रित्य वयं च तेन संयतिष्यामहे । तदा तु सत्त्वप्रधानं कुलं ज्योतिरिङ्गणज्योतिरिव द्युमणिकिरणैरस्माभिरभिभूयते ।

सौहार्दमित्थमनवाप्य सहोदराणा-
मासीत् स्वमूलगुणभेदवशाद्विरोधः ।
एकप्रजापतिभुवामपि वैरबन्धः
स्वात्मावधिः स्वयमुदेति सुरासुराणाम् ॥ ४९ ॥

रतिः—*संतं पाअं संतं पाअं पुत्ता एव्व पितुणोभाअं विणासंति तह कहं सो अरा एव्व इअरे अरविंधं सणालं पडहि अआ होंति णाह किं णहोज्ज ताणं तुम्हाणंवि समरदुद्दसा णिव रण.साहणं संधि ।

* शान्तं पापं शान्तं पापं पुत्रा एव पितुर्भागं विनाशयन्ति तथा कथं सोदरा एव इतरेतरविध्वंसनलंपटहृदया भवन्ति नाथ किंन भवेत्तेषां युष्माकमपि समरदुर्दशानिवारणसाधनं सन्धिः

जातीति—॥ परेषां ये दोषाः तेषां दृष्टिषु दर्शनेषु जात्यन्धः जातिर्जन्म तस्मिन्नन्धः जायमानदशायामेवान्धः । अनेन परदोषदर्शनमस्य न कदाचित्संभवतीति द्योत्यते । परिवादाः परदोषकथनानि तेषु मूकानामग्रणीः श्रेष्ठः । निन्दानां परदूषणानां समाकर्णने बाधिर्यं बधिरत्वं तस्य प्रथमावतारः प्रथमप्रवेशः तस्य सरणिर्मार्गः । परेषां दाराः परदाराः तेषां संगमविधौ संभोगक्रियायां क्लीबप्रायः क्लीबतुल्यः परेषामावर्जने वशीकारे तद्वत् क्लीबवत् असमर्थः इत्यर्थः । समीक्षणे समीचीने सम्यग्विचारे विकलः विवेचनापयोगिज्ञानशून्यः संपद्येत स्यात् ॥ ४८ ॥

अत एव पितृद्रोहादेव जिघांसन्ते हन्तुमिष्टा भवन्ति प्रवृत्तिनिवृत्तिपद्धती प्रवृत्तिनिवृत्तिरूपमार्गौ प्रवृत्तिनिवृत्तिधर्मावित्यर्थः । ज्योतिरिंगणस्य खद्योतस्य ज्योतिः तेज इव द्युमणिस्सूर्यस्तस्य किरणैः ।

अहो कथं भ्रातर एव परस्परं जिघांसन्तीत्यत्राह ।

सौहार्दमिति—॥ स्वमूलभूतानां गुणानां सत्वादीनां भेदवशादित्थं विरोध आसीत् । एवं कुत्र दृष्टमित्यत्राह एकेति—॥ अत्र प्रजापतिः काश्यपः स्वात्मावधिः यावदात्मभावीत्यर्थः ॥ ४९ ॥

काम:—मुग्धे कथञ्चिदपि नात्र सन्धिस्संभाव्यते ।

स्वतस्सत्वविहीनानां सत्तयैवापराध्यतः ।
कथङ्कारं प्रतीकारः कल्पकोटिशतैरपि ॥ ५० ॥

प्रतिपुरुषविभक्तमूर्तिभेदा
वयमितरे च मिथः प्रतीपवृत्ताः ।
क्वचिदधिकरणे समापतन्तः
सुतनु दधीमहि वध्यघातकत्वम् ॥ ५१ ॥

नखल्वर्थकामपराणामस्माकं नारायणपरायणैः कथायामपि सङ्गतिरुपपद्यते । किञ्च यथा कथञ्चिदुपपद्यमानमपि अखण्ड वैरिखण्डन पण्डितो महामोहः कथञ्चिदपि सन्धिमनुमन्यते । अहं वा कथमसहायवीरस्तमनुमन्ये न खलु क्षुधितोऽपि शार्दूलः कदाचिदपि शाद्वलमत्ति-

---

एतदाकर्णनेन मञ्जातखेदा रतिरेषां सन्धिर्भवेदिति पृच्छति । शान्तं पापं एवंविधाविरोधहेतुभूतं पापं शान्तं भवत्विति शेषः । आदराद्वीप्सा ।

स्वत इति—॥ स्वतः स्वभावात् सत्वविहीनानां सत्तयैवापराध्यतः सत्भावेनैवापराधं कुर्वतो वर्त्तमानस्य कल्पानां ब्रह्मदिनानां कोटिशतैरपि प्रतीकारः प्रतिक्रिया कथंकारं कथं वा कर्तुं शक्यः ।

स्वतो दुर्बलाविवेकादयः स्वसत्तयैव पीडाकरस्यास्मत्प्रभृतस्य कथमपि न प्रतीकारं कर्तुं शक्नुयुरितिभावः ॥ ५० ॥

विरुद्धानामस्माकमेकाधिकरणत्वं हन्तृहन्तव्यताहेतुरित्याह ॥

प्रतिपुरुषेति—॥ प्रतिपुरुषं तत्तत्पुरुषेषु विभक्तानियता मूर्त्तिभेदाश्शरीरविशेषा येषां ते तथोक्ताः वयं मोहप्रभृतयः इतरे विवेकादयश्च क्वचिदधिकरणेएकस्मिन्पुरुषरूपे स्थाने समापतन्तः सम्मिलिताः मिथः प्रतीपं विरुद्धं वृत्तं व्यापारो येषां ते तथा तादृशास्सन्तः वध्यघातकत्वं वध्यत्वं घातकत्वं च दधीमहि दध्महे ॥ ५१ ।

अद्यप्रभृति ये लोका यूयं यूयं वयं वयं ।
अर्थकामपरा यूयं नारायणपरा वयं ॥
नास्ति संगतिरस्माकं युष्माकं च परस्परं ।
वयन्तु किंकरा विष्णोर्यूयमिन्द्रियकिंकराः ॥

इत्युक्तरीत्या च तेषामस्माकं च संगतिर्न सम्भवतीत्याह । न खल्विति—कथायामपि स्वैरप्रसङ्गेपीत्यर्थः ।

रतिः-*कोउण तेहिं कुलं घेहिं महाबलाणं तुम्हाणं वि उंमूलणे उवाओ संमंतिओ

कामः-अयि भीरु अनुद्घाटनीयमिदं राजरहस्यं विशेषतः स्त्रीषु

रतिः-†[हस्तं संगृह्य] अय्यउत्त साविओसि मए पिअसहेण वसंतेण अ सच्चं विअरिज्जउ राअरहस्सं

वसन्तः-[स्वगतं] किमत्र विवरणीयं दुष्परिहारः खलु अनिर्धारितकालो नियतिविपर्यासः [प्रकाशं] सखे मकरध्वज ।

मनोरथसमर्थानां महामोहविरोधिनाम् ।
मन्त्रभेदनमस्माभिः कार्यं तत्परिपन्थिभिः ॥ ५२ ॥

कामः-प्रिये कथयामि तर्हि । अस्ति खलु अनभिज्ञकुलसार्वभौमविवेकमूलाकर्तृत्वाभिमानादिनानाविधविषमदृष्टिसहकृतः कश्चिदस्मत्कुलाभिचारकाङ्क्षिभिः उपनिषद्दूषर्निष्ठैः कैश्चिद्विष्टुरैः अनुष्ठीयमानो निवृत्तिसंज्ञको धर्मः । यश्चिष्ठस्य पुरुषस्य परदोषदर्शनादिष्वन्धबधिरपङ्गुमूकादिवदत्यन्तमप्रसन्नावस्थानमाकलयंते । तेन च निवृत्तिक्रियेण केनचिद्व्यपदेशेन पुरुषमाविशता बुद्धिस्सङ्क्रंस्यते । तस्मात् किल तत्सङ्गमादस्मत्कुलप्रद्वेषदूषितहृदया प्रशान्तमधुरवेषप्रच्छन्नाभवरसभोगभैरवी परमाध्यपरपर्याया ब्रह्मराक्षसी प्रादुर्भविष्यति । तथा हि

* कः पुनस्तैः कुलघ्नैः महाबलानां युष्माकमुन्मूलने उपायस्संमन्त्रितः ।
† आर्यपुत्र श्रावितोऽसि मया प्रियसखेन वसन्तेन च सत्यं विव्रियतां राजरहस्यम्

महामोहस्वभावादपि मन्त्रिर्न भवेदित्याह । यथा **कथञ्चिदपीति** । यथा कथञ्चिदपीत्यनेन विवेकादीनां शरणागतत्वेऽपि महामोहस्तन्धिमानुमन्यतेति सूच्यते ममापि अनभिमत इत्याह **अहं चेति** । कुतस्तवानुमतिरित्यत्राह **न खल्विति** ॥

युष्मज्जये क उपायस्तैस्संमन्त्रित इति पृच्छति । राजकुलं राजगृहं ।

नियतेः दैवस्य विपर्यासः अन्यथाभावः अनिर्धारितः अनिश्चितः कालो यस्य तथा

मनोरथेति-॥ मनोरथमात्रे समर्थानां न तु कृत्ये महामोहविरोधिनां विवेकादीनाम् ॥ २५ ॥

अनभिज्ञानां सार्वभौमो यो विवेकः तन्मूलाकर्तृत्वाभिमानादिशब्देन फला मतृस्य ग्रहणं । नानाविधा च या विषमदृष्टिस्तया सहकृतः । उपनिषदोक्तसत्वं

गुणत्रेतोन्मेषक्रमपरिणतानन्तविकृतिः
क्वचित्काले बुद्धिः कुलयुगलकूटस्थगृहिणी ।
अतिक्रूरात्यन्तप्रलयविधिदुर्मन्त्रपरुषां
पुरा भीमाकारां सृजति परभक्तिं परवती ॥ ५३ ॥

ततश्च ।

प्रव्रज्यादियुता परत्रपुरुषे पातिव्रतीं बिभ्रती
भक्तिस्सा प्रतिरुद्धसर्वकरणा घोरन्तपस्तप्स्यते ।
तुष्टा तेन जनार्दनस्य करुणा कुर्वीत तत्किङ्करं
कञ्चित्कैटभकोटिकल्पमसुरं.....................
(इत्यर्धोक्ते लज्जया विरमति)

स्वमनीषया कल्पितत्वं । निष्ठुरैरिति तेषामकामहतत्वं व्यज्यते संगंस्यते संगता भविष्यति । भीमरथीत्वं भयहेतुत्वात् तदुक्तं । सप्तत्यासप्तमे वर्षे सप्तमे मासि सप्तमे । रात्रौ भीमरथीनाम सर्वप्राणिभयंकरीति ।

गुणेति—॥ गुणानां सत्वादीनां त्रैतात्रिकं तस्य उन्मेषस्य प्रोल्बणस्य क्रमेण परिणता जाता अनन्ता च विकृतिर्यस्यास्सा तथोक्ता सत्वादीनां क्रमेणोन्मेषः एकैकस्योन्मेषे इतरयोरभिभवश्च नियतः यथोक्तं ।

रजस्तमश्चाभिभूयसत्वं भवति भारत ।
रजस्सत्वं तमश्चैव तमस्सत्वं रजस्तथा ॥ इति ।

परवती परतन्त्रा कुलयोः विवेकमहामोहकुलयोः युगलं युगं तस्य कूटस्थस्य कारणभूतस्य जीवस्य गृहिणी बुद्धिः अतिशयेन क्रूरः अतिक्रूरः अन्तमतिक्रान्तोत्यन्तश्च यः प्रलयः तस्य विधिः विधानं तस्मिन् दुर्मन्त्रेण दुष्टमन्त्रेण दुरालोचनया परुषां घोरां भीमः भयंकरः आकारो यस्यास्तां परभक्तिं पुरा सृजति स्रक्ष्यति । यावत्पुरा निपातयोर्लडिति विधानात् ॥ ५३ ॥

ततश्च पश्च क्षेत्यर्थः ।

प्रव्रज्येति—॥ प्रव्रज्या वैराग्यं आदिशब्देन शान्त्यादयो गृह्यन्ते परत्र परस्मिन् पुरुषे । भगवति पातिव्रतीं पातिव्रत्यं बिभ्रती दधाना सा भक्तिः प्रतिरुद्धानि स्वस्वविषयेभ्यो निवर्त्तितानि सर्वाणि करणानि इन्द्रियाणि यस्यास्सा तथोक्ता सती घोरं तीव्रं तपः नियमं तप्स्यते चरिष्यति । तेन तपसा तुष्टा जनार्दनस्य करुणा कैटभानां कोटिः कैटभकोटिः तत्कल्पं कश्चिदसुरं तत् किंकरं तस्याः भक्तेः किंकरं दासं कुर्वीत कुर्यात् । असुरं इत्यन्तं कामं उक्त्वा विरराम । उक्तं उक्तिः । अर्धोक्ते अर्धोक्तावित्यर्थः

सो असुर क इति अपेक्षायां वसन्तस्सखनु सङ्कल्पसूर्योदय इति मनसि विचार्य कामाभिप्रायेण निर्मूलनस्यैव न इति निश्चित्य प्रकाशमन्यथा पूरयति—शेषमिति ॥

वसन्तः–(स्वगतं) स खलु सङ्कल्पसूर्योदयः निर्मूलनस्त्वेव न इति शेषः अन्यथा तु पूरयामि ।

(प्रकाशं) शेषं पुनर्दुर्वचम् ॥ ५४ ॥

रतिः–(सभयसंभ्रमं) * णाह परिरक्ख परिरक्ख ।

(इति भर्तारमाश्लिष्यति ।)

कामः–(गाढमुपगुह्य) अभुक्तपूर्वमिव निर्वेशं नाटयन् ।

(आत्मगतं)

जनितवलयभङ्गे दत्तहारावमर्दे
मुषितनिखिलखेदे मोहसन्तोषहेतौ ।
सचकितपरिरम्भे साम्प्रतं कातराक्ष्या-
स्त्यजति युगलचिन्तामङ्गयोरन्तरात्मा ॥ ५५ ॥

(प्रकाशं)

सखिमहामोहसैनिकधुरन्धरस्य मम प्रेयसी सती मा भैषीः । समाश्वसिहि समाश्वसिहि । इदं खल्वैन्द्रजालिकनगरनिगरणप्रायमनिपुणनैगमिकरथ्यापुरुषनिर्मितं किमप्यैतिह्यम् ।

तथा हि

कुवृत्तमिति कौक्कुटं व्रतमधिक्षिपद्भिस्तथा
सुधाकरशतक्रतु प्रभृतिभिः स्वयं चस्खले ।

---

* नाथ परिरक्ष परिरक्ष

दुर्वचं वक्तुमनर्हमित्यर्थः ॥ ५४ ॥

एतद्वच श्रवणादृतेर्भयसंभ्रमौ जातौ । निर्वेशः सुखानुभवः ।

जनितेति– जनितः वलयानां भंगो यस्मिन् दत्तः हारस्यावमर्दः विच्छेदो येन तस्मिन् मुषिताः प्रणाशिताः निखिलाः खेदा येन तस्मिन् कातराक्ष्यास्सचकिते सभये परिरंभे अन्तरात्मा मनः अंगयोः युगलचिन्तां युगलताज्ञानं त्यजति ॥ ५५ ॥

तत्समाश्वासायाह इदमिति ।

ऐन्द्रजालमिन्द्रजालसंबन्धि यन्नगरनिगरणं तत् प्रायं अनिपुणाः नैगमिकाः पौराः रथ्या पुरुषाः रथ्यायां चरन्तः पुरुषाः तैर्निर्मितं । अनेन समर्थान्तरंगपुरुषनिर्मितत्वं नास्तीति तदसत्यता द्योत्यते । अतो वैराग्यमसुलभमित्याह ।

कुवृत्तमिति– कौक्कुटं व्रतं कुक्कुटसंबन्धिव्रतं स्त्रियमाक्रम्य भुक्तिरूपं कुवृत्तं कुत्सितं शास्त्रनिषिद्धं वृत्तं व्यापार इति अधिक्षिपद्भिः निरस्यद्भिः सुधाकर शतक्रतु-प्रभृतिभिः तदादिभिः । आदिशब्देन पराशरादयो गृह्यन्ते । स्वयं चस्खले स्खलितं ।

नदद्भ्रमरपङ्क्तिकेनमतिकार्मुके मामके
विरक्ति गृहदेहलीं क इह दोहली वीक्षते ॥ ५६ ॥

तिष्ठन्तु च महाबला मन्त्रिवर्गाः ।

प्रमादालस्यनिद्रादिविविधव्यूहविग्रहः ।
प्रज्ञावरणघोरात्मा मोहः केन विजेष्यते ॥ ५७ ॥

रतिः—(स्वगतं) * विहिवसेण विवरीअं फणिअं अं अउत्तेण (प्रकाशं) होज्ज-

मङ्गलं महाराअस्स

वसन्तः—अयि मन्मथपत्नि माऽस्मभैषी
ननु मोहादिषु संस्थितेषु सत्सु ।
प्रकृतिं पुरुषः प्रपित्समानः
प्रतिपद्येत विरक्तितो विमुक्तिम् ॥ ५८ ॥

रतिः—(आत्मगतं) † आः वसंत भासिअं वि विवरीअं वि अदीसइ

* विधिवशेन विपरीतं फणितमार्यपुत्रेण भूयात् मङ्गलं महाराजस्य

† आः वसन्तभाषितमपि विपरीतमिव दृश्यते

साराहल्यादिसंभोगेषु तेषां बलात्कारेण प्रवृत्तेः । नदन्ती भ्रमरपंक्तिर्यस्मिन्तस्मिन् मामके कार्मुके नमति सति दोहली कौतुकी कलवको वा विरक्तेर्गृहस्य देहलीं वीक्षते नकोऽपि पश्यतीत्यर्थः ॥ ५६ ॥

महामोहोऽपि स्वतोदुर्जय इत्याह ।

प्रमादेति— प्रमादः अनवधानं आलस्यं कर्मण्यपाटवं निद्रा बाह्येन्द्रियव्यापारोपरमः आदि शब्देन मूर्च्छा गृह्यते प्रमादादयो विविधा व्यूहविग्रहा यस्य स तथा । प्रज्ञाया आवरणमावृतिः तदेवघोर आत्मा स्वरूपं यस्य स तथा एवंरूपो मोहः केन विजेष्यते न केनापीत्यर्थः । अत्र केनापि पुरुषेण विजिष्येतइति ध्वनिः ॥ ५७ ॥

विरुद्धार्थकामवाक्यश्रवणेन भीता सत्येव रतिरियं वदतीति मत्वा तत्भयमपनेतुं वसन्त आह ।

अयीति—माऽस्मभैषीः माबिभीहि मोहादिषु संस्थितेषु सम्यक् स्थितेषु जीवत्सु सत्सु प्रकृतिं प्रपित्समानः प्राप्तुकामः पुरुषः विरक्तितः वैराग्याद्धेतोः विमुक्तिं प्रतिपद्येत ननु काकुः न प्रतिपद्येतेत्यर्थः ॥ ५८ ॥

वसन्तभाषितमित्यादि तत्रापि मोहादिषु संस्थितेषु मतेषु सत्स्विति प्रतीतेः पुनः एच्छति आर्येत्यादि ।

(प्रकाशं)

* अं अ उंत किं विवेअस्स णत्थि विवेओ अमच्चाणं वा तस्स समदम पमुहाणं पुरुसे खु पअदिं मोत्तूण गए अम्हाणं ताणं वि अ विसेस सुलहं अवसाणं

कामः—एवमेतत् अस्मदुन्मेषमसहमानाः पुनरेते पापाः प्रज्ञाचक्षुषि क्वचित् पुरुषे साक्षिणि कुलद्वयमूलकूलङ्कषासु कुहनासु गहनमीहन्ते, सर्वथामूढचेतसश्चैते मोघकर्माणो भविष्यन्ति । यतः ।

प्रसुप्तानपि युद्धेन सुग्रीवसुभटानिव ।
कर्मशक्तिरनुच्छेद्या पुनरुद्बोधयिष्यति ॥ ५९ ॥

(नेपथ्ये)

कोऽसौ विपर्यस्तदृष्टिरनुपरतैकनियतकौतुकानस्मानेव पापान् प्रलपति । रेरे दुर्विनीतदुराचारनिष्पन्दनिर्गलितकूटस्थानां नृशंसवृत्तीनां वः प्रतिक्षेपे पुरुषस्य निरस्तनिखिलदुःखनिरतिशयानन्दप्रापणे तदापि तद्बुद्ध्यनुप्रवेशेन स्वकुलसंजीवने च दनुजमथनदयाधीनवृत्तयो वयं प्रवर्तामहे अस्ति चौपनिषदोऽयमुद्घोषः ।

---

* आर्यपुत्र किं विवेकस्य नास्ति विवेकः अमात्यानां वा तस्य शमदमप्रमुखाणां पुरुषे खलु प्रकृतिं मुक्त्वागते अस्माकं तेषामपि अविशेष सुलभमवसानम्

अविशेषसुलभमवसानं आश्रयाभावादिति भावः । प्रज्ञानं चक्षुर्यस्य स तथा । अन्ध इति च । साक्षिणि साक्षाद्द्रष्टरि क्वचित्स्थिते सतीति शेषः । कुलद्वयस्य कूलंकषासु छन्नोष्वित्यर्थः कुहनासु मायासु तद्विषये गहनं गूढं यथा भवति तथा । अन्ध इव पुरुषे चेष्टमाने अस्मदुन्मेषासहतया कुलद्वयघातिनीं मायामतिनिगूढमिच्छन्तीति भावः । मोघकर्माणो भविष्यन्तीत्युक्तं । तत्कथमित्यपेक्षायामाह **यत** इति ।

युद्धेन प्रसुप्तानपि मोहादीनिति शेषः सुग्रीवस्य सुभटान् ऋक्षवानरादीनिव अनुच्छेद्या प्रतिघातानर्हा कर्मशक्तिः कर्मणां पुण्यपापरूपाणां शक्तिः फलप्रदानसामर्थ्यं पुनरुद्बोधयिष्यति । कदाचिद्विनष्टा अपि मोहादयः कर्मशक्त्या पुनर्जीयन्त एवेति भावः ॥ ५९ ॥

एतत्कामवचनमाकर्ण्यानन्तरं प्रवेष्टुकामो विवेकः क्रोधादाह **कोऽसाविति** ॥

विपर्यस्ताविपरीता दृष्टिः यस्य स तथा । तदेवाह अनुपरतेति निष्पन्दं निश्चलं यथा भवति तथा निर्गलितः कूटस्थो यैस्तेषां । निरस्तनिखिलदुःखो यो निरतिशयानन्दःतत्प्रापणे तदाविमुक्तिदशायामपि तस्य पुरुषस्य बुद्ध्यनुप्रवेशेन स्वकुलसञ्जीवने स्वकुलस्य संजीवने च दयाधीनाः वृत्तयो व्यापारा येषां ते तथोक्ताः । दनुजमथनदयाधीनवृत्तित्वमुपनिषत्सिद्धमित्याह । **अस्ति चेति** । तमेवोद्घोषमाह ।

स्वाधीनसंसरणनाट्यनिरूढवृत्तेः
सन्तोषितः प्रणतभूमिकयास्य पुंसः ।
स्थाने विधास्यति विभुस्स्थिरचिह्नभेदं
क्रीडानटस्य भगवान् कृपया स्वसाम्यं ॥ ६० ॥

ततश्च ।

रिपुमथनकृतं यशो महीयः
पितृपरिरक्षणसंभृतश्च धर्मः ।
अभिमतघटनोद्भवश्च हर्ष
स्सपदि विधास्यति सन्निधिं स्वयन्नः ॥ ६१ ॥

कामः—(सभयावहित्थमवलोक्य) प्रिये मोहपरिपन्थिपक्षे मूर्धाभिषिक्तः स्वयमसौ स्वसहधर्मचारिण्या सुमत्या सहाभ्यमित्रीण उपसर्पति । अयं हि

मुकुलयति विवित्सां मोहविध्वंसमिच्छन्
विमृशति निगमान्तान् वीक्षते मोक्षधर्मान् ।

स्वाधीनेति—स्वशब्दो भगवत्परः। संसरणस्य भगवदधीनत्वं । एष एवासाधु कर्म कारयति। त यमधोनिं निनीषतीति श्रुतं । संसरणमेव नाट्यं तस्मिन् निरूढा स्थिरा वृत्तिर्यस्य तस्य । प्रणताः प्रपन्नाः तेषां भूमिकया वेषेण सन्तोषितः । विभुः स्थिरः चिह्नानां भेदो यस्मिन् तत् । स्वसाम्यं भोगमात्रे साम्यं स्थाने स्वासाधारणे स्थानविशेषे विधास्यति करिष्यति । स्थिरचिह्नभेदमित्यत्र शेषित्वलक्ष्मीपतित्व जगद्व्यापारादिचिह्ने शब्दार्थः ॥ ६० ॥

ततश्च हेतोः ।

रिपुमथनेति— रिपूणां मथनेन कृतं कल्पितं महीयः श्लाघ्यं यशः पितुः परिरक्षणेन संभृतः पूर्णः धर्मश्च अभिमतघटनायाः उद्भवः उत्पत्तिर्यस्य स तथा हर्षश्च सन्निधिं सान्निध्यं विधास्यति ॥ ६१ ॥

विवेकदर्शनाद्भयं स्वीसन्निधौ तदनुचितमित्यवहित्या ताभ्यां सहितं यथा भवति तथावलोक्य अभ्यमित्रीणः अमित्राभिमुखः ।

मुकुलयतीति— विवित्सां वित्तेच्छां विख्यातिलाभपूजेच्छां वा मुकुलयति नाशयतीत्यर्थः । मोहविध्वंसमिच्छन्निगमान्तान्विमृशति । तदर्थान् विचारयति ।

निशमयति च गीतामित्थमेकान्तभक्त्या
गुणपरिषदवेक्षी गुप्तमन्त्रो विवेकः ॥ ६२ ॥

अपि च

प्रत्यङ्मुखीं सुमतिदीप्तिमिह प्रचिन्वन्
प्राप्तोदयोऽप्यमितरागबलाभिभूतः ।
क्षाम्यन्नहङ्कृतिमयीमवशोऽहिमानीं
भास्वानसौ भजति विष्णुपदं विवेकः ॥ ६३ ॥

तत्सांप्रतमस्माभिरप्राप्तसमयैरसहायैश्चारातिसंनिधावात्मानं प्रकाशयितुमिति समित्रकलत्रो निष्क्रान्तः ॥

॥ मिश्रविष्कम्भः ॥

मोक्षधर्मान्मोक्षैकान्तान् धर्मान्वीक्षते। तत्प्रतिपादकान् ग्रन्थान् परिचिनोति एकान्तभक्त्या अनन्यभक्त्या गुणाः शमदमादयः तेषां परिषत् उपचयः तदवेक्षी तस्यामेव दत्तदृष्टिः ॥ ६२ ॥

अथास्य विवेकस्य सूर्यसाम्यं वर्णयति ।

प्रत्यङ्मुखीति–प्रत्यङ्मुखीमात्मविषयां पश्चिमाशाभिमुखींवा सुमतिः शोभनामतिरेवदीप्तिः तां इह लोके प्रचिन्वन् विस्तारयन् प्राप्तः उदयः अभ्युदयो येन स तथा प्राप्ताविर्भावश्च तथापि अमितो यो रागः पुरुषमोक्षणाभिलाषः अरुणिमा च तद्बलेनाभिभूतः प्राप्ताभ्युदयस्य परैरभिभवो न संभवतीति विरोध सूचकोऽपि शब्दः । अपेस्समुच्चयार्थत्वाद्विरोधस्याभासत्वं । अहंकृतिरहंकारः देहात्माभिमानः तन्मयीं हिमानीं क्षाम्यन् नाशयन्नित्यर्थः अवशः भगवत्परतन्त्रः भास्वान् दीप्तिमान् सूर्यश्च विवेकः विष्णुपदं हरिचरणं नभश्च विशति भजते प्रविशति च । पवन तपनादीनां भगवदधीनत्वं । भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति । श्रुतं ॥ ६३ ॥

अप्राप्तः समयः स्वोचितकालो यैस्तैरस्माभिः । मित्रं वसन्तः । मिश्रसंकीर्ण शुद्धसंकीर्णभेदाद्द्विविधोविष्कम्भः । तदुक्तं । एकानेककृतश्शुद्धस्संकीर्णो नीचमध्यमैरिति । एकानेकैर्वा मध्यमपात्रैः कृतश्शुद्धः । नीचमध्यपात्रैः कृतस्संकीर्ण इत्यर्थः ।

ततः प्रविशति राजा सुमतिश्च ।

राजा–(सविमर्शं) प्रिये समाकर्णितस्त्वया अनवधिकदुरितविषवनमूलभूतस्यामन्ददर्पस्य कन्दर्पवटोराटोपः, यदसावशेषपापनिष्कृतौ प्रवर्तमाना नस्मानेव पापारोपेण परिवदति । अथवा

पश्यति परेषु दोषा
नसतोपि जनस्सतोपि नैव गुणान् ।
विपरीतमिदं स्वस्मिन्
महिमा मोहाञ्जनस्यैषः ॥ ६४ ॥

सुमतिः–* अं अ उंत विरूपा खु जणाणि अ मुहदोसं णिम्मले सुविदंपणेसु-समंपंति

राजा–देवि सत्यमेतत् यथार्थदर्शिनी यथा दृष्टार्थवादिनीच भवती

* आर्यपुत्र विरूपाः खलु जनाः निजमुखदोषं निर्मलेष्वपि दर्पणेषु समर्पयन्ति

अर्थांकः तत इत्यादि । सच

प्रत्यक्षनेत्रचरितो बिन्दुव्याप्तिपुरस्कृतः ।
अंको नानाप्रधानार्थसंविधानरसाश्रयः ॥

इत्युक्तलक्षणः ।

राजा विवेकः तस्यैवात्र नायकत्वात् । नायकलक्षणं ।

अभिगम्यगुणोपेतो धीरोदात्तः प्रतापवान् ।
कीर्त्तिकामो महोत्साहस्त्रय्यास्त्राता महीपतिः ॥

इत्युक्तं ।

कन्दर्प एव पटुः बालः तस्याटोपः गर्वः । परिवदति निन्दति । एवमन्यथा ज्ञानस्य परिवादस्य चाभिमानमूलकत्वं प्रतिपाद्याथ मोहहेतुकत्वमाह अथवेति ।

जनः परेष्वसतोपि दोषान् पश्यति । सतोपि नैव गुणान् पश्यति । स्वस्मिन्नात्मनि इदं विपरीतं सतोपि दोषान्न पश्यति असतोपि गुणान्पश्यति इति यत् । एष मोहाञ्जनस्य महिमा ॥ ६४ ॥

यथार्थे अर्थातिक्रमो न यस्मिन् कर्मणि तद्यथा भवति तथा पश्यतीति यथार्थदर्शिनी । दृष्टार्थमनतिक्रम्य वदतीति यथा दृष्टार्थवादिनी ।

किं च ।

निर्धूतनिखिलदोषा
निरवधिपुरुषार्थलम्भनप्रवणा ।
सत्कविफणितिरिवत्वं
सगुणालङ्कारभावरसजुष्टा ॥ ६५ ॥

(विचिन्त्य) प्रिये हन्त निर्विकारपुरुषपीडया क्रीडन्त एते कामक्रोधलोभादयस्सुपन्थानमास्थिताः, वयं पुनस्तमेव निश्रेयसे नियोजयितुं समस्तजनसां सिद्धिकसुहृदो भगवतस्तापत्रयाभिहतसर्वजनसञ्जीवनीं दयादृष्टिमावहन्तः कदध्वनाप्रवृत्ताः । अहो महानयमुन्मत्तालापः पश्य मे त्वया सह निर्वर्तनीयं परानुग्रहव्रतम् ।

महत्यारम्भेस्मिन्मधुरिपुदयासंभृतधृति-
र्बहिष्कृत्यारातीन्सुमुखिबहिरन्तश्च भवतः ।
समाधावाधाय क्षपितवृजिनं क्षेत्रिणमहं
परप्राप्त्याधन्यं परिणमयितुं प्राप्तनियमः ॥ ६६ ॥

निर्धूतेति– लंभनं लाभः तत्प्रवणा । सगुणा गुणसहिता गुणाः ओजः प्रसादादयः सौन्दर्यादयश्च अलंकाराः उपमादयः हारकेयूरादयश्च भावाः अभिप्रायाः विलासाश्च रसाः शृंगारादयः प्रीतयश्च तैः जुष्टा अतः सत्कविफणितिरिव ॥ ६५ ॥

पुनश्च तदुक्तमेव विचिन्त्याह प्रिये इति ।

हन्तेति खेदे । पुरुषस्य निर्विकारत्वं बाल्ययौवनादिविकारराहित्यं । सर्वेषां जनानां सांसिद्धिकसुहृदः सम्यक् फलसिद्धिहेतुभूतसुहृद आवहन्तः आकर्षन्तः संपादयन्त इत्यर्थः । कदध्वना कुत्सितमार्गेण । परानुग्रहे व्रतं नियमं ।

महतीति–महति आरंभस्य महत्त्वं । कार्यद्वारा । अस्मिन् आरंभे मधुरिपोः दयया संभृता संपूर्णा धृति धैर्यं यस्य स तथोक्तः । मधुरिपुशब्देनास्य विरोधिनिरासकत्वं तद्वारास्य प्रत्यूहप्रशमश्च सूच्यते । बहिरन्तश्च भवतः मलयानिलकोकिलादयो बहिर्भवन्तः मोहरागद्वेषादयोन्तर्भवन्तः तानुभयविधानरातीन् बहिष्कृत्य विजित्य क्षपितं नाशितं वृजिनं पापं यस्य तं क्षेत्रिणं पुरुषं परस्य परमपुरुषस्य प्राप्त्याधन्यं परिणमयितुं धन्यतया कर्तुं प्राप्तनियमः अनेनारंभाख्या कार्यावस्था प्रतिपादिता । तदुक्तं ।
औत्सुक्यमात्रमारम्भः फललाभायभूयसे । इति ॥ ६६ ॥

सुमतिः—* अंत्र उंत कहंसो णिच णिम्मल महाणंद सअं पहो सव्वजण दंसण जोग सहावो पुरुसो महामोहेण माण मअ मच्छर प्पमुहे हिंवि दुव्विणी एहिं दुव्वार गव्व संकुल दुरिअ महोम्मि संघाअ संघट्टण भीसणे दुःख साअरंमि णिक्खित्तो ।

राजा—प्रिये सूक्ष्मदर्शिनि किंदृष्टमपह्नोतव्यं आगमिकं वा नप्रत्येतव्यं । पश्यतु भवती ।

स्वतः प्राप्तं रूपं यदिह किल भावेषु तदपि
त्यजन्तस्ते दृष्टा नियतिघटितोपाधिवशतः ।
प्रकृत्या तिष्ठन्ति ह्युपधिविगमे ते च तदसा
वनादिस्संसारः पुरुषमुपरुन्धे गलति च ॥ ६७ ॥

सुमतिः—† एवं एदं, तहविकहं एआवंतं कालं परमकारुणिएण देवेण लच्छीवल्लहेण दुस्सह दुःख सअ धूमिओ पुरुसो उपेक्खिओ ।

---

* आर्यपुत्र कथं सनित्यनिर्मलमहानन्दस्स्वयंप्रभस्सर्वजनदर्शनयोग्यस्वभावः पुरुषः महामोहेन मानमदमत्सरप्रमुखैरपि दुर्विनीतैः दुर्वारगर्वसंकुलदुरितमहोर्मिसंघातसंघट्टनभीषणे दुःखसागरे निक्षिप्तः ।

† एवमेतत्तथापि कथं एतावन्तं कालं परमकारुणिकेन देवेन लक्ष्मीवल्लभेन दुस्सहदुःखशतधूमितः पुरुष उपेक्षितः ।

सूक्ष्मानर्थान्पश्यतीति सूक्ष्मदर्शिनी तत्र संबुद्धिः । दृष्टं प्रत्यक्षसिद्धं अपह्नोतव्यं नास्तीति प्रतिक्षेप्तव्यं किं न प्रतिक्षेप्तव्यमित्यर्थः । आगमिकं आगमसिद्धं वा वस्तु किंच प्रत्येतव्यं शास्त्रसिद्धं सर्वमस्तीत्येवाधातव्य मित्यर्थः ।

स्वतः प्राप्तमिति—भावेषु पदार्थेषु स्वतः प्राप्तं यत् किल रूपं तत् नियत्या दैवेन घटितः संपादितः यः उपाधिस्तद्वशतः त्यजन्तस्ते भावाः दृष्टाः यथा स्फटिकमणयो जपाकुसुमसान्निध्येन स्वाभाविकं रूपामपहाय शोणिमानं वहन्तो दृश्यन्ते । ते भावाश्च उपधिविगमे उपाध्यपगमे प्रकृत्या स्वस्वरूपेण तिष्ठन्ति तत् उपधेः स्वसंनिधान तदभावाभ्यां स्वसंसृष्टवस्तुषु रूपान्तर निजरूप प्रापकत्वस्वाभाव्यादित्यर्थः । उपधिः उपाधिभूतः असौ संसारः संसारयति सम्यक् सञ्चारयतीति संसारशब्देन प्राचीनं कर्मोच्यते । कर्मणामेवहि सांसारिकसुखदुःखोपभोगहेतुत्वं । यथोक्तं भगवता पराशरेण

अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वदा ॥
संसार तापानखिलानवाप्नोत्यतिसन्ततानिति ।

पुरुषं नित्यनिर्मलमप्युपरुन्धे भगवत्कृपया गलति च ॥ ६७ ॥

राजा—किंच श्रूयते भवत्या, यदनादिनिजकर्मरूपाविद्योपरोधेन क्षेत्रज्ञो यमीश्वरेण क्षिप्तः संसरन्नवसरे तेनैव समुद्ध्रियत इति ।

यथा

मिथः कलहकल्पनाविषमवृत्तिलीलादया
परिग्रहणकौतुकप्रथितपारवश्यः प्रभुः ।
स्वलक्षितसमुद्भमे सुकृतलक्षणे क्वचित्
घुणाक्षतलिपिक्रमादुपनिपातिनः पातिनः ॥ ९८ ॥

अत्र च ।

सुखदुःखवाहिनीनां
व्यत्ययविनिमयनिवर्तनानर्हे ।
नियतक्रमे प्रवाहे
निपतितमुत्क्षिप्य मोदते देवः ॥ ९९ ॥

सुमतिः—* अं अउंत अणाइंमि गए काले अलंधपुंवो मोखो अणंतेवि उव-
रिअण कालंमि केण कहं लहिज इति संकाकलंक कंबुरि अमे-
हिअअं ।

---

* आर्यपुत्र अनादौ गते काले अलब्धपूर्वो मोक्षः अनन्तेप्युपरितनकाले केन क लभ्यत इति शङ्काकलंककर्बुरितं मे हृदयं ।

अयं क्षेत्रज्ञः कर्मरूपाविद्योपरोधेन भगवता निक्षिप्तस्संसरति अवसरे तेनैव समुद्ध्रियत इति यत् तत् किं न श्रूयते भवत्या । उक्तमेवार्थं दर्शयति ।

मिथः इति– मिथः अन्योन्यं कलहकल्पनया विषमा परस्परविरुद्धा वृत्तिर्व्यापारो ययोस्ते विषमवृत्ती लीलादया च तयोः परिग्रहणे कौतुकमिच्छा तेन प्रथितं प्रसिद्धं पारवश्यं पराधीनत्वं यस्य स तथा प्रभुस्स्वामी स्वलक्षितः स्वेन दृष्टः समुद्भमः निष्पत्तिर्यस्य तस्मिन् सुकृतलक्षणे सुकृतरूपे कस्मिंश्चिद्धेतौ यादृच्छिकादौ घुणाक्षतेषु कृमिक्षतरेखासु लिपिक्रमात् लिपिसादृश्यात् क्वचिल्लिपित्वप्राप्तिक्रमादुपनिपातिनः पततः नः अस्मान्पाति रक्षतीति ॥ ९८ ॥

अत्र किमैहिकरक्षणमात्रमित्यत आह ।

सुखेति—सुखदुःख एव वाहिन्यः नद्यः तासां व्यत्ययविनिमयनिवर्तनानर्हे व्यत्ययः विनाशः विनिमयः केन चिद्द्रव्येण द्रव्यान्तरस्याधानं निवर्तनं निरोधः एषामनर्हे नियतः क्रमो यस्य तस्मिन् प्रवाहे अनुभवपारंपर्यां निपतितमुत्क्षिप्य उद्धृत्य देवो मोदते ॥ ९९ ॥

आर्यपुत्रेत्यादिकेन हेतुनेत्यर्थः ।

कथमिति—प्रकारविषयप्रश्नः शंकाकलंकेन शंकारूपकलंकेन कर्बुरितं शबलितं एकरूपं न भवतीत्यर्थः ।

राजा—देवि विवेकवल्लभे अनधिगतप्रमाणतर्कसरणिरिव कथमेवमाशङ्कसे ।

अथवा

कालस्वभावनियतियदृच्छादिषु वस्तुषु ।
कारणं किमिवात्रेति तापसैरपि तर्कितम् ॥७०॥

इदमत्र तावदवधातव्यं ।

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपत्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्तैश्वर्यान्तसंपन्निधिरपि भविता कश्चिदित्थं विपश्चित् ७१

अनधिगता अविदिता प्रमाणानां तर्काणां च सरणिर्मार्गो यया सा तथात्वे कथमेवमाशंकसे ।

अयं भावः । श्रुतिस्मृत्यादिप्रमाणानि चिराय संसरतो जीवस्य क्वचित्काले यादृच्छिकादि सुकृतं भवति परमकारुणिकः सर्वज्ञः स्वावसरं प्रतीक्षमाणस्तदेव व्याजीकृत्य द्वेषादिकमुत्पाद्य सदाचार्यसंपत्त्या हेयोपादेयविवेचनसामर्थ्यं स्वोचितपुरुषार्थानुगुणोपायानुष्ठानं तत्प्रभृतिस्वप्राप्तिरूपपरमपुरुषार्थाभिनिवेशं त्वरां च तीव्रां वर्धयित्वा शरीरान्ते मुक्तिं च प्रापयतीति वदन्ति । तर्काश्च तदनुगुणास्सहस्रशस्सन्तीति त्वयैव शंकितुमपि सांप्रतमित्याशयेनाथवेति ।

काल इति—कालः सर्वेषां वस्तूनामुत्पत्त्यादिहेतुभूतः कलाकाष्ठादिरूपः स्वभावः पुण्यपापात्मकं कर्म नियतिर्दैवं यदृच्छा आकस्मिकविपाकः एतदादिषु इह लोके अत्र मोक्षलाभे तापसास्सर्ववस्तुसाक्षात्काराः तैरपि तर्कितं नतु निर्धारितं ॥ ७० ॥

अथैतदुत्कुकामस्तामवहिततामारचयति । इदमिति । इदं वक्ष्यमाणं ।

कर्मेति । इह जगति प्रतिपुरुषं पुरुषे पुरुषे अनादिश्चित्रश्च प्रवाहो नैरन्तर्यं यस्य तस्मिन् कर्माविद्यादिचक्रे कर्माविद्ये आदी येषां तानि कर्माविद्यादीनि कर्म पुण्यापुण्यरूपं अविद्या अज्ञानं वासना अभ्यासः रुचिरादरः प्रकृत्या संबन्ध इत्येतेषां यच्चक्रं चक्रवत्परिवृत्तिस्तस्मिन् काले विपत्तिः विपाकः सर्वसिद्धान्तेषु सिद्धा अंगीकृता भवतिह्येति प्रसिद्धेः । सकलसिद्धान्तिभिरपि क्वचित्समये मोक्षहेतोरंगीकारादिति भावः । तल्लब्धेति—इत्थं तल्लब्धस्तेन यादृच्छिकसुकृतादिरूपविपाको लब्धस्वावकाशः स्वांगीकार समयो येन स तथा तस्य प्रथमगुरोः भगवतः कृपया गृह्यमाणः । भगवतः प्रथमगुरुत्वं गुरुपरंपरायां प्रथमत्वात्सदाचार्यवंश्यो ज्ञेयः । आचार्याणामसावसावाभगवत्त इति हि श्रूयते । विपश्चिदतिशयितज्ञानः कश्चित्मुक्तैश्वर्यं मुक्तानां यत् भगवदेकानुभवरूपमैश्वर्यं तदन्तः अवधिः यस्यास्सा तथा तस्याः संपदः निधिः निधीयतेस्मिन्निति निधिः स्थानं तत् भोक्तेति यावत् भविता भविष्यति । अनादावप्यतीतकाले भगवत्कृपया अलब्धावकाशतया मुक्त्यभावः कदाचिद्यादृच्छिकसुकृतादिलब्धावकाशतया तत्कृपया मोक्षलाभश्च भवतीति न किंचिद्विरोध इति भावः ॥ ७१ ॥

स च मोह्यमानो मत्सम(?)प्रमादो तावत् ।

दर्पोदग्रदशेन्द्रियाननमनो नक्तञ्चराधिष्ठिते
देहेऽस्मिन्भवसिन्धुना परिगते दीनान्दशामास्थितः ।
अद्यत्वेहनुमत्समेन गुरुणा प्रख्यापितार्थः पुमान्
लङ्कारुद्धविदेहराजतनयान्यायेन लालप्यते ॥ ७२ ॥

(अपि च)

बहुलदुरितद्वारे ब्राह्मे पुरे परसंमत-
स्वमतिघटितस्वातन्त्र्यत्वादयन्त्रितचेष्टितः ।
विषमसचिवैः स्वे स्वे कार्ये विगृह्य विकृष्यते
नरपतिरिव क्षीबो नानाविधैरयमिन्द्रियैः ॥ ७३ ॥

इदानीमस्य दशामाकर्णयेत्याह सचेति ।

दर्पेति—दर्पेण गर्वेण उदग्रः उद्दीर्णः दशेन्द्रियाणि ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च तान्येवाननानि यस्य स तथा सचासौ मनोनक्तञ्चरश्च मन एव नक्तञ्चरः राक्षसः रावण इत्यर्थः तेनाधिष्ठिते । भवस्संसारः स एव सिन्धुस्सागरः तेन परिगते दुस्तरत्वाभिप्रायेण संसारस्य सिन्धुत्वरूपणं तेन परिवृते अस्मिन्देहे दीनां शोच्यदशामवस्थामास्थितः प्राप्तः । अद्यत्वे इदानीं हनुमत्समेन आञ्जनेयतुल्येन गुरुणा गुरोर्हनुमत्साम्यवचनं अस्य ज्ञानशक्त्याद्यतिशयख्यातनार्थं । हनूमतो ज्ञानाधिक्यं । नूनं व्याकरणं कृत्स्नमनेन बहुधाश्रुतं । बहुव्याहरतानेन न किंचिदपशब्दं । इत्यादौ प्रतीयते । शक्तिस्सागरलंघनौषधपर्वतानयनादौ सुव्यक्ता । स्नेहो मेपरमो राजंस्त्वयि नित्यं प्रतिष्ठितः । भक्तिश्च नियता वीरभावो नान्यत्र गच्छति । इत्यादौ भगवद्भक्तिश्च प्रसिद्धा वैराग्यं चापि गीतं । प्रख्यापितः प्रकर्षेणावेदितः अर्थः ज्ञातव्यार्थः यस्य सतथोक्तः पुमान् लंकायां रुद्धायाः विदेहराजतनयायाः न्यायेन प्रकारेण लालप्यते भूयोभूयः प्रलपति ॥ ७२ ॥

पुनरप्यस्य दशामेवाह ।

बहुलेति—बहुलानि बहूनि दुरितान्येव द्वाराणि यस्मिन् तस्मिन् । दुरितशब्देन दुरितसाधनानीन्द्रियाण्युच्यन्ते । ब्राह्मे ब्रह्मकार्ये ब्रह्मप्रकृतिः तत्कार्ये शरीरे ।

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं ।
संभवस्सर्वभूतानां ततो भवति भारत ।

इत्यत्र ब्रह्मशब्दः प्रकृतौ प्रयुक्तः । परेण ईश्वरेण संमत मंगीकृतं स्वमतिघटितं स्वबुद्ध्या संपादितं स्वातन्त्र्यं यस्य स तथाप्यात् आदावीश्वरेण करणकलेवरप्रदानपूर्वकं तत्तत्कार्येष्वस्य कर्तृत्वप्रदानात् अयन्त्रितमनिवारितं चेष्टितं व्यापारो यस्य स तथा । नानाविधैः नानाप्रकारैरिन्द्रियैरयं पुरुषः विषमैः परस्परविरुद्धैः सचिवैः क्षीबः मत्तः नरपतिरिव स्वेस्वेकार्ये विगृह्य परस्परकलहं कृत्वा विकृष्यते आकृष्टोभवति ॥ ७३ ॥

सुमतिः—* अं अउंत एवं हु अवहवेढि अघरगअं विअ अंपाणं अंपमंत बुंधी किंण णिंजिगमिसा एरंखइ पुरुसो ।

राजा—प्रिये सर्ववेदिनि, अनादिः खल्वयमलंघनीयो रागजलधिः ।

स्थिरत्रसविभक्तिमत्त्रिविधरागदृश्योदयं
सुमृष्टमणिभित्तिवत्स्वयमभिद्यमानः पुमान् ।
त्रियुग्मगुणशिल्पिना त्रिगुणतूलिकाधारिणा
विविच्य विनिवेशितं वहति चित्रमत्यद्भुतम् ॥७४॥

सुमतिः—(सविषादं) † इदिणाम उंमंतदसं पुरुसंबुंधीपि अ अमा किंण बोहेइ ।

---

* आर्यपुत्र एवं हुतवहवेष्टितगृहगतमिवात्मानमप्रमत्तबुद्धिः किमनिर्जिगमिषय रक्षति पुरुषः ।

† इतिनाम उन्मत्तदशंपुरुषं बुद्धिः प्रियतमा किंच बोधयति ।

निर्जिगमिषा निर्गन्तुमिच्छा । रागजलधिः रागः भोगेच्छा स एव जलधिः रागस्य जलधित्वरूपणाद‍लंघनीयता हेतुभूतमपरिच्छिन्नत्वं प्रतीयते ।

संसारस्यात्भुत चित्रसाम्यप्रतिपादनद्वारा तदनुभवादस्य वैमुख्यमित्याह ।

स्थिरेति—॥ स्थिरत्रसविभक्तिमत् स्थावरजंगमविभागवत् त्रिविधः त्रिप्रकारः लोहितशुक्लकृष्णरूपः यो रागः वर्णः तेन दृश्यः दर्शनीयः उदयः उत्पत्तिर्यस्य तत्तथा । त्रिगुणाः त्रयोगुणा एव तूलिकालेखनशलाका तद्धारिणा त्रियुग्मगुणाः षाड्गुण्यपूर्णः परमात्मा स एव शिल्पी तेन ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड्गुणाः षाड्गुण्यपूर्णत्वं च भगवतएवासाधारणं ।

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
तवानन्तगुणस्यापि षडेव प्रथमे गुणाः ।
यैस्त्वयेव जगत्कुक्षावन्येप्यन्तर्निवेशिताः ॥

इत्यादिषु तथा दर्शनात् । विविच्य प्रथक् प्रथक् विनिवेशितं निक्षिप्तं अत्यद्भुतं अत्याश्चर्यं अस्थिरेषु स्थैर्यबुद्धिजनकत्वं दुःखरूपेषु सुखत्वभ्रमहेतुत्वं अप्राप्तेषु प्राप्तताज्ञानकारणत्वं इत्यादिदर्शनादस्यात्यत्भुतत्वं चित्रं चितं प्रत्यगात्मानं त्रायत इतिव्युत्पत्या चित्र शब्देन देह उच्यते । सुमृष्टा सुष्टु शोधिता मणिमया भित्तिरिव स्वयमभिद्यमानः देवादिभेदरहितः सुमृष्टाश्मभित्तिर्नभिद्यते । पुमान्वहति ॥ ७४ ॥

यत्ते पुरुषदुःखज्ञानेनास्याविषादः ।

राजा–प्रिये सूक्तवादिनि सापिखल्विदानीं स्वयं प्रकाशापि सुप्तप्राया वर्तते ।

यथा

पत्यौ दूरङ्गतवति रवौ पद्मिनीव प्रसुप्ता
म्लानाकारा सुमुखिनिभृता वर्तते बुद्धिरंबा ।
मायायोगान्मलिनितरुचौ वल्लभे तुल्यशीला
राहुग्रस्ते तुहिनकिरणे निष्प्रभा यामिनीव ॥ ७५ ॥

सुमतिः–* अं अउत्त अइकरुणा इमा बुंधिसहिअस्स पुरुसस्स बंधदसा । एअस्स विउल दुंख जालविंहलस्स विंथरेण मोंखा अमं पआसंतो विसंकंमंकुणसु ।

राजा–देवि अनवरतशोभनाशंसिनि, निदानमिह निपुणमुपपादयन् प्रतिपन्नामेव भवतीं प्रत्यभिज्ञापयामि ।

दुरासेधस्थेम्ना दुरितपरिपाकेन भविनः
प्रमाथी संसारः प्रशमरहितोयं प्रभवति ।

---

* आर्यपुत्र अतिकरुणेयं बुद्धिसहितस्य पुरुषस्य बद्धदशा एतस्य विपुलदुःखजालविह्वलस्य विस्तरेण मोक्षागमं प्रकाशयन् विशंकां मा कुरुष्व

स्वयंप्रकाशापि सुप्तप्राया अपि तु यच्छरीरग्लानिर्मालिन्यं च लोके न दृश्यते। अस्यास्त्विदानीं तदुभयमस्तीति दर्शयितुं दृष्टान्तद्वयीमाह ।

पत्याविति–॥ पत्यौ रवौ दूरं दूरदेशं गतवति सति प्रसुप्ता मुकुलिता पद्मिनीव म्लानाकारा क्रान्तदेहा अंबा अस्माकंमाता बुद्धिर्वर्तते मायायाः प्रकृतेर्दोषात् । **मायां तु प्रकृतिं विद्यादिति** श्रुतेः । मायाशब्देन प्रकृतिरुच्यते । विचित्रकार्यहेतुत्वादस्याः मायाशब्दवाच्यत्वं । तत्संबन्धजनितदोषादित्यर्थः । मलिनितरुचौ मलिनिर्मालिन्यं संजातमालिन्यं स्वप्रभाभूतज्ञाने वल्लभे नायके पुरुषे तुल्यशीला तुल्यशीलमाचारो यस्यास्सा तथा तुहिनकिरणे हिमांशौ राहुग्रस्ते सति यामिनी निष्प्रभा वर्त्तते ॥ ७५ ॥

अतिकरुणातिशोच्या ।

निदानं प्रथमकारणं । निदानं त्वादिकारणमिति निघण्टुः । प्रतिपन्नां ज्ञातवतीमेव प्रत्यभिज्ञापयामि स्मारयामि ।

दुरासेधेति–॥ दुरासेधमनिवारणीयं स्थेम स्थैर्यं यस्य तेन दुरितपरिपाकेन भविनस्संसारिणः प्रमाथी नाशकः । ज्ञानसंकोचक इति यावत् । प्रशमरहितः अयं संसारः प्रभवति नियन्ता भवति । तस्य संसारस्य निरोधे विरुपधिकं सहजं यत्का-

निरोधे तस्यैकानिरूपधिककारुण्यघटिता
स्वतन्त्रेच्छाशक्तिः स्वयमुपधिमाधाय रमते ॥ ७६ ॥

सुमतिः—* जइ मए वि सो उवाही सुणि अव्वो ता मं अज्जउत्तो आणवेदु ।

राजा—प्रिये विशुद्धभाषिणि, श्रूयतामिह सूक्ष्मार्थसंग्रहः ।

मदनमत्सरमानमयः पुमान्
बहुपिशाचगृहीतइवार्भकः ।
निगमसिद्धनरेन्द्रनिरीक्षया
निपुणपद्धतिमभ्यवपद्यते ॥ ७७ ॥

ततश्च

अनघदेशिकदृष्टिसुधाप्लवे
विधिवशादुपसेदुषि देहिनः ।
विमलबोधमुखाविविधा गुणाः
परिणमन्त्यपवर्गदशाङ्कुराः ॥ ७८ ॥

---

* यदि मयापि स उपाधिः श्रोतव्यस्तदा मामार्यपुत्र आज्ञापयतु ।

रुणर्थं । सुहृदं सर्वभूतानामिति गीयते । तेन घटिता संबद्धा स्वतन्त्रस्येश्वरस्येच्छायाश्शक्तिः स्वयमेव उपाधिं अज्ञातसुकृतादिकमाधाय रमते क्रीडति । वैषम्यनैर्घृण्यप्रसंगपरिहाराय भगवान् यादृच्छिकसुकृतादिकमपेक्षत इति भावः ॥ ७६ ॥

मदनेति—॥ मदनः कामः मत्सरः परोत्कर्षासहत्वं मानः गर्वः एतन्मयः एतत्प्रचुरः बहुभिः पिशाचैः गृहीतार्भक इव स्थितः पुमान् निगमसिद्धः वेदान्तसिद्धश्च नागरिकश्च नराणां जीवानामिन्द्रश्शेषी। भगवान्मान्त्रिकश्च जीवान्प्रतिभगवतश्शेषित्वं । तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं । सकारणं कारणकारणाधिपो ज्ञाज्ञौद्वावजावीशनीशौ । इत्यादिश्रुतिसिद्धं। तस्य निरीक्षया कटाक्षेण निपुणां समीचीनां निपुणानां वा पद्धतिं मार्गं अभ्यवपद्यते प्राप्नोति । भगवत्कटाक्षणाद्वेषादिकामाचार्यप्राप्तिपर्यन्तानां निपुणपद्धतिं प्राप्नोतीत्यर्थः ॥ ७७ ॥

अनघदेशिकेति—॥ अनघस्य मन्त्रान्तरसाधनान्तर देवतान्तरप्रावण्यरूपदोषरहितस्य देशिकस्य दृष्टिरेव सुधा तया आप्लवे सेके विधिवशात् भगवत्कृपावशात् उपसेदुषि सति विमलः निर्मलः सचासौ बोधश्च सः मुखं आदिर्येषांते तथा अपवर्गसुखांकुर इत्यपि पाठः । विविधागुणाः परिणमन्ति सिध्यन्तीत्यर्थः ॥ ७८ ॥

अपि च

स्वाधीनेतरपातभीतिपरुषस्वर्वासदुर्वासना
पाशाकर्षणयन्त्रणाभिरभितः क्षिप्तात्मनः क्षेत्रिणः ।
निष्प्रत्यूहविजृंभमाणकरुणा दुग्धार्णवे निर्भरा
भक्तिस्सेत्स्यति भागधेयवशतः प्राप्येपरे ब्रह्मणि ७९

अत्र चान्तरा सर्वस्वदक्षिणोऽयमध्वरः प्रवर्तते ।

यत्र तु

त्वया जुष्टः पत्न्या विधिवदिह यष्टा स्वयमहं
विधत्ते चार्त्विज्यं शमदमुखोऽयं गुणगणः ।
अकस्मादुद्देश्यो भवति भगवानात्महविषः
पशुर्बद्धो मुक्तिं भजति विगलत्कर्मनिगलः ॥ ८० ॥

एवं भूतस्य भगवति भक्तिस्सेत्स्यतीत्याह ।

स्वधीनेति—॥ स्वाधीनेतरः अस्वाधीनः कर्माधीनो यः पातः तस्मात् भीतिः तया क्रूरस्सचासौ स्वर्वास स्वर्गवासस्तस्मिन् दुर्वासना दुरभ्यासः सैव पाशः बन्धहेतुत्वात् पाशत्वरूपणं तेनाकर्षणं माकृष्टिः यन्त्रणाबन्धनानि ताभिरभितः परितः क्षिप्तात्मनः निरस्तधैर्यस्य क्षेत्रिणः निष्प्रत्यूहं यथा तथा विजृम्भमाणा करुणैव दुग्धं क्षीरं करुणाया दुग्धत्वरूपणं भोग्यता प्रकर्षसूचनार्थं । तस्यार्णवे अपरिच्छिन्ने स्थाने प्राप्य पर ब्रह्मणि निर्भरा निबद्धा भक्तिः भागधेयवशतः सेत्स्यति ॥ ७९ ॥

अत्रान्तरा अस्मिन्मध्ये सर्वस्वं दक्षिणा यस्मिन् स तथा । अस्मिन्नध्वरे पत्नी यजमानऋत्विगुद्देश्यहविः पशून् दर्शयति ।

त्वयेति—॥ विधिवत् विधिश्शास्त्रं तदुक्तप्रकारेणेत्यर्थः आत्महविषः आत्मरूपहविषः आत्मनोहाविष्टृहविर्गृहीत्वात्मरूपं वसुरण्येति मन्त्रतः । मन्त्रोक्तं अकस्माच्च कस्मैचिदपि फलायेत्यर्थः उद्देश्यः उद्देश्यदेवता भवति बद्धः प्रकृत्या बद्धः पशुः पुरुषः विगलत्कर्मनिगलः कर्मैव निगलं यस्य सतथा मुक्तिं भजति ॥ ८० ॥

अत्रायमध्वरः । समित्साधनकादीनां यज्ञानां न्यासमात्मनः । नमसायोऽकरोद्देवे सस्वध्वरउदीरितः । इत्युक्त आत्मसमर्पणरूपस्तस्यैव स्वध्वरत्वकथनात् । उपरितन श्लोके च तस्यैव वक्ष्यमाणत्वात् । ननु सत्रान्तरे यूपे बद्धस्य पशोस्संज्ञपनं दृश्यते अस्मिन्नध्वरे बद्धस्य पशोः कथं मुक्तिः दुरितविमलनं च कथमित्यत आह ।

इदमप्यत्र भवत्या भावनीयं

स्वरक्षणभरार्पणक्षणिकसत्रिणः क्षेत्रिणः
प्रवर्त्य कृपयास्थितिं प्रभुरभूतपूर्वोदयां ।
जगद्विपरिवर्तनप्रथितनित्यशक्तिस्स्वयं
क्षिपत्यपुनरङ्कुरं दुरितमस्य लक्ष्मीपतिः ॥ ८१ ॥

सुमतिः—* अं अउंत एवं णामवण्णिज्जंती ओवंगदसापुरुसस्स कदआ होहिद ।

राजा—देवि त्रैकाल्यवेदिनि, दुस्सहानादिदुःखसागरनिमग्नस्य यथागमं यथान्यायञ्च केनचित्कारणेन समुत्तारस्संभविष्यतीति सन्तोष्टव्यन्तावत् ।

इह हि

निरपायदेशिकनिदर्शितामिमां
कमलासहायकरुणाधिरोहणीं ।

* आर्यपुत्र एवं नाम वर्ण्यमानापवर्गदशा पुरुषस्य कदा भविष्यति ।

स्वरक्षणेति—॥ स्वस्य रक्षणं स्वरक्षणं प्रकृतिविमोकपूर्वकभगवत्प्राप्तिरूपं तस्मिन् यो भरः तस्य अर्पणं न्यासः क्षणकालसाध्यं क्षणिकं तच्चेदं सत्रं च तदेव क्षणिकं सत्रमस्यास्यास्तीति तथा तस्य क्षेत्रिणः अभूतपूर्वं उदयो यस्यास्तां स्थितिं प्रवर्त्य प्रवर्त्तयित्वा जगतां विपरिवर्त्तनं संहारः संहृतस्य जगतः पुनस्सृष्टिर्वा तेन प्रथिता नित्या शक्तिर्यस्य स तथा जगद्विपरिवर्त्तनेन प्रथितनित्यशक्तित्वं परमात्मन एव । असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानं स्वयमकुरुत । सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयं । तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोसृजत सोकामयत बहुस्यां प्रजायेयेति सतपो तप्यत । सतपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । परास्य शक्तिर्विविधैव श्रूयते । स्वाभाविकीज्ञानबलक्रिया च इत्यादि श्रुतिभ्यस्तथावगमात् । एवं भूतो लक्ष्मीपतिः अस्य दुरितं अपुनः अंकुरं यस्मिन् कर्मणि तद्यथाभवति तथा क्षिपति अभूतपूर्वोदयां स्थितिं प्रवर्त्येति मुक्तिं दुरितं क्षिपतीति कर्म विगलनं च करोति । भगवानित्यनेन । एतदध्वरपशोरध्वरान्तरपशुभ्यो व्यावृत्तिस्सूच्यते ॥ ८१ ॥

भूतभविष्यद्वर्त्तमानास्त्रयः कालास्त्रैकाल्यं तद्वेदिनी । आगमश्शास्त्रं न्यायो युक्तिस्तद् द्वयमनतिक्रम्य केनचित्प्रकारेणेत्युक्तमेवाह ।

निरपायेति— निरपायाः अपायरहिताः अपायशब्दोत्र निष्टाहानिहेतुभूतमुपायापायं दर्शयति । यथोक्तं

उपायापायसंयोगेनिष्टयाहीयतेनया ।
अपायसंप्लवे सद्यः प्रायश्चित्तं समाचरेत् ॥
प्रायश्चित्तिरियं सात्र यत्पुनश्शरणं व्रजेत् ।
उपायानामुपायत्वस्वीकारेप्येतदेव हि ॥ इति ॥

क्रमशोधिरुह्य कृतिनस्समिन्धते
परिशुद्धसत्वपरिकर्मिते पदे ॥ ८२ ॥

अपि च

स्वयमुपशमयन्ती स्वामिनः स्वैरलीलां
स्वमतमिह दुहाना स्वादु पथ्यं प्रजानां ।
नियतमिदमिदानीमन्यदा वा भवित्री
निरवधिसुखसिध्यै निष्प्रकंपानुकंपा ॥ ८३ ॥

इयं हि

तेच ते देशिकाश्च तैः निदर्शितां नितरांप्रकाशितां इमां कमलासहायस्य करुणैवाधिरोहणी निश्रेणिका तां कृतिनः कुशलाः स्वाधिकारानुगुणकर्मज्ञानादिविमुखाः प्रपदनैकपरायणा इत्यर्थः । क्रमशोधिरुह्य परिशुद्धं रजस्तमोभ्यामस्पृष्टं यत् सत्वं तेन परिकर्मिते अलंकृते पदेस्थाने समिन्धते वर्धन्ते अविच्छेदेन भगवदनुभवं कुर्वन्तीत्यर्थः ॥ ८२ ॥

एवंभूता भगवत्कृपावश्यं भवित्रीत्याह ।

स्वयमिति–॥ स्वामिनस्सर्वेश्वरस्य स्वैरलीलां स्वच्छन्दलीलां स्वतन्त्रो हि भगवान् कदाचित् जीवात्मनामपराधभूयस्तामवलोक्य ।

उपकारशतेनापि न क्षमामि वसुन्धरे ।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिं ।

इत्युक्तरीत्या लीलापरो भवति सैव स्वैरलीला तामुपशमयन्ती स्वादुभोग्यं पथ्यं हितं च स्वमतमुपायविशेषं भगवदनुभवं वा स्वादु निरतिशयानन्दरूपां भक्तिं पथ्यं भगवत्प्राप्तिहेतुतया हितरूपां प्रपत्तिं वा दुहाना जनयन्ती । निष्प्रकंपा अचंचलानुकंपा सुखस्य निरतिशयानन्दरूपस्य भगवदनुभवस्य सिद्ध्यै इदानीमन्यदा कालान्तरे वा भवित्री नियतं निश्चितं ॥ ८३ ॥

अस्या भगवत्कृपायाः अनन्तकतिपयगुणवत्ता प्रकटनाय वर्तिनोऽन्वं प्रतिपादयति ।

अविरलगुणच्छायामायातमःप्रतिरोधिनी
परिहृतरजःपङ्का तापैरसङ्घटितास्त्रिभिः ।
मधुरिपुदयामूर्तिर्दिव्या निराकृतकण्टका
वहति निगमाद्वर्त्मन्येका पुरीमपराजिताम् ॥ ८४॥

सुमतिः— * अंग्रउत्त अपरिमित्र दुरित्र भरिअंसजन्तुणो दुक्खसाअरादो उत्तारवअणं बालअणसंतोसवअणं विअ उवच्छन्दणन्ति पेक्खामि ।

राजा- भद्रे अबाधितार्थग्राहिणि, मास्म मिथ्यादृष्टिमुपतिष्ठ । सुमतिः खल्वसि । अपिदृष्टः क्वचिदाप्तागमस्य बाधः ऐश्वरस्य वा भक्तजनसंरक्षणप्रतिज्ञानस्य ।

---

* आर्यपुत्र अपरिमितदुरितभरितस्य जन्तोर्दुःखसागरादुत्तारवचनं बालजनसन्तोषवचनमिव उपच्छन्दनमिति पश्यामि ।

अविरलेति—॥ छायावत्या तपराहित्य तापरजःपंककण्टकविधुरत्वादयः समीचीनमार्गगुणाः ते सर्वेऽप्यस्यास्सन्तीति पद्वीत्वं व्यज्यत इति भावः । अविरलाः निबिडाः गुणाः शैत्यमार्दवादय एव छाया यस्यास्सा तथोक्ता मायाप्रकृतिस्सैव तमः । तमोवदपथप्रवृत्तिहेतुत्वेन मायायास्तमस्त्वं । तस्य प्रतिरोधिनी नाशिनी रजः रजोगुण एव पंकः परिहृतो रजः पंको यस्यास्सा तथोक्ता त्रिभिः तापैः आध्यात्मिकाधिभौतिकाधिदैविकरूपैः असंघटिता असंयुता (असंवलितेति वा पाठः) मधुरिपोर्दयैव मूर्तिश्शरीरं यस्यास्सा तथा दिव्या विलक्षणा निराकृताः निरस्ताः कण्टकाः यस्यास्सा तथा । अत्र कण्टकशब्देन ऐश्वर्यकैवल्ये प्रतिपाद्येते कण्टको हि महापथे गच्छतां तमपहाय मार्गान्तरगमनहेतुः एवा वर्त्मिनी एकपदी निगमात् नगरात् वेदान्ताच्चापराजितां विरोधिभिरनभिभूतां पुरीं अपराजिताख्यां पुरीं नगरीं वहति प्रापयति । अपराजितेति वैकुण्ठनगर्या एव नाम । यायोध्येत्यपराजितेति विदिता नाकं परेण स्थितेत्यभियुक्तोक्तेः । लोके हि मार्गः कस्माच्चिन्नगराच्चगर्यन्तरं प्रापयति । तद्वदियमपि वेदान्तान्निर्गत्य वैकुण्ठनगरीं प्रापयतीति भावः ॥ ८४ ॥

उपच्छन्दनं प्रतारणं ।

अबाधितार्थग्राहिणी प्रमाणान्तरप्रतिपक्षस्वभावमर्थं गृह्णातीत्यबाधितार्थग्राहिणी । मिथ्यादृष्टिर्नास्तिक्यं । आप्तागमस्याप्तत्वादेवबाधा दर्शनं । ऐश्वरस्य ईश्वरसंबन्धिनः । भक्तजनसंरक्षणे प्रतिज्ञानस्य प्रतिज्ञायाः । एवं किल भगवता प्रतिज्ञातं ।

इयन्ते प्रत्यायना

शपे दैष्टिक्येन स्वयमिह भवत्या च सुमते
त्वयैव द्रष्टव्यः स्वपनविगमोन्मीलितधिया ।
अहङ्कारग्राहग्रहकदनसाक्रन्दतनुभृ-
न्मुमुक्षासंरम्भो मुरमथनसङ्कल्पमहिमा ॥ ८५ ॥

अथवा—साधारणश्चायमाश्रितसंरक्षणसमारम्भः ।

तथा हि

दीनो दृप्यतु वापराध्यतु परं व्यावर्ततां वा तत-
स्त्रातव्यश्शरणागतश्शकनतः सद्भिस्तथा स्थाप्यते ।

मित्रभावेन संप्राप्तं न त्यजेयं कथंचन ।
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितं ॥
विभीषणो वा सुग्रीव यदि वा रावणस्स्वयं ।
आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुचः ॥

इत्यादौ अत्रापि बाध इत्यनुषज्यते ।

प्रत्यायना शपथः तामेवाह ।

शप इति—॥ दैष्टिक्यमास्तिक्यं तेन भवत्या च शपे शपथं करोमि सुप्तस्य सुप्तेर्विगमनेन निवृत्त्या उन्मीलिता प्रकाशमाना धीर्यस्यास्तया त्वया एवं वक्ष्यमाण-प्रकारेण द्रष्टव्यं । अहंकार एव ग्राहः नक्रः तेन ग्रहः ग्रहणं तेन यत्कदनं पीडा तेन साक्रन्दः सप्रलापः यस्तनुभृत्शरीरी तस्य मुमुक्षायां मोक्षणेच्छायां संरम्भः उद्युक्त इत्यर्थः ये सकृदाश्रितास्तेषां संरक्षणसंकल्पस्सर्वसाधारणः ॥ ८५ ॥

किमुत भगवत इत्याहाथवेति ।

दीन इति—॥ दीनोवास्तु दीनः आर्त्तः दृप्यतु विलंबसहोवास्तु परं अपरा-ध्यतु विरोधमेव वा करोतु विरोधाद्व्यावर्ततां व्यावृत्तो वास्तु शरणागतः शकनतः शक्तितः त्रातव्यः रक्षितव्यः विश्वामित्रादिभिस्सद्भिः एष घण्टापथः तथा स्थाप्यते प्रतिष्ठाप्यते ननु प्रसिद्धं खल्वेतदिति भावः विश्वामित्रेण शुनश्शेफश्शरणागतो रक्षितः कपोतेन स्वनीडाभ्याशे पक्षितो व्याधः राघवेण विभीषणः रघुणा कश्चिद्ब्राह्मण-

विश्वामित्रकपोतराघवरघु व्योमाध्वग प्रेयसी
नालीजङ्घबृहस्पतिप्रभृतिभिर्नन्वेष घण्टापथः ॥ ८६ ॥

सुमतिः—*अंग्रउत्त होन्तिखु महन्तावि आमहप्पमुहावि मोक्ख कामेहिं-
तेहिं तेहिं उवासिज्जन्ता, ताकिं सिरीवई एव्वणिव्वाणं स
कालणं भणिज्जइ ।

राजा—प्रिये सूक्ष्मदर्शिनि, किव मन्यसे, असाधारणं हि मधुमथनस्य
माहात्म्यम् ।

पुरावेधस्तम्बावधि पुरुषसृष्टिस्थितिमति
स्थिराभक्तिस्सूते विपदुपरतिं पुंसि परमे ।
तदन्यानभ्यर्चन्नभिलषितमुक्तिस्सुरगणा
नुदन्यां प्रालेयैरुपशमयितुं वाञ्छति जडः ॥८७॥

*आर्यपुत्र भवन्तिखलु महान्तः पितामहप्रमुखा अपि मोक्षकामैस्तैस्तैरुपास्य-
मानाः, तत्किं श्रीपतिरेव निर्वाणस्य कारणं भण्यते ।

व्योमाध्वगाः देवाः तेषां प्रेयस्यः पत्न्यः तास्त्वष्टारं जिघांसन्निन्द्रोऽभ्यद्रवत् सपत्नीः
प्रापद्यत—तन्न प्रतिप्रायच्छन् तस्माद्ध्यं प्रपन्नं न प्रतिप्रयच्छन्तीति श्रूयते ।
नालीकजंघाख्येन हंसेन कश्चित् बृहस्पतिना शक्रः ॥ ८६ ॥

कारणमितीति वा कारणतयेति वा योज्यं । किं तन्माहात्म्यमित्यत आह ।

पुरेति—॥ वेधाः चतुर्मुखः स्तंबस्सूक्ष्मतमस्तृणविशेषः आवेधस्तंबावधि ब्रह्माण-
मारभ्यस्तंबपर्यन्तमित्यर्थः चेतनेषूत्कृष्टश्चतुर्मुखः अचेतनेषु निकृष्टस्तंबः एतयोः ग्रहण-
मन्येषां सर्वेषां प्रदर्शनार्थः पुरुषसृष्टेः पुरुषाणां करचरणकलेबरादिसृष्टेः स्थितिमति
चतुर्मुखादिसृष्टिस्तत्रैव स्थितिमतीति भावः परमेपुंसि स्थिरा निश्चला भक्तिः विपदुप-
रतिं विपच्छब्दः संसारवाची तदुपरतिं प्रसूते जनयिष्यति तद्भक्तेरेव मोक्षहेतुत्वात् ।

तदन्यान् चतुर्मुखादीन् अभिलषिता मुक्तिर्येन स तथा अभ्यर्चन् अर्चयन् उद-
न्यां पिपासां प्रालेयैः हिमशीकरैः उपशमयितुं वांछति । अत्र भगवतो जगत्कारण-
त्वमत एव ध्येयत्वं मोक्षप्रदत्वमन्येषामसत्यत्वे अनुपास्यत्वं मोक्षदाना शक्तत्वं च
प्रतिपादितं । एषां प्रमाणानि ॥

नारायणाद्ब्रह्मा जायते ।
नारायणाद्रुद्रो जायते ॥

न खलु सहस्रमप्यालेख्यदिवसकरा अन्धकारं प्रतिक्षिपन्ति ।

अजस्य नाभावध्येकमर्पितं ।
यस्मिन्निदं विश्वं भुवनमधिश्रितं ॥
पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्यमामपि ।
प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितं ॥
आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान् ।
एकस्तिष्ठति विश्वात्मा स तु नारायणः स्मृतः ॥
नारस्त्विति सर्वपुंसां समूहः परिकीर्तितः ।
गतिरालम्बनं तस्य तेन नारायणः स्मृतः ॥
नराज्जातानि तत्वानि नाराणीति विदुर्बुधाः ।
तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥
परात्परं पुरिशयं पुरुषमीक्षते ।
परमपुरुषमभिध्यायीत शम्भुराकाशमध्ये ध्येयः ॥
आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥
उतामृतत्वस्येशानः ।
अमृतत्वस्यैष सेतुः ॥
समाश्रितात्कल्पतरोरनन्तात् निस्संशयोमुक्तिफलप्रपातः ।
मोक्षमिच्छेज्जनार्दनात् ॥
यो ब्रह्माणं विदधाति पूर्वं त्र्यक्षश्शूलपाणिः पुरुषो जायत ।
कइति ब्रह्मणो नाम ईशोहं सर्वदेहिनां ।
आवान्तवाङ्गसंभूतौ तस्मात्केशवनामवान् ।
आब्रह्मस्तंबपर्यन्ता जगदन्तर्व्यवस्थिताः ।
प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥

ततश्च ।

आबध्नतो विगतशान्तिमनादिनिद्रां
चेतस्विनस्त्रिगुणशक्तिमयी त्रियामा ।
नाथस्य केवलमसौ नरकान्तकर्तुः
सङ्कल्पसूर्यविभवेन समापनीया ॥ ८८ ॥

सुमतिः—*अं अउत्त अंजखु देवाणं मणीणंवि परावर पुरुस विवेअण डोला
अइ चिन्ता, तुए उणकहं एक्कंमि पुरुसोत्तमे णिट्टा णिजम्मइ ।

राजा—देवि ननु सोपब्रह्मणंनिपुणनिरूपिताभिरुपनिषद्भिरेव, प्रसिद्धं
खलु वेदविप्रकेशवाना मैकराश्यम् ।

* आर्यपुत्र, अद्य खलु देवानां मुनीनामपि परावर पुरुषविवेचने डोलायते चिन्ता, त्वया पुनः कथं एकस्मिन् पुरुषोत्तमे निष्ठा नियम्यते ।

अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः ।
पश्चाद्भूतबोधाश्च ध्यानेनैवोपकारकाः ॥
नैसर्गिको नवै बोधस्तेषामप्यतो यतः ।
न संपदां समाहारे विपदां विनिवर्त्तने ।
समर्थो दृश्यते कश्चित्तं विना पुरुषोत्तमं ॥ ८७ ॥

इत्यादिना मोक्षप्रदानशक्तिस्तेषां कुतो नास्तीत्यत आह न खल्विति—

आलेख्यदिवाकराणामन्धकारनिरासकत्वे सिद्धे तेषामपि मोक्षप्रदानशक्तत्वमितिभावः । ततः ब्रह्मादीनां मोक्षप्रदानशक्त्यभावात् ।

आबध्नतीति । विगता शान्तिरुपरमो यस्यास्ता तां अनादिनिद्रामाबध्नती उत्पादयन्ती त्रिगुणशक्तिमयी सत्त्वादिगुणत्रयशक्तिरूपा त्रियामा यामिनी नरकस्य नरकासुरस्यान्तकर्तुः विनाशकरस्य नाथस्य भगवतः केवलं तस्यैवेत्यर्थः । सङ्कल्पः मोक्षयिष्यामि नयामि परमाङ्कतिमित्येवं रूपः सएव सूर्यः तस्य विभवेन सामर्थ्येन समापनीयानत्वन्यस्य कस्यापीति भावः ॥ ८८ ॥

सोपब्रह्मणं स्मृतीतिहासपुराणानि उपब्रह्मणानि तैस्सहितं यथाभवति तथा निपुणैः परावरतत्त्वयाथार्थ्यविद्भिः पराशरपाराशर्यादिभिः निरूपिताभिः उपनिषद्भिः वेदादीनामेकराश्यं एकराशित्वं प्रसिद्धं खल्विति वेदाविप्राः केशवश्चैकराशिरिति प्रसिद्धं खल्वित्यर्थः । कथमेकराश्यमित्यत आह

मेयं विष्णुर्वेदवादाश्च मानं
मातारश्चेत् ब्राह्मणास्सत्वनिष्ठाः ।
इत्थं तेषामैकराश्यं प्रतीमः
कीटप्रायैर्दुर्विदग्धैः किमन्यैः ॥ ८९ ॥

अपि च ।

शास्त्राण्यालोड्य सर्वाण्यशिथिलगतिभिर्युक्तिवर्गैर्विचार्य
स्वान्तर्निर्धार्य तत्वं स्वभुजमपि महत्युद्धरन्सूरिसङ्घे ।
सत्यं सत्यञ्च सत्यं पुनरिति कथयन् सादरं वेदवादी
पाराशर्यः प्रमाणं यदि क इह परः केशवादाविरस्ति ॥९०॥

मेयमिति । वेदवादाः वेदवचनानि सत्वनिष्टा इत्यनेन सत्वं विष्णुप्रकाशकमित्युक्तेः । सात्विका एव जानन्ति नतु राजसास्तामसाश्चेति प्रतीयते । कीटाः क्षुद्रक्रिमयस्तत्प्रायैस्तत्समैः दुर्विदग्धैः मूर्खैः किं न किञ्चिदपीत्यर्थः ॥ ८९ ॥

ब्राह्मणास्तिष्टन्तु पाराशर्य एक एवालं विष्णुपारम्य इत्याह ।

शास्त्राणीति । अशिथिलाः गतयो येषां ते तथा युक्तीनां वर्गाः स्वान्तः स्वमनसि तत्वं याथार्थ्यं निर्धार्य निश्चित्य सूरिणां ज्ञानवतां मुनीनां संघे पाराशर्यः व्यासः । सहोवाच व्यासः पाराशर्य इति प्रसिद्धः । प्रमाणं यदि इहास्मिन्नर्थे केशवात्परः क आविरस्ति प्रकाशते नकोपीत्यर्थः । अत्र

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ॥ इति ।

एतद्व्यासवचनमनुसन्धेयं । केशवशब्देन भगवतो ब्रह्मरुद्रजनकत्वं प्रतीयते यथोक्तं

क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनां ।
आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवान् ॥ इति ।

ब्रह्मरुद्रयोरेतज्जन्यत्वेन परत्वगन्ध इति भावः । एवं व्यासादिपरमर्षिसम्मत एवार्थः परमार्थ इति ॥ ९० ॥

महाजनो येन गतस्सपन्था इति च महर्षिभाषितं, दृश्यते चैतत्।

तर्को न प्रतितिष्ठति प्रभवति ह्यद्यापि वैय्याकुली
क्षोभं यान्ति मिथः क्षता ऋषिगिरः क्षुद्रोक्तयः किं पुनः।
इत्थं तत्वविनिश्चयो निधिरिव क्षिप्तो गुहाभ्यन्तरे
पन्थानन्तु महाजनस्य निपुणः प्रत्यञ्चमध्यञ्चति ॥ ६१ ॥

इहेतरावभाषितमित्याह महाजन इति।

महांश्चासौ जनश्च महाजनः। महत्वं च तत्ववेदित्वं तर्काप्रतिष्ठश्रुतयो विभिन्नाः। नचानृषेर्दर्शनमस्ति किञ्चित्। धर्मस्य तत्वं निहितं गुहायां, महाजनो येन गतस्स पन्थाः॥ इत्येतन्महर्षिभाषितं तस्यानुभवसिद्धत्वमाह दृश्यत इति।

तर्क इति। तर्कः ऊहः न प्रतितिष्ठति तदधिककुतर्कसम्भवात् त्रय्यावेदत्रयेण वैय्याकुली व्याकुलता प्रभवति। तथाहि क्वचित् नारायणादेव समुत्पद्यन्ते। नारायणे प्रलीयन्ते। इति भगवतः कारणत्वं प्रतीयते। अन्यत्र।

प्रजापतिः प्रजा असृजत हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।

इति चतुर्मुखस्य कारणमाम्नायते। अपरत्र

न सन्नचासच्छिव एव केवलः एक एव रुद्रो न द्वितीयायतस्थे।

इति रुद्रस्य कारणत्वं प्रतिपाद्यते। परत्रतु इन्द्रोमायाभिः पुरुरूप ईयत।

इतीन्द्रस्य कारणत्वं श्रूयते। एवं त्रय्या वैय्याकुली हेतुत्वं। मुनीनां गिरः इति हासपुराणानि मिथः क्षतास्सत्यः क्षोभं यान्ति। पुराणानि हि सात्विकराजसतामस-भेदेन परस्परविरुद्धानि। तदुक्तं

अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः॥
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते।
सात्विकेष्विति कल्पेषु माहात्म्यमधिकं हरेः॥ इति।

क्षुद्राणामुक्तयः किं पुनः। ताः परस्परव्याहता इत्यत्र किं पुनर्वक्तव्यमित्यर्थः। तत्वस्य याथात्म्यस्य विनिर्णयः गुहाभ्यन्तरे क्षिप्तः। अनेन महताऽपि यत्नेन न लभ्यत इति सूच्यते। एवं सति किंकर्तव्यमित्यपेक्षायामाह पन्थानमिति। निपुणः महाजनस्य पन्थानमध्यञ्चति पूजयति। पूज्यत्वे हेतुमाह प्रत्यञ्चमिति प्रत्यञ्चं श्रेष्ठमित्यर्थः ॥६१॥

केपुनस्ते महान्त इत्यत्राह महान्त इति। व्यासादिभिः कृतान् प्रबन्धानामानन्त्यात्तेषु परिचयो दुश्शक इत्यत आह तिष्ठन्त्विति ॥

महान्तश्च व्यासवाल्मीकिमनुबृहस्पतिशुकशौनकप्रभृतयः प्रवद-न्त्यस्माकमध्वानं, तिष्ठन्त्वेते बहवः, अयं पुनरेकोऽपि ।

अपजन्मजरादिकां समृद्धिं
कृपया सम्मुखयन्नशेष पुंसां ।
परदैवत पारमार्थ्यवेदी
परिगृह्णातु पराशरस्स्वयन्नः ॥ ६२ ॥

अपजन्मेति । अपगताः जन्मजरादिकाः यस्यास्तां आदिशब्देन व्याधिमृत्यू गृह्येते । समृद्धिं मुक्तिरूपां अशेषपुंसां संमुखयन् किमेतैरर्थित इत्यत आह कृपयेति । प्रदिशतु भगवान् अशेषपुंसां हरिरपजन्मजरादिकां समृद्धिमिति । पुराणान्ते तेनैव-मुक्तं । परं स्वेतरसमस्तवस्तुभ्य उत्कृष्टं यद्दैवतं नारायणाख्यं दैवतं दैवतानाञ्चेति तस्यैव परदैवतत्वात् तस्य पारमार्थ्यं सत्यत्वं वेत्तीति तद्वेदी । अस्य हि पराशरस्य परदैवतपारमार्थ्यवेदित्वं प्रसिद्धं यथा ।

साधु मैत्रेय धर्मज्ञस्मारितोऽस्मि पुरातनम् ।
पितुः पिता मेभगवान्वसिष्ठो यदुवाचह ॥
विश्वामित्रप्रयुक्तेन रक्षसाभक्षितो मया ।
श्रुतस्तातस्ततः क्रोधोमैत्रेयाभून्ममातुलः ॥
ततोऽहं रक्षसां सत्रं विनाशाय समारभे ।
भस्मीकृताश्चशतशस्तस्मिन्सत्रे निशाचराः ॥
ततः संक्षीयमाणेषु तेषु रक्षस्स्वशेषतः ।
मामुवाच महाबाहो वसिष्ठोऽस्मत्पितामहः ॥
अलमत्यन्तकोपेन तातमन्युमिमं जहि ।
राक्षसानापराध्यन्ते पितुस्तेविहितं तथा ॥
मूढानामेवभवति क्रोधोज्ञानवतां कुतः ।
हन्यते तातकः कैनयतः स्वकृतभुक् पुमान् ॥
सञ्चितस्यापि महता वत्सक्लेशेनमानवैः ।
यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥
स्वर्गापवर्गव्यासेधकारणं परमर्षयः ।
वर्जयन्ति सदाक्रोधं तातमातद्वशोभव ॥
अलंनिशाचरैर्दग्धैर्दीनैरनपराधिभिः ।

सुमतिः–*अंअउन्त अणुत्तरं एदं उत्तरं, अज्ज उण अणन्त साहण णिअमन्त णिरूपणं असहतं स तु रन्तहि अअंस चे अणंस संवा अमसारं सङ्कल ऊण दावे उन्तुमं पेथामि ।

*आर्यपुत्रानुत्तरमेतदुत्तरं, अद्य पुनरनन्तसाधननिगमान्तनिरूपणमसहमानस्य त्वरमाणहृदयस्य चेतनस्य सर्वागमसारं सङ्कलय्य दर्शयितुं त्वां प्रार्थयामि ।

सत्रं तेविरमत्वेतत्क्षमासाराहि साधवः ॥
एवं तातेन तेनाहमनुनीतो महात्मना ।
उपसंहृतवान्सत्रं सद्यस्तद्वाक्य गौरवात् ॥
ततः प्रीतस्सभगवान्वसिष्ठो मुनिसत्तमः ।
सम्प्राप्तस्तदा तत्र पुलस्त्यो ब्रह्मणः सुतः ॥
पितामहेन दत्तार्घ्यः कृतासनपरिग्रहः ।
मामुवाच महाभागो मैत्रेयपुलहाग्रजः ॥
वैरेमहति यद्वा क्यादूगुरोरस्याश्रिताक्षमा ।
त्वया तस्मात्समस्तानि भवान्शास्त्राणि वेत्स्यति ॥
सन्ततेर्नममच्छेदः क्रुद्धेनापि यतः कृतः ।
त्वया तस्मान्महाभाग ददाम्यन्यं महावरम् ॥
पुराणसंहिता कर्ता भवान्वत्सभविष्यति ।
दैवतं परमार्थं च यथावद्वेत्स्यतेभवान् ॥
प्रवृत्तेच निवृत्तेच कर्मण्यस्तमलामतिः ।
मत्प्रसादादसन्दिग्धा तववत्सभविष्यति ॥
ततः स भगवान्प्राह वसिष्ठोमेपितामहः ।
पुलस्त्येन युदुक्तं ते सर्वमेतद्भविष्यति ॥ इति ॥

पराशरः परान्वेदप्रामाण्यमसहमानान् आसमन्ताच्छृणाति दहति हिनस्तीत्यर्थः । पाक इतिधातुः । सः नः अस्मान् स्वयं परिगृह्णातु अङ्गीकरोतु । एवं पुलस्त्यवरप्रदानलब्धपरदेवता पारमार्थ्यज्ञानेन भगवता पराशरेण परिगृहीतानामस्माकं मतमेव प्रामाणिकमित्युक्तं भवति ॥ ६२ ॥

आर्यपुत्रानुत्तरमेतदुत्तरं यस्मादुत्तरं शङ्कावचनं न विद्यते तत्तथोक्तं उत्तरं मत्प्रश्नस्योत्तरं प्रदर्शयामीत्युक्तमेव दर्शयति ।

राजा—साधुविचिन्तितं भवत्या, तदिदं प्रदर्शयामि ।

स्वसङ्कल्पोपघ्नस्त्रिविधचिदचिद्वस्तुविततिः
पुमर्थानामेकः स्वयमिह चतुर्णां प्रसवभूः ।
शुभस्रोतोभाजां श्रुतिपरिषदां श्रीपतिरसा-
वनन्तस्सिन्धूनामुदधिरिव विश्रान्तिविषयः ॥६३॥

अपि च

परः पद्माकान्तः प्रणिपतनमस्मिन् हिततमं
शुभस्तत्सङ्कल्पश्चुलकयति संसारजलधिं ।

स्वसङ्कल्पेति । स्वस्य संकल्प एवोपघ्नो आश्रयो यस्यास्सा तथा त्रिविधा चिद-चिद्वस्तुविततिर्यस्यास्सा तथा त्रिविधानां चिद्वस्तूनामचिद्वस्तूनां च विततिर्विस्तारः चिद्वस्तूनां त्रैविध्यं बद्धमुक्तनित्यभेदात् अचिद्वस्तूनां त्रैविध्यं त्रिगुणकालशुद्धसत्व-भेदात् । चतुर्णां पुमर्थानां धर्मार्थकाममोक्षाणां एकः स्वयमेव प्रसवभूः उत्पत्तिस्थानं । शुभं स्रोतः भजन्तीति भाजः तासां । स्रोतश्शब्दस्सान्तत्यवचनः । श्रुतिपरिषदां श्रुति-समूहानां अनन्तः अपरिच्छिन्नः अनन्तत्वं स्वरूपरूपगुणविभूतिभिः अन्यत्रापाक्यमसौ श्रीपतिः सिन्धूनां नदीना मुदधिरिव विश्रान्तिविषयः पर्य्यवसानभूमिः । नारायणप-रावेदाः सर्वे वेदा यत्पदमामनन्ति । इतिह्युच्यते ॥ ६३ ॥

तत्वहितपुरुषार्थांस्तत्प्रतिपादकमन्त्रं चाह ।

पर इति । पद्माकान्तः लक्ष्मीवल्लभः परः स्वेतरसमस्तवस्तुभ्य उत्कृष्टः । श्रीपतित्वादेवास्य सर्वोत्कृष्टत्वं । यथाहि

श्रद्धया देवो देवत्वमश्नुते ॥

अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा ॥

वेदान्तास्तत्वचिन्तां मुरभिदुरसि यत्पादचिन्हैस्तरन्ति ।

स्वरूपं स्वातन्त्र्यं भगवत इदं चन्द्रवदने ।

त्वदाश्लेषोत्कर्षात्भवति खलु निष्कर्षसमये । इत्याद्याः । अस्मिन्प-द्माकान्ते प्रणिपतनं प्रपदनं हिततमं हिततमं भर्मातिशयेन हितं तस्यैव ह्युपायान्तरेभ्य उत्कर्षः ।

तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः । इति श्रूयते । स्मरन्ति च मुनयः ।

**झटित्येवं प्रज्ञामुपजनयता केनचिदसा-
वविद्यावेतालीमतिपतति मन्त्रेण पुरुषः ॥ १४ ॥**

सर्वयोग्यमनायासमप्रमादमनूपमम् ।
प्रपन्नार्तिहरं विष्णुं शरणं गन्तुमर्हथ ॥
यद्येन कामकामेन नसाध्यं साधनान्तरैः ।
मुमुक्षुणा यत्सांख्येन योगेन न च भक्तितः ॥
तेन तेनाप्यते तत्तन्न्यासेनैव महामुने ।
उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी ॥
साध्यभक्तिस्तु साहन्त्री प्रारब्धस्यापिभूयसी ।

इत्यादिषु । शुभः शोभनः तत्सङ्कल्पः तस्य भगवतस्सर्वपापेभ्यो मोक्षयिष्यामि इति सङ्कल्पः संसार एव जलधिस्तं । संसारस्य दुस्तरत्वापेक्षया जलधित्वरूपणं । मुनयोऽप्येवमेववदन्ति ।

संसारसागरं घोरमनन्तक्लेशभाजनं ।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥
संसारार्णवमग्नानां विषयाक्रान्तचेतसां ।
विष्णुपोतं विनानान्यत्किञ्चिदस्ति परायणम् ॥

इत्यादिषु । चुलकयति सङ्कोचयति नाशयतीत्यर्थः झटित्येव प्रज्ञां तत्त्वोपायपुमर्थ याथात्म्य विषयां धियमुपजनयता केनचिन्मन्त्रेण । केनचिदित्यत्र मूलमन्त्रो विवक्षितः । एवं सति किं शब्देन कथं तस्य परामर्शः । उच्यते । मन्त्रं यत्नेन गोपयेत् । इतिमन्त्रमात्रस्य गोपनीयत्वात् । तदष्टाक्षरस्य किमुतेति । तदुक्तं ।

मन्त्राणां परमो मन्त्रो गुह्यानां गुह्यमुत्तमं ।
पवित्रं च पवित्राणां मूलमन्त्रस्सनातनः ॥ इति ।

ननु मूल मन्त्रोऽत्रविवक्षित इति केनावगम्यते । झटित्येव प्रज्ञामुपजनयतेत्युक्तवैभवस्य तत्रैव वृत्तेः । अयं हि पदत्रयात्मको मूलमन्त्रः । तत्र प्रथमपदेन भगवतो निरुपाधिकशेषित्वं जीवानां तदपेक्षयानन्यार्हशेषत्वं च दर्शयति । द्वितीयपदेन स्वोचितपुरुषार्थसाधनभूतं प्रपदनं विशदयति । चतुर्थ्यन्तेन तृतीयपदेन च भगवत्कैङ्कर्यं प्रार्थनया पुमर्थं सूचयति । अत एव पञ्चाक्षरकोऽयं मन्त्रोऽष्टाक्षर एवेति निश्चीयते । असौ पुरुषः अविद्या अज्ञानं सैववेताली पिशाचिका तां अतिपतति अतिक्रामति । अविद्याशब्दः प्रकृतिवाचीवा ॥ १४ ॥

प्रियै संमितमतीनामपि चित्तसमाधानहेतुसङ्ग्रहो दर्शितः।

किन्तु

धृतनिगमकवचगूढाः
कष्टं सम्प्रति कुदृष्टयः केचित्।
छलयन्ति सौगतादीन्
स्यालोपालम्भतुल्यया वाचा ॥ ६५ ॥

अथ विस्तरेण प्रतिविधिरस्य वेदान्तेषु विपुलमतिभिरनुसन्धीयते, इष्टमेव खलु विदुषां समासव्यासधारणम्।

सुमतिः—*सुट्ठु भणिअं अज्जउत्तेण एवं वि तेहिं तेहिं महेसि मएहिं तक्केहिं वि तारिसेहिं प आरिज्जन्ताणि अमन्ता चोराकिट्टगोधण सरिसा होहिन्ति संपंण सन्धसा मह चिन्ता।

---

*सुष्ठुभणितमार्यपुत्रेण एवमपि तैस्तैर्महर्षिमतैस्तर्कैरपि तादृशैः प्रतार्यमाणा निगमान्ताः चोराकृष्टगोधन सदृशा भविष्यन्तीति संपन्नसाध्वसा मम चिन्ता।

अस्य संग्रहस्य प्रयोजनमाह प्रियेसंमितेति। संमितमतीनां मनस्समाधानार्थं मानेन संग्रहेण कथं शङ्करादिकुदृष्टिकल्पितनिगमान्तनिरोधनिरसनं विमलमतीनां सुशकम्भवतीति सुमतेरभिप्रायमवेत्याह किन्त्विति ॥

धृतेति ॥ निगम एव कवचः धृतश्चासौ निगमकवचश्च तेन गूढाः वेदप्रामाण्य मंगीकुर्वन्त इव स्थिता इत्यर्थः। कष्टमिति। वेदसौगतादीन् आदिशब्देन जैनचार्वाका ग्राह्यन्ते। स्यालानामुपालम्भः तत्तुल्यया वाचा स्यालोपालम्भो हि जामातरि स्वोक्तदोषाणां स्वस्मिन्नेव पर्य्यवसाने हेतुः। छलयन्ति वञ्चयन्ति। सम्यङ्निरूपणे सौगतादि मतेषु ये दोषाउक्ताः तेसर्वेपि स्वमतेप्या पतन्तीति भावः ॥ ६५ ॥

अथ च तेषु छलयत्स्वपि अस्यैतन्मतस्य प्रतिविधिः प्रतिविधानं दूषणं विपुलमतिभिः अनुसन्धीयत इत्यर्थः। एवं तर्हि विस्तरेणैवास्य प्रतिविधिः क्रियतां। किंसंग्रहेणोक्त इत्यत आह इष्टमिति। समासस्संग्रहः व्यासो विस्तरः ताभ्यां धारणं विदुषामिष्टं। तदुक्तं इष्टं हि विदुषां लोके समासव्यासधारणं। इति पुनरपि बिभेति।

महर्षिः कपिलः तस्य मतैः सिद्धान्तैः तादृशैः ऋषिप्रणीतैः कणादादिपरिकल्पितैस्तर्कैः प्रतार्यमाणाः वञ्च्यमानाः चोरैराकृष्टं यत्गोधनं तत्सदृशाः। गोरूपं धनं

राजा—अलमतिशङ्कया ।

> अविप्लुतपरिग्रहस्मृतिशतैककण्ठी श्रुति-
> स्स्वभक्तिविकलस्मृतीस्स्वपनतोऽपि न प्रेक्षते ।
> स्वतः प्रमिति साधिनी सुदृढतर्कगुप्ता च सा
> रुणद्धि पुनरप्रतिष्ठित कुतर्ककोलाहलम् ॥ ९६ ॥

नेपथ्ये ।

> मूलच्छेदभयोभिभ्रतेन महता मोहेन दुर्मेधसा
> कंसेन प्रभुरुग्रसेन इव नः कारागृहे स्थापितः ।
> विख्यातेन विवेकभूमिपतिना विश्वोपकारार्थिना
> कृष्णेनेव बलोत्तरेण घृणिनामुक्तश्श्रियं प्राप्स्यति ॥९७॥

गोधनं गाव इत्यर्थः । ताश्चोराकृष्टाश्चेत् स्वामिनं न प्राप्नुवन्तिहि तथा एतैः स्वमतानुगुण्येन वर्ण्यमाना वेदान्ताश्च स्वप्रतिपाद्यं नारायणं न प्राप्नुवन्तीत्यर्थः । संपन्नं सिद्धं साध्वसं भयं यस्यास्सा तथोक्ता ।

अविप्लुतेति । अविप्लुतः अक्षुण्णः परिग्रहश्शिष्टपरिग्रहो यासां तासां स्मृतीनां शतं तेनैककण्ठी समानाभिप्राया श्रुतिः स्वस्यां भक्तिस्स्नेहः तया विकलाः हीनाः स्वविरुद्धास्स्मृतिः स्वपनतः स्वप्नेऽपि नप्रेक्षते नापेक्षत इत्यर्थः । प्रमितिं साधयतीति प्रमितिसाधिनी सुदृढैः तर्कैः गुप्ता च सा अप्रतिष्ठितानां कुतर्काणां कोलाहलं रुणद्धि ॥ ९६ ॥

एवं स्वसिद्धान्तं वर्णयन्तं विवेकं आरब्धकार्ये प्रोत्साहयन्तस्त्रिदशाः नेपथ्ये वदन्ति ।

मूलेति । मूलस्य स्वपितृभूतस्य पुरुषस्य छेदात् प्रकृति संसर्गकृतस्वरूपतिरोधानात्भयं तेनोभ्भ्रितेनत्यक्तेनातएव दुर्मेधसा दुर्बुद्धिनामहता मोहेन नः प्रभुः जीवः कंसेन कारागृहे स्थापितोग्रसेन इव विख्यातेन विशेषतः प्रसिद्धेन विश्वोपकारार्थिना सकलजगतामुपकारं कर्तुमिच्छावता बलोत्तरेण बलाधिकेन बलः बलभद्रः उत्तरः ज्येष्ठः यस्य स तथा तेन घृणिना दयालुना विवेकभूमिपतिना कृष्णेनेव मुक्तः मोचितः मुक्तश्रियं प्राप्स्यति ॥ ९७ ॥

अकृत्रिमानित्या सरस्वती त्रयी वावितथवादिनी अशरीरिणी शरीरविधुरा अदृश्यकर्तृकेति यावत् भारती वाक् श्रूयते किल ।

राजा-(कर्णं दत्त्वा, सानन्दं)

प्रिये श्रूयते सेयमकृत्रिमसरस्वतीवावितथवादिन्यशरीरिणी भारती।

सुमतिः-*(सानन्दं) अंग्रउत्त तिअसभासि अं खु एदं णखु कहंवि अलिअं होज्ज ।

राजा-प्रिये सर्वथा तावत् त्वत्साहाय्यस्य मे हस्तगतैव विजयसिद्धिः अपि च

रिपुगणविजिगीषा बिन्दुलेशोऽप्यसौ मे
मधुजिदनुजिघृक्षावाहिनी वर्धितात्मा ।
सफलयितुमधीष्टे साधुसम्भावयिष्यन्
यतिगणबहुमान्यं यत्नसन्तानवृक्षम् ॥ ९८ ॥

पुनर्नेपथ्ये दुन्दुभिध्वनिः ।

उभौ-(कर्णं दत्तः)

सुमतिः-(सविस्मयं), † अंग्रउत्त ।

कुलवइमोक्खणूसवमि अङ्ककहाकइआ
णवसमरूसुआविण अहोइग इन्दघडा ।

---

*आर्यपुत्र त्रिदशभाषितं खल्वेतत् नखलु कथमप्यलीकं भवेत् ।

†आर्यपुत्र ।

कुलपतिमोक्षणोत्सवमदङ्ककथा कदा
नवसमरोत्सुकापि न च भवति गजेन्द्रघटा ।

विजयस्य शत्रुविजयस्य महामोहविजयस्य विजयस्येत्यर्थः सिद्धिः ।

हस्तगतैव एवं सुमतिसमेतत्वं विजयहेतुमुक्त्वा भगवदनुजिघृक्षा च तन्निमित्तमित्याहा पिचेति ।

रिपुगणेति । रिपूणां महामोहादीनां गणः तद्विजिगीषायाः तं विजेतुमिच्छायाः बिन्दुः कणः तस्य लेशः स्वल्पांशोऽपि मधुजितः हरेः अनुजिघृक्षा अनुग्रहीतुमिच्छा सैव वाहिनी नदी तयावर्धितस्समेधितः आत्मास्वरूपं यस्य स तथा यतिगणबहुमान्यं जितेन्द्रिय समूह बहुमान्यं यत्न एव सन्तानवृक्षः देवतरुविशेषः साधु सम्यक् भावयिष्यन् सफलयितुं सफलंकर्तुमधीष्टे शक्नोति ॥ ९८ ॥

उभौ सुमतिविवेकौ कर्णं दत्तः तच्छ्रवणाय कर्णं दिशतः ।

आकस्मिकदुन्दुभिश्रवणात्सुमतेर्विस्मयः ।

*तहविजु अन्तहो तथणइं जुषिहं कणिओ
कहकह कोविहन्तणिहिलं मुहलेइणहम् ॥९९॥*

राजा—प्रिये अस्मद्विजयसन्नाहसन्धुक्षकैरमर्त्यपतिभिरयमभिहन्यते दुन्दुभिः। तदिह स्थापितस्वपक्षैरस्माभिः परपक्षप्रतिक्षेपे प्रयतितव्यम्।

इत्युभौ निष्क्रान्तौ॥

इतिकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये स्वपक्षप्रकाशोनाम प्रथमोऽङ्कः।

श्रीमते भगवते भाष्यकाराय महादेशिकाय नमः॥

श्रीमते निगमान्तमहादेशिकाय नमः॥

---

*तथापि युगान्तभवत्स्तनयित्नु निजक्वणितः
कथं कथं कोऽपिहन्तनिखिलं मुखरयति नभः॥

कुलपतिरिति। कुलपतिः पुरुषः तस्यमोक्षणमेव उत्सवः तस्मिन्ये अभिहन्यमाना मदङ्काः तेषां कथाकदा कस्मिन्काले भविष्यति। इदानीं नास्ति किलेत्यर्थः। नवः नूतनः समरः तस्मिन् उत्सुका अभिलाषवती गजेन्द्रघटापि न भवति तादृशीगजेन्द्रघटाप्यधुना नास्ति तथापि युगान्ते प्रलये भवन्तः स्तनयित्नवः मेघाः तद्ध्वनिसदृशनिजक्वणितः कोपि निखिलं नभः मुखरयति। मदङ्का गजघटा च ध्वनिहेतुः तद्द्वयाभावेपि कोपिरवः कथं नभो मुखरयति। कथं कथमिति वीप्सादराधिक्यसूचनं॥ ९९॥

विजये सन्नाहः अस्माकं विजयार्थंनाहेऽस्मद्विजयसन्नाहः परिकरबन्धः तस्य सन्धुक्षकैः वर्धकैः स्थापितः स्थितिं प्रापितः स्वपक्षोयैस्तैरस्माभिः परपक्षप्रतिक्षेपे प्रयतितव्यमिति उपरितनाङ्कार्थसूचनं।

निष्क्रान्तौ नेपथ्यं प्रविष्टौ।

इति सङ्कल्पसूर्योदयव्याख्यायां प्रभावल्याख्यायां स्वपक्षप्रकाशनाम प्रथमोङ्कः।

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्तमहागुरवे नमः ।

सङ्कल्पसूर्योदये द्वितीयोऽङ्कः ।

ततः प्रविशति श्रद्धा विचारणा च ।

विचारणा—*समजलबिन्दुणिअरणिभासिअणिडालअलावच्छदंसणूसुआव

च्छलेव्व तुरन्ती वट्टसि ।

मुहचन्दसन्दिअसुहासुहआ
छविफुल्लमल्लिमअरन्दणिहा ।
णवसोम्मजोव्वणलआकलिआ
सिरिमुव्वहन्ति तुहसेअकणा ॥ १ ॥

*श्रमजलबिन्दुनिकरनिर्भासितनिटालतला वत्सदर्शनोत्सुका वत्सलेव त्वरमाणा वर्तसे ।

मुखचन्द्रस्यन्दितसुधासुभगाः छविफुल्लमल्लीमकरन्दनिभाः ।
नवसौम्ययौवनलताकलिका श्रियमुद्वहन्ति तव स्वेदकणाः ॥

अथ सूच्यार्थोपदीपकं प्रवेशकं प्रपञ्चयति ।

तत इति—यथोक्तं

तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
प्रवेशोऽङ्कद्वयस्यान्तश्शेषार्थस्योपसूचकः ॥ इति ।

श्रद्धाविचारणा च सुमतेश्चेट्यौ ।

श्रमजलबिन्दुनिकरैः निर्भासितमलङ्कृतं निटिलतटं ललाटतटं यस्यास्सा तथोक्ता । किमिति त्वरया धावसीति भावः । श्रमजलबिन्दून्वर्णयति ।

तव स्वेदकणा एव मुक्ताः ।

श्रद्धा—*पिअसहि, दाणिंकिल एक्कमुहं पडिंठाविअ सुदसिर सिद्धंतस्स पडिपक्ख पडिंखेवभाविअपडिंण्णस्स भत्तुणो विवेअस्स सहधम्मआरिणी देवी सुमई पक्कन्द णिव्वहण दोहलेण परिगहिअ मङ्गलाआरा पमआवण पासिरआण सेलं आसिदा कमलावइ चलण कमलसमच्चण जोग्गाइं कञ्चण पदुमाइं उवहरिउं आणविऊण सोहणेक्कताणहिअआ सुहंठाइ, ताझत्ति उवसप्पामि पङ्कआसणवअण पङ्कआराअहंसीं भारइंविअ पसंण पवाहं भाइरइं

(अध्वश्रममभिनीय)

†कच्छुन्तंसि अकप्परुक्खसिहरुब्भासन्तवासन्तिआ
गन्धुग्गारफुरन्त सोम्मलहरीसोहन्तरोहन्तरा ।
अह्मो दूसहजम्मसञ्चरसमासिद्धाइसुद्धा इदी
दुक्खाइंकइणुकाह इसअंमंदाइमंदाइणी ॥ २ ॥

*प्रियसखि इदानीं किल एकमुखप्रतिष्ठापितश्रुतिशिरस्सिद्धान्तस्य प्रतिपक्षप्रतिक्षेपभावितप्रतिज्ञस्य भर्तुर्विवेकस्य सहधर्मचारिणी देवी सुमतिः प्रक्रान्तनिर्वहणदोहलेन परिगृहीतमङ्गलाचारा प्रमदावनपार्श्वं शैलमाश्रिता कमलापतिचरणकमलसमर्चनयोग्यानि काञ्चनपद्मानि उपहर्तुमाज्ञाप्य शोभनैकतानहृदया ‡ सुखन्तिष्ठति तत्झटित्युपसर्पामि पङ्कजासनवदन पङ्कजराजहंसीं भारतीमिव प्रसन्नप्रवाहां भागीरथीं

†कच्छोत्तंसितकल्पवृक्षशिखरोद्भासमानवासन्तिका
गन्धोद्गारस्फुरत्सौम्यलहरी शोभमानरोधोन्तरा ।
अस्माकं दुस्सहजन्मसञ्चरश्रमसिद्धानि शुद्धाकृति-
र्दुःखानि कदानुकरिष्यति स्वयं मन्दानि मन्दाकिनी ॥

श्रद्धाविचारणां प्रत्याह । एकमुखतया भगवदेकपरतया प्रतिष्ठापितः श्रुतिशिखरसिद्धान्तो वेदान्तसिद्धान्तो येन तस्य । परपक्षप्रतिक्षेपे भाविता क्लृप्ता प्रतिज्ञा येन तस्य । पूर्वाक्रान्ते परपक्षप्रतिक्षेपे प्रयतितव्यमिति हि प्रतिज्ञातं । पङ्कजासनस्य चतुर्मुखस्य वदनान्येव पङ्कजानि तेषु राजहंसमिव सञ्चरन्तीं । भारतीं सरस्वतीमिव प्रसन्नप्रवाहां । प्रवाहो निस्सरणमोघश्च ।

कच्छैरनूपैः उत्तंसिताः उद्धराढाः ये कल्पवृक्षाः तेषां शिखरेषु उद्भासमानाः याः वासन्तिकाः तासां गन्धस्योद्गारेण उद्गमेन स्फुरन्ती सौम्या च या लहरी प्रवाहः वीचिकया तया शोभमाना रोधसोरन्तरं यस्यास्सा तथा दुस्सहं यज्जन्म संसारः तस्मिन्यस्सञ्चरः सञ्चारः तेन यः श्रमः तेन । आसमन्तात् सिद्धानि सज्जनहृदयवच्छीतलैर्मधुमथनपदसरित् मधुरिपुचरणसमुद्भवा मन्दाकिनी नदी ।

विष्णुपादच्युतां दिव्यामपापां पापनाशिनीमित्युक्तेः ।

विचारणा—(अयतो निर्दिश्य), *एसा खु सा अह्माणं आसंणअरा, तादृमंसि संजणहिअअ सोअलमन्दमारु आंदोलिअमन्दारं दुमकुसुममअ-रन्द सोरह भरिअ महुमहणपअसरिआ पुलिण माहवीलआघरे खलव अणतिह्‌ उह्नअर किरण सन्तावं उवसमऊण खणन्तरे गमिंससि ।

जन्धअ ।

एदेणिं भरणिं असोरहसुहापं भारविम्भाइअं
माणुंलुंफणमीणलं फणमहाधाणुक्कबाणुक्करं ।
छाआलोणमहिन्दवारवणि आधम्मिम्लमम्लोइअं
साहड्ढेहिमुअन्तिपुम्फणि अरंरुंखामरुंखोहिआ ॥ १ ॥

अद्दा—†जह रोअइपि असहीए

अद्दा—‡हला विआरणे तुमं उण किंणिमित्त इमन्दसं आअदा ।

*एषा खलु सास्माकमासन्नतरा तदेतस्मिन् सज्जनहृदयशीतलमन्दमारुतान्दोलितमन्दारद्रुमकुसुममकरन्दसौरभभरितमधुमथनपदसरित्पुलिनमाधवीलतागृहे खल वचनतीक्ष्णोष्णकरकिरण सन्तापमुपशमय्य क्षणान्तरे गमिष्यसि ।

यत्र च ।
एते निर्भरनिर्यत्सौरभ सुधाप्राग्भारविभाजितं
मानोल्लुञ्चनमीनलाञ्छनमहाधानुष्कबाणोत्करं ।
छायालीनमहेन्द्रवारवनिताधम्मिल्लमाल्योचितं
शाखाग्रैर्मुञ्चन्ति पुष्पनिकरं वृक्षा मरुल्लोभिताः ॥

†यथा रोचते प्रियसख्यै (उभे सललितमासाते)

‡हला विचारणे त्वं पुनः किंनिमित्त इमं देशमागता

खलानां वचनमेव तीक्ष्णा य उष्णकरः तस्य किरणैः यस्सन्तापः तन्निर्भरं पूर्णं यथा भवति तथा निर्यत् निर्गच्छयत् सौरभमामोदः तदेव सुधा सौरभस्य भोग्यता शयेन सुधात्वरूपणं तस्याः प्राक्भारेणाधिक्येन विभाजितं । मानस्य अभिमानस्य उल्लुञ्चनः उन्मूलनः यो मीनलाञ्छनः मकरध्वजः स एव महाधानुष्कः उत्कृष्टधन्वी तस्य बाणोत्करं बाणनिकरं । छायायां उल्लीना विश्रान्ता याः महेन्द्रस्य वारवनिता वारविलासिन्यः अप्सरसः तासां धम्मिल्लेषु यानि माल्यानि तदुचितम् ॥

यथा रोचते प्रियसख्यै ।

विचारणा—*सुणादु पिअसहीए, अज्ज खु विवेअमहाराअस्स ववसाअसेणावइ सहाअस्स संणाहं सुणिऊण कुविदेण राएण महामोहेण बुद्धजिण पमुह सिद्धन्तट्ठावणपवीणा कुहअवादिणो कुमइगणेहि सह पुरुसोत्तमपअपदुमणिअमिअचित्तं पुरुसं हालिअजंबुअदंसणणाएण अत्थन्तरपसङ्गेण पआरेउं आदिट्ठा उवसप्पन्तित्ति किंवअन्तिं आअण्णअन्तीए भट्टिणीए सुमईए णिविपक्खवुत्तन्तं एअन्ते सेणावइणो विण्णवेदुं आणत्ता महाराएण विवेएण सहमन्तणं पउत्तं तं एव्व दट्ठुं उवट्ठिअम्हि

श्रद्धा—†अज्ज उण पिसाअ विवाहंमि गद्दभगाणं संवुत्तं जं महामोहसमोहिदए दुव्वाइणं संणाहो, होदुणाम ईसंकरं एव्व परसिद्धन्तणिम्मूलणं महाराअस्स

विचारणा—‡हला बुअप्पइपमुहेहि पडिट्ठाविआणं पवलाणं बहूणं पडिपक्खाणं एक्केण णिम्मूलणं तुए कहं आसंसिअं

---

*श्रूयतां प्रियसख्या, अद्य खलु विवेकमहाराजस्य व्यवसाय सेनापति सहायस्य सन्नाहं श्रुत्वा कुपितेन राज्ञा महामोहेन बुद्धजिनप्रमुखसिद्धान्तस्थापनप्रवीणाः कुहकवादिनः कुमतिगणैस्सह पुरुषोत्तमपदपद्मनियमितचित्तं पुरुषं हालिकजम्बुकदर्शनन्यायेनार्थान्तरप्रसङ्गेन प्रतारयितुमादिष्टा उपसर्पन्तीति किंवदन्तीमाकर्णयन्त्या भर्त्र्या सुमत्या विपक्षवृत्तान्तमेकान्ते सेनापतेर्विज्ञापयितुं आज्ञप्ता महाराजेन विवेकेन सह-मन्त्रणप्रवृत्तं तमेव द्रष्टुमुपस्थितास्मि ।

†अद्य पुनः पिशाचविवाहे गर्दभगानं संवृत्तं, यन्महामोहसमोहिते दुर्वादिनां सन्नाहः, भवतुनाम, ईषत्करमेव परसिद्धान्तनिर्मूलनं महाराजस्य ।

‡हला बृहस्पतिप्रमुखैः प्रतिष्ठापितानां प्रबलानां बहूनां प्रतिपक्षाणां एकेन निर्मूलनं त्वया कथमाशंसितम ।

पिशाचानां विवाहेषु गर्दभाः किल गायका इति लोकवचनं । प्रत्यायितास्मि

श्रद्धा—*जं सच्चन्त एव णिच्चं होइजं उणमिच्छातं कालेण अलीअंहो इति जणवा असंवाइणा बलवन्तेण पमाणेण पेक्खिहिसितुमं एव महवअण सच्चन्तणं ।

दीसन्तोदि असेसरोंवबहलं अंधारपंभारअं
दिप्पन्तो अदवाणलोंवविउलंविंझाडवीमंडलं ।
तूरन्तो अपहंजणोंवतुलि असेलेणतूलुक्करं
पेंखन्तोणिहिलं विदुंमइमअंभेन्तुं विवेओपहू ॥ ४ ॥

ताविवेअविअअ कामस महामोहस कुमइगण सङ्गहणं साअरलं-घणूसुअस उवलसहा आंणेसण ।

विचारणा—†पच्चाइअह्मि पिअसही वअणेण सन्ता मे विचिकिच्छा अविलं-बिअ किअं पेसणं भट्टिणिंपेक्खामि ।

श्रद्धा—‡हलासमाणचि न्तउन्तिन्तणं सहिन्तणं तुए पआसिअं अहंअ कम-लाइअवचेउं आउन्तातुमं विराअघरं पविसमु ।

इति निष्क्रान्ते

—प्रवेशकः—

*यत्सत्यं तदेवनित्यं भवति यत्पुनर्मिथ्या तत्कालेनालीकं भवतीति जनवादसं' वादिना बलवता, प्रमाणेन प्रेक्षिष्यसे त्वमेव मम वचनसत्यत्वं ।

दृश्यमानो दिवसेश्वर इव बहुलमन्धकारप्राग्भारकं
दीप्यमानश्च दवानल इव विपुलं विन्ध्याटवीमण्डलं ।
त्वरमाणश्च प्रभञ्जन इव तुलितं शैलेन तूलोत्करं
प्रेक्षमाणो निखिलमपि दुर्मतिमतं भेत्तुं विवेकः प्रभुः ॥

तस्माद्विवेकविजयकामस्य महामोहस्य कुमतिगणसङ्ग्रहणं सागरलङ्घने-त्सुकस्य उपलसहायान्वेषणं ।

†प्रत्यायितास्मि प्रियसखीवचनेन शान्ता मे विचिकित्सा अविलम्बितकृतप्रेषणां भर्त्रीं प्रेक्षे ।

‡हला समानचित्तवृत्तित्वं सखित्वं त्वया प्रकाशितं अहं च कमलाद्यपचेतुराख्या त्वमपि राजगृहं प्रविशस्व ।

प्रियसखीवचनेन प्रत्यायिता विश्रंभयुक्ता शान्ता मे विचिकित्सा । विचिकित्सा सन्देहः अविलम्बितं यथा भवति तथा कृतमनुष्ठितं प्रेषणं नियोगो यस्यास्सा तथा ।

समानचित्तवृत्तित्वं समानचित्तवृत्तिर्व्यापारो यस्यास्सा तथा तस्याभावः ।

ततः प्रविशति राजा व्यवसायश्च ।

राजा—सेनापते कठिनतरकर्मपाशकोटिनिबिडयन्त्रितमुधाव्यापारमोमुह्यमान पुरुषमोक्षणव्रतदीक्षितस्य मम स एव समयः सत्वमार्गविषयकृताकृतप्रत्यवेक्षणेन कृत्यशेषनिर्धारणस्य ।

(मुहूर्तमिव स्थित्वा सविषादं)

जडमति बहुलेस्मिन्दैवकोपाज्जनित्वा
जगति निरपराधे जातनिर्व्याजवैराः ।
कतिकतिकलहार्थं क्लृप्तसिद्धान्तभेदाः
प्रलपनमुखभेदान् पाठयन्ति प्रगल्भाः ॥ ५ ॥

तत्वं तदेव सखित्वं एवं सूक्ष्मयं प्रवेशके सूचयित्वा दृश्यप्रदर्शयितुमङ्कमारभते । तत इति ।

महाराज एष सचमन्तयां पवुन्तं तं एवदं मुं उवणिठ श्रंहोति प्रवेशके विचारणया सूचितो राजा व्यवसायश्च प्रविष्टाविति मन्तव्यम् ।

कठिनतरमनुभवैकनाश्यं यत्कर्म पुण्यपापात्मकं तदेव पाशस्तेन निबिडं यथा भवति तथा नियन्त्रितः बद्धः मुधा व्यापारैः सुखलवाशयाकृतैः दुःखोदर्कैः व्यापारैः मोमुह्यमानश्च यः पुरुषः तस्य मोक्षणमेव व्रतं तस्मिन् दीक्षितस्य ममेति शेषः सत्वमार्गे शुद्धसत्वमयमार्गे तत्प्राप्तिमार्ग इति यावत् कृताकृतप्रत्यवेक्षणेनेतत् कृतमेतदकृतं कर्तव्यमिति पर्यालोचनया कृत्यशेषविर्धारणस्य इदं कर्तव्यमिति निश्चयस्य स एव समयः । अस्मिन्नेवकाले निश्चेतव्यमिति भावः ।

वक्ष्यमाणार्थचिन्तनेन विषादः । विषादहेतुमाह

जडमतीति—जडमतिभिर्विवेकविधुरैः विपुले विस्तृते अस्मिन् जगति देवकोपात् ।

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥

इत्यादिषु उक्ताज्जनित्वा निरपराधे जगति तत्स्थिते जने मञ्चाः क्रोशन्तीतिवत् जातं निर्व्याजं हेतुकं वैरं येषां ते तथोक्ताः कलहार्थं परस्परकलहाय किमेतत्तूष्णीमास्ते कलहं कुर्वन्त्विनामिति बुध्येत्यर्थः । क्लृप्ताः सिद्धान्तभेदा यैस्ते तथा प्रगल्भाः धृष्टाः श्रोतारोपहसन्तीति लज्जाविहीना इत्यर्थः प्रलपनानां मुखभेदान् पर्यायान् पाठयन्ति आध्यापर्यन्तं पाठयन्तीत्यनेन अर्थविचारानपेक्षशब्दराशिपाठ एव प्रयोजनमिति सूच्यते ॥ ५ ॥

आः कष्टं, व्यामोहजनकैर्विविधसमयैरुपप्लुते जगति कथमियमध्यात्मविद्या प्रतिष्ठास्यति ।

(आकाशे)

भोभो महामोहापशद त्रिभुवनसम्मोहनेन भवता किन्नाम लब्धं लप्स्यते वा ॥

अपि च ।

सर्वतः करवीरादीन् सूते सागरमेखला ।
मृतसञ्जीविनी यत्र मृग्यमाणदशाङ्गता ॥ ६ ॥

तदहमीदृशोपप्लवशमनाय भगवन्तमेवाभिगच्छामि ।

(स्मरणमभिनीय)

स्वतस्सिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं
सुधासध्रीचीभिर्द्युतिभिरवतापत्त्रिभुवनं ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहलहलं
हताशेषावद्यं हयवदनमीडीमहि महः ॥ ७ ॥

आः कष्टमिति विषादातिशयं व्यनक्ति । व्यामोहस्य एवं वा एवंवेति संशयस्य जनकैः विविधैश्च समयैः कृतान्तैः उपप्लुते व्याकुलिते जगति अध्यात्मविद्या जीवेश्वरस्वरूपस्पष्टावबोधिनी विद्या वेदान्तविद्येत्यर्थः प्रतिष्ठास्यति प्रतिष्ठां प्राप्स्यति ।

आकाशे पुरतः कस्यचिदवस्थानाभावेपि तमग्रतो वर्त्तमानं मत्वा वदतीत्यर्थः। त्रिभुवनं संमोहयतीति त्रिभुवनसंमोहः तेन किन्नाम लब्धं नकिञ्चिदपि प्राप्तमित्यर्थः । किन्नाम लप्स्यते न किञ्चिदपि लप्स्यत इति भावः । श्रममात्रमेव फलमित्याशयः । ईदृशदुर्जनबाहुल्यं सुजनदौर्लभ्यञ्चानुसन्धायाह । अपि चेति ।

सागरो मेखा रशना यस्यास्सा सागरमेखला भूमिः सर्वतः सर्वत्र करवीर आदि येषां तान् आदिशब्देन विषमुष्टिप्रभृतयो गृह्यन्ते तत्र भूमौ मृतान्सञ्जीवयतीति मृतसञ्जीविनी ओषधिविशेष. मृग्यमाणदशां मृग्यमाणत्वं गता ॥ ६ ॥

तद्दुष्टबाहुल्याद्धेतोरीदृशैर्महामोहसदृशैर्य उपप्लवः । तदुपशमनाय किंरूपं भगवन्तमभिगच्छामीति ध्यात्वा हयग्रीवविषयं स्मरणं प्राप्तं तदेवाभिनीय वदति स्वत इति ।

स्वतस्सिद्धमिति—स्वसङ्कल्पाधीनस्वरूपचिदचित्प्रवृत्तिसत्ता भगवदिच्छया किल तदितरसकलवस्तुसत्ता । तदुक्तमभियुक्तैः । इच्छातएव तव विश्वपदार्थसत्ता नित्यं प्रियास्तव तु केचन ते हि नित्याः इति । शुद्धा ये स्फटिकमणयः तेषे

अपि च ।

समाहारस्साम्नां प्रतिपदमृचान्धामयजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्प्रतिकथककोलहलभवं
हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥ ८ ॥

सेना—महाराज सर्वत्रासिद्धारम्भः खल्वसि । अमोघ एव खल्वनरण्य-शाप इवारण्यकवादो भवत्प्रभावेन महामोहविध्वंसनवादी ।

भूभृत् गिरिः तस्य प्रतिभटं स्वकान्त्या तत्कान्तिमपह्नुवानं सुधायास्सध्रीचीभिः समानाभिः द्युतिभिः अपतापं अपगततापं त्रिभुवनं यस्य स तथा । अनन्तैरसंख्यैस्त्रय्यन्तैर्वेदान्तैः अनुविहितः अनुकृतः हेषायाः हलहलो यस्य तत् हलहल इति शब्दानुकारः भगवते हयग्रीवस्य हेषामनुकुर्वन्ति वेदान्ता इति भावः । हतानि निरस्तानि अशेषाणि अवद्यानि यस्य तत् अनेन हेयगुणराहित्यमुच्यते । श्रूयते हि तत् । अपगतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः ॥ निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनं ॥ इति हयस्य वदनमिववदनं यस्य तत् महः ज्योतिः ज्योतिष्ट्वं हि भगवतः एव प्रसिद्धं । अथ यदतः परो दिवो ज्योतिः दीप्यते । तं देवा ज्योतिषां ज्योतिरायुर्होपासते मृतं । नारायणपरो ज्योतिरित्यादिषु श्रवणात् ईडीमहि तद्विषयां स्तुतिं करवामहे ॥ ७ ॥

एवं हयग्रीवस्य हेषाहलहलः प्रस्तुतः स एव ममाज्ञानान्धकारं शमयत्विति प्रार्थ्यते ।

सामहार इति—साम्नां समाहारः संग्रहः ऋचाम्प्रतिपदं पर्यायशब्दः यजुष धाम गृहं प्रत्यूहानां विघ्नानां लयः विरामः बोध एव जलधिः तस्य लहरीणां वीचीनः विततिः विस्तारः एवंभूताः हयवदनहेषाहलहलः कथासु वादेषु दर्पेण अस्मत्सदृशो नास्तीति गर्वेण क्षुभ्यन्तः अवसरोचितं अजानन्तः ये कथकाः वादिनः तेषां कुलस्य समूहस्य कोलाहलभवं कलकलजन्यं अन्तर्ध्वान्तं अन्तर्मनसि वर्तमानं अज्ञानरूपं ध्वान्तं तमः हरतु नाशयतु ॥ ८ ॥

सिद्धः फलसिद्ध्यविनारम्भो यस्य स । तथा सिद्धारम्भत्वं कथमित्यत्राह । मोहविध्वंसनवादी आरण्यकानां ऋषीणां वादो वचनं अनरण्यस्य शापइव भगवत्प्रभावेण अमोघः खलु आरण्यकवादस्य अमोघत्वात् आरम्भोऽपि सफलो भविष्यतीति भावः ।

इदानीं कृत्यशेषमपि अस्त्यित्याह अद्य चेति ॥

अन्यच्च ।

त्वयात्र्यन्तविज्ञानं पुरुषस्य विभावितं ।
श्रद्धावैकल्यमात्रन्तु शमनीयमतः परं ॥ ९ ॥

राजा—(सपरितोषं), भद्र साधु सम्बोधितोऽस्मि भव्यवृत्तेन भवता त्वत्सहायस्य मे कृत्यशेषमपि कृतप्रायमेव निश्चिनोमि ।

शमदममुखास्तिष्ठन्त्वेते शतंशतमुत्थिता
निरुपधिमहामोहश्रद्धानिवारणलम्पटाः ।
दनुजमथने विष्वक्सेनो हरेस्तदनन्यधीः
प्रतिमत तमश्छेदे हेतुस्त्वमप्यनघो मम ॥ १० ॥

सेना—देव प्रहरणनयेन परेषु प्रयोक्तव्यतया परतन्त्र एवाहं भवतः ।

निष्प्रत्यूहसमुत्थितैरधिगतस्थैर्यैः प्रमाणादिभिः
स्वच्छन्दप्रथमानशौर्यविभवः स्वायत्तसिद्धिर्भवान् ।
इत्थं सत्यनुपप्लवं परिपतच्छिन्ताफलस्रोतस-
स्सत्तावस्थितिवृत्तिषु स्वयमहं छायासमस्तस्तते ॥ ११ ॥

त्वया—त्र्यन्तविज्ञानं वेदान्तविज्ञानं विभावितं प्रकाशितं । श्रुतार्थे श्रद्धाया वैकल्यमात्रमतःपरं शमनीयम् ॥ ९ ॥

भव्यं कल्याणं वृत्तं यस्य तेन कृतप्रायं कृतभूयिष्टं त्वं सहायो यस्य मे । एवं वक्तुं को वातिशय इत्यत्राह

शम इति—निरुपधिमन्तरेण महामोहश्रद्धायाः महामोहस्य या शत्रुविजिगीषा तस्या इत्यर्थः निवारणे लम्पटाः इच्छावन्तः शतंशतमुत्थिताः एकैकस्मिन्कार्ये अहमहमिकया सङ्घशः बद्धपरिकराः शमदममुखाः तिष्ठन्तु । हरेः दनुजमथने तदनन्यधीः तदेकाभिप्रायः विष्वक्सेनः हेतुः मम प्रतिमतमेव तमः तस्य छेदे अनघ त्वमपि हेतुः ॥ १० ॥

प्रहरणन्यायेन आयुधन्यायेन यथा अचेतन्मायुधं केनचित्पुरुषेण प्रयुक्तं सत् विमतं हन्ति तथाहमपि त्वया प्रयुक्तस्सन् तत्तत्कार्यं करोमीति भावः । एतन्न्यायसिद्धं विवेकस्य स्वातन्त्र्यमात्मनः पारतन्त्र्यं चाह ।

निष्प्रत्यूहेति—निष्प्रत्यूहं यथा भवति तथा समुत्थितैरुदितैः प्रमाणादिभिः । आदिशब्देन प्रमाता गृह्यते । अधिगतस्थैर्यैः स्वच्छन्दं प्रथमानः वर्धमानः शौर्यस्य विभवो यस्य स तथा स्वायत्तसिद्धिः स्वाधीनअभिमतसिद्धिः स्वायत्तसिद्धयः सचिवाय

तस्मादहं वा सुमतिर्वा जलोद्धृतमत्स्यन्यायेन भवन्तं विना मुहूर्तमपि न जीवावः ।

राजा—(विचिन्त्य) सेनापते पश्य पश्य

असुरादिमोहनविधौ विहिताः
प्रमितावतीतसमयास्समयाः ।
तपनापनेयतिमिरक्रमतः
प्रचरन्ति हन्त जगदन्तरतः ॥ १२ ॥

सचिवसिद्धयश्चेति द्विविधा राजानः तत्र स्वायत्तसिद्धयः स्वतन्त्राः सचिवायत्तसिद्धयः परतन्त्राः तेषु प्रथमे धीरोदात्ताः त एव नाटकेषु नायकतया वर्ण्यन्ते इतरे धीरललिता नाटिकासुनायकाः इत्यमुक्तप्रकारेण तव इव स्वातन्त्र्यसिद्धे सति अनुपप्लवं अनुपद्रवं यथा भवति तथा परिपतत् सिद्ध्यत् चिन्ता फलानां स्रोतः प्रवाहो यस्यते अहं सत्तायां अवस्थितिषु वृत्तिषु व्यापारेषु छायासमः । त्वदधीनसत्तास्थितिप्रयतनः अहं तव छायेव परतन्त्र इति भावः ॥ ११ ॥

एवं तदेपचया स्वस्य पारतन्त्र्यमुक्त्वा तद्विश्लेषासहत्वं आत्मनः सुमतेश्चाह तस्मादिति ॥

तस्मात् छायावत्पारतन्त्र्याद्धेतोः जलोद्धृतमत्स्यन्यायेन यथा जलादुद्धृतः मत्स्यः मुहूर्तमल्पकालमपि न जीवति तथेत्यर्थः इदं लक्ष्मणवाक्यसंस्मारकं भवति । यथोक्तं लक्ष्मणेन ॥

न च सीता त्वया हीनः न चाहमपि राघव ।
मुहूर्तमपि जीवावो जलात्मत्स्याविवोद्धृतौ ॥

इति ॥

वक्ष्यमाणार्थमवेत्य विचिन्तनम् ।

असुरादीनां आदिशब्देन तत्समाः भगवद्विरोधिनो गृह्यन्ते तेषां मोहनस्य विधौ विधीयत इति विधिः कर्म तस्मिन् विहिताः क्लृप्ताः प्रमितौ याथार्थ्यानुभवे अतीतसमयाः अतिक्रान्तकालाः सम्यग्विचारेण परस्परव्याघातेन तत्तत्क्षणमात्रावसानाः इत्यर्थः समयाः सिद्धान्ताः तपनापनेयं विनाश्यं यत् तिमिरं तत् क्रमतः जगदन्तरतः प्रचरन्ति यथा जगति रात्रौ वर्तमानं तमः तपनेनापनीयते एवं समयाश्च केनचित् महसा निरस्यन्ते इति भावः ॥ १२ ॥

एते च मधुमथनभुजबलपरिभ्रमितमन्दरमहीधरमथ्यमानमहार्णवनिर्घोषनिर्विशेषनिरर्थकविविधवाचो वाचस्पतिमपि वनस्पतीकर्तुमुद्युञ्जते वशिका वावदूकाः तदमी सावधानसम्प्रयुक्तारम्भेणप्रकटप्रकाशितसाधनोपालम्भदंष्ट्राङ्कुरेण प्रतिपक्षखरतरतर्कपञ्चकनखरेणारण्यकारण्यवर्तिना प्रमाणपराक्रमकण्ठीरवेण नियतमकुण्ठशक्तिना निरसनीयाः सत्पथविस्रम्भरम्भावनमथनविहितसंरम्भाः प्रचण्डा वैतण्डिकवेतण्डाः।

सेना—देव नियुक्तो हि त्वया वादेन सह वेदान्तसिद्धान्तः प्रतिमतनिर्मूलनाय, तदासीदस्त्येषा कथासङ्ग्रामसीमा

ततः प्रविशतो गुरुशिष्यवेषधारिणौ सिद्धान्तवादौ।

गुरुः—आयुष्मन्नवधारितपरमार्थेन प्रतिभटकथकलङ्काभटहनूमता भवता स्थूणानिखनन्यायेन सञ्चालितनिष्कम्पमध्यात्मतत्वमवगच्छामि

एते तत्तत्समयनिष्ठाश्च मथ्यमानस्य महार्णवस्य यो निर्घोषः तेन निर्विशेषं विशेषरहितं यथा भवति तथा निरर्थकाः विविधाश्च वाचः येषां ते तथा वनस्पतीकर्तुं वृक्षवत् स्तब्धीकर्तुं उद्युञ्जते वशिकाः क्षुद्राः वावदूकाः। तत्तस्मात् यदेवमेतद्युञ्जते तस्मादित्यर्थः। सावधानं अवधानेन सहितं यथा भवति तथा प्रयुक्ता आरम्भा यस्य तेन प्रकटः प्रकाशितः यः साधनोपलम्भः साधनप्राप्तिः स एव दंष्ट्राङ्कुरो यस्य तेन प्रतिपक्षः सेवितः खरः खरतरश्च यः तर्कः स एव पञ्चनखराः यस्य तेन आरण्यकानि उपनिषदः तान्येवारण्यं तत्र वर्तत इति तद्वृत्ति तेन प्रमाणानां प्रत्यक्षादीनां पराक्रमः पराभिभवनसामर्थ्यं स एव कण्ठीरवः सिंहः तेन अकुण्ठा तीक्ष्णा शक्तिः यस्य तेन सत्पथे समीचीनमार्गे सतां पराशरपाराशर्यबोधायनादीनां मार्गे तद्दर्शिते सिद्धान्ते वा यो विस्रम्भः स एव रम्भावनं कदलीवनं तस्य मथने विहितसंरंभाः कृतसंनाहाः प्रचण्डाः क्रूराः वैतण्डिका एव वेतण्डाः गजाः निरसनीयाः। नियतनिश्चयः प्रमाणबलेनैव एषां निरसनं कार्यमिति भावः।

वेदान्तानां सिद्धान्तः सर्वातिशायी निश्चयः तत्वनिर्णयाय प्रवृत्तः प्रसङ्गः वादः प्रतिमतं विरुद्धमतं तन्निर्मूलनाय कथाप्रसङ्गः सैव संग्रामः तस्य सीमा अवधिः असौ सिद्धान्तः। कथावधित्वात्सिद्धान्तस्य॥

अवधारितः निश्चितः परमार्थो याथार्थ्यं येन स तथा तेन कथकाः प्रतिवादिनः तएव लङ्काभटाः राक्षसाः तेषां हनूमतानाशकेनेत्यर्थः स्थूणानिखनन्यायेन पुनः पुनः तां सञ्चाल्य निष्कंपं कुर्वन्ति तद्वत् सञ्चालितनिष्कंपं अध्यात्मतत्वं अध्यात्मशास्त्रं प्रतिपाद्यं अवगच्छामि दत्त इति तस्य नाम अत्रिपुत्रः आत्रेयः दत्तं दुर्वाससा सोममिति पुराणवचनात्।

शिष्यः—(सप्रश्रयं) भगवन् दिव्येन यतीन्द्रवेषेण दत्तात्रेय इव सन्दृश्यसे योऽसौ महर्षिभिरनुस्मर्यते ।

काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः ।
त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥ १३ ॥ इति

गुरुः—आयुष्मन्नसुराः खल्वेते बाह्याः कुदृष्टयश्च तानहं विष्णुरूपमाश्रित्य विजिगीषे

शिष्यः—भगवन् विष्णुरूपी सन् विष्णुभावेन नमस्यः खल्वसि ।

ततश्च ।

उपवीतिनमूर्ध्वपुण्ड्रवन्तं
त्रिजगत्पुण्यफलं त्रिदण्डहस्तं ।
शरणागतसार्थवाहकन्त्वां
शिखयाशेखरशालिनं भजामि ॥ १४ ॥

(इति साष्टाङ्गं प्रणमति)

अनुस्मरणमिवाह काणाद इति ॥

असुरा इत्यादेः अयम्भावः असुरसंहर्तृत्वं भगवत एव असाधारणं । बाह्यकुदृष्टीनां आसुरत्वं तन्निरसनं तद्रूपमाश्रित्यैव कार्यमिति । विष्णुरूपत्वादेव विष्णुभावः तत एव नमस्यत्वं ततश्च नमस्यत्वादेव नमस्यति ।

उपवीति—उपवीति ऊर्ध्वपुण्ड्राभ्यां दत्तात्रेयस्य असाधारणं एवमेव त्रिदण्डशिखे च जगत्कर्तृत्वविशिष्टानि जगन्ति तेषां यत् पुण्यं तत्फलरूपं त्रिजगदित्येतत्सकललोकप्रदर्शनार्थं भगवदवतारस्य सर्वलोकरक्षाहेतुत्वात् त्रिदण्डः हस्ते यस्य स तथा तं । शरणागतानां यः सार्थः समूहः तं वाहयति रक्षतीति शरणागतसार्थवाहकं शिखया शेखरेण शोभमानम् ॥ १४ ॥

साष्टाङ्गं अष्टाङ्गसहितं यथा भवति तथा प्रणमति ।

मनोबुद्ध्यभिमानेन सहन्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमं ॥

इति उक्तलक्षणः साष्टाङ्गप्रणामः ।

गुरुः—आयुष्मन्

प्रतिष्ठापितवेदान्तः प्रतिक्षिप्तबहिर्मतः ।
भूयास्त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम् ॥ १५ ॥

(इति दिव्यशक्तिमयं दर्भपवित्रन्ददाति)

शिष्यः—(तदादाय शिरसि निधाय दक्षिणे हस्ते धारयति)

गुरुः—अविश्रान्तश्रद्धाशतकलहकल्लोलविषमाः
तवाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः ।
मधुक्षीरन्यायस्वगुणविभवासञ्जनकन-
न्महानन्दब्रह्मानुभवपरिवाहा बहुविधाः ॥ १६ ॥

एवं प्रणमति शिष्ये प्रसन्नो गुरुराह ॥

प्रतिष्ठापितेति—नारायणैकप्रतिपादकतया प्रतिष्ठां प्रापितः वेदान्तो येन स तथा भगवदेकनिष्ठत्वादेव हि वेदान्तानां प्रतिष्ठा ।

सर्वे वेदा यत्पदमामनन्ति ।
नारायणपरा वेदाः ।
मतास्मवचसां प्रतिष्ठा यत्र शाश्वती ।

इत्यादिषु तथा दर्शनात् । गीतं च एतत् भगवता स्वयमेव वेदैश्च सर्वैः अहमेव वेद्यः । इति

प्रतिक्षिप्तानि निरस्तानि बहिर्मतानि बाह्यकुदृष्टीनां मतानि येन स तथा तिस्रो विद्यास्त्रैविद्यं वेदत्रयं तन्निष्ठाः त्रैविद्याः तेषां मान्यः पूज्यः भूरीणां अधिकानां कल्याणानां मङ्गलानां भाजनं पात्रं स्थानं च भूयाः ॥ १५ ॥

दिव्या देवसम्बन्धिनी शक्तिः तन्मयं तद्विकारं ।

शिष्यस्य गुणपूर्तिं दृष्ट्वा प्रसन्नो गुरुः पुनरपि भगवदनुभवाविच्छेदमाशास्ते ।

अविश्रान्त इति—अविश्रान्तानां अनुपरतानां श्रद्धाशतानां अनुभवदशापर्वपराणां कलहः अहं पूर्वं अहं पूर्वमिति स्पर्धा तस्याः कल्लोलैः विततिभिः दन्तुराः मुनयः मननशीलाः सनकादयः सिद्धाः मुक्तात्मानः आदिशब्देन अनन्तगरुडादयः गृह्यन्ते तेषां सुलभाः । अनेन तद्व्यतिरिक्तानां असुलभा इति व्यज्यन्ते । मधुक्षीरयोः विमिश्रयोः न्यायः प्रकार इव प्रकारः येषां ते मधुक्षीरन्यायाः ये स्वस्य गुणाः स्वशब्दः ब्रह्मवाची वात्सल्यसौशील्यादयः तेषां विभवस्य आसञ्जनेन सम्पर्केण कनत् उज्ज्वलः महांश्च आनन्दो यस्य तस्य ब्रह्मणः अनुभवपरीवाहाः बहुविधाः तव मनसि भूयासुः ॥ १६ ॥

शिष्यः—(सप्रश्रयं) अमोघाशिषो भगवतः प्रसादेन सिद्धमेव मे सर्वं समीहितं, अथ च भगवन् यदहमिह किञ्चित्पृच्छामि तद्यदि श्रावयितुमर्हामि श्रावयितव्योऽस्मि

गुरुः—सम्यगुपसन्नस्य सच्छिष्यस्य समये सति किन्न श्रावयितव्यं

शिष्य—भगवन् विगृह्य कथाकरणं महर्षिभिः प्रतिषिध्यते, वादेन ब्राह्मणञ्जित्वा हृष्टस्य पापिष्ठपादपत्वप्राप्तिश्च प्रतिपाद्यते, कथमिदानीं विजिगीष्यन्ते विपक्षवादिनः

गुरुः—(सप्रसादं) भद्र भव्यबुद्धिना त्वया सम्यगनुयुज्यते किन्तु वर्णाश्रमजातिगोत्रप्रवरकुलचरणदेशकालादिविषयभेदेन व्यवस्थितैव हि विधिनिषेधमर्यादा तदहमिदानीं परिगृहीतनियमानुगुणं स्वयंविपक्षनिरसनमकुर्वाणः कौशिकइव राघवं त्वां पुरस्कृत्य कुदृष्टीन् बाह्यांश्च निराचिकीर्षामि ।

समीहितं इष्टं, श्रावयितुं श्रवणं कारयितुमर्हामि योग्योऽस्मि श्रावयितव्या श्रोतृत्वेन कर्तव्योऽस्मि । सम्यगुपसन्नस्य साधुसमीपङ्गतस्य अनेन उपसन्नाय सम्यक् इति श्रुतिः प्रत्यभिज्ञायते । सच्छिष्यस्य सत्वं सद्बुद्धिस्साधुसेवीत्यादौ द्रष्टव्यं । समये सति तत्तत्प्रश्नोचितावसरे सति किं किंवा श्रावयितव्यं न तत्तदवसरोचितं सर्वं श्रावयितव्यमिति भावः । प्रतिषिद्ध्यते न विगृह्य कथां कुर्यात् पादपप्राप्तिश्च सम्प्राप्य ते

वादेन ब्राह्मणं जित्वा हृष्टो भवति यो द्विजः ।
श्मशाने पादपस्स स्यात् गृध्रकङ्कनिषेवितः ॥

इत्येवं पापभीरुत्वादस्यास्मिन् गुरोः प्रसादो जातः तत्सहितं वदति ।

भव्या शोभना बुद्धिः यस्य तेन अनुयुज्यते पृच्छ्यते अनुयोगः समीचीन मन्त्रविशेषोऽस्तीत्यत्राह किन्तु-इति । वर्णाः ब्राह्मणादयः चत्वारो वर्णाः । ब्राह्मणक्षत्रियवैश्यशूद्रा इति स्मृतेः । आश्रमश्च चत्वारः ब्रह्मचारीगृहीवनीयतयः । जाति ब्राह्मणत्वादिकं । गोत्राणि कूटस्थऋषिनामभिः कृतानि । प्रवराः तत्तद्गोत्राणां गोत्रान्तराणां च प्रवर्त्तयितारः कुलानि तत्तत्पुरुषविशेषकृतानि । बह्वृचत्वया याजुषत्वादीनि । देश तुण्डीरचोलपाण्ड्यादयः । कालाः वसन्तादयः । विषयाः अधिकारभेदाः आदिशब्देन आरोग्यकृष्णत्वादि गृह्यते । एवंविधभेदेन विधिनिषेधयोः मर्यादास्थितिः व्यवस्थितैव अयं भावः उक्तेषु वर्णादिकेषु एकैकस्य कर्तव्यतया यद्विधीयते तदितरस्य नि.

तत्र च ।

दूरे भवतु ते वीर जल्पस्सहवितण्डया ।
त्वमेव स्थिरवादात्मा निरुन्धि परिपन्थिनः ॥१७॥

अथवा त्वया मन्निदेशानुवर्तिना कौशिकनियमितेन राघवेणेव लब्धाधिकारेण यथाविधि वीतरागकथानवसरे वेदेश्वरविदूषकास्सर्वे तत्वाध्यवसायसंरक्षणार्थं बलातिबलाभ्यामिव जल्पवितण्डाभ्यामपि जेतव्याः

शिष्यः—(साञ्जलिबन्धं) शिरसा प्रतिगृहीतोऽयं भगवतस्समादेशः अथापि भगवता विश्वाचार्येण भवता कथमिहमितंपचेमयि कथकभार आरोप्यते ।

गुरुः—अवधार्यतामेतत् ।

नित्यक्षिप्तपरस्परेषु समयग्रामेषु निष्णातिन
शिशष्याः केचन सन्ति नः क्षितितले शिक्षाधिकग्राहिणः ।
तत्रत्वद्भुतनिर्भरप्रसरया बुद्ध्या परिष्कारिण-
स्त्वत्तः प्रत्ययितो न कश्चिदपरः प्रत्यर्थिभिः प्रार्थितः॥१८॥

षिद्ध्यते । यत्त्वाज्यतया निषिद्ध्यते तदेव अन्यस्य कर्तव्यतया विधीयते । अतः विधिनिषेधमर्यादा व्यवस्थितैवेति । तस्मादेवं व्यवस्थासिद्धेः परिगृहीतो यो नियमः तदनुगुणं स्वीकृतसन्यासानुगुणमित्यर्थः । निराचिकीर्षामि निराकर्तुमिच्छामि । यथा कौशिकः स्वस्य ब्रह्मर्षितानुगुण्येन स्वयं निशिचरवधमकुर्वन् राघवं पुरस्कृत्य कृतवान्तथाहमपि परिगृहीतपारिव्रज्यानुगुणं भवन्तं पुरस्कृत्य बाह्यकुदृष्टिनिरसनं कर्तुमिच्छामीत्यर्थः । ततश्च यतयेतं त्वयैव निरसनीयाः ततश्च ।

दूर इति-स्थिरवादात्मा दृढतरवादात्मा त्वमेव प्रतिपन्थिनः प्रतिपक्षाचिरुन्धि वारय ॥ १७ ॥

पक्षान्तरमाह अथवेति । साधिकारेण प्रतिपक्षनिरसने अधिकारवता त्वया वीतरागकथायाः अनवसरे तत्त्वबुभुत्सया कृतायाः कथायाः वादस्याप्राप्तौ तत्वाध्यवसायस्य तत्वनिश्चयस्य संरक्षणार्थमनुज्ञाताभ्यां जल्पवितण्डाभ्यामपि जेतव्याः ।

मितं पचे क्षुद्रे ।

नित्येति—नित्यं क्षिप्ताः परस्परं येषु ते नित्यक्षिप्तपरस्पराः तेषु समयग्रामेषु निष्णातिनः निष्ठावन्तः शिक्षाया अधिकं गृह्णातीति शिक्षाधिकग्राहिणः केन शिष्याः नस्सन्ति तत्र तेषु तु अद्भुतः निर्भरश्च प्रसरो यस्यास्तया बुद्ध्या परिष्कारिणः अलङ्कारवतः त्वत्तः अपरः कश्चिदपि प्रत्ययितः सञ्जातप्रत्ययः प्रत्यर्थिभिः न प्रार्थितः ॥ १८ ॥

शिष्यः—यदादिशति भगवान्, अत्र तु कञ्चित्सिद्धान्तमनवलम्ब्य न कापि कथा प्रवर्तते, अतस्स्वाभिमते कुत्रचिन्मामवस्थापयतु भगवान् ।

गुरुः—भद्र, इह किल सयूथ्यकलहे समानतन्त्रे त्वया स्थातव्यं, विपक्षविप्रतिपत्तौ तु वेदान्तसिद्धान्ते तत्रापि पराशरपाराशर्यशुकशौनकबोधायनप्रभृतिभिः परिचितं पन्थानमाश्रित्य परमार्थदर्शिदेशिकदत्तदृष्टिभिरस्माभिः परिमितविशदगम्भीराः पञ्चषाः प्रबन्धाः प्राबन्धिषत, तेष्ववहितचेतसा त्वया प्रतिसंहितपरमार्थेन पारिषदहृदयङ्गमाः प्रमाणतर्काः प्रयोक्तव्याः ।

शिष्यः—भगवति प्रसेदुषि न क्वचित्प्रमाद्यामि । यतः

गुरुप्रसदनस्फुरद्गुणगरिम्णि यन्मानसे
सकृत्स्फुरति वस्तु तन्नहि किमप्यपभ्रश्यति ।
ऋषिस्तदितरोऽपि वा यदि गृणाति मत्यन्तरं
विकल्प्य तदपि क्षणाद्विलयमभ्युपैति स्वयं ॥ १९ ॥

गुरुः—भद्र, विश्वव्यामोहनविषमयुक्तिभयात् त्वामित्यमवधानेन योजयामि । इह हि

यूथे भवाः यूथ्याः सयूथाः समानयूथ्याः एकसिद्धान्तस्थाः तैः कलहे समानतन्त्रे तस्मिन्नेव सिद्धान्त इत्यर्थः । विपक्षैः विप्रतिपत्तौ तु वेदान्ते सिद्धान्ते स्थातव्यः तत्रापि वेदान्तसिद्धान्तेपि पराशरादिभिः परिचितं पन्थानमाश्रित्य परमार्थदर्शिभिः देशिकैः दत्ता दृष्टिः ज्ञानं येषां तैरस्माभिः । पञ्च वा षड्वा पञ्चषाः प्रबन्धाः भाष्यादयः प्राबन्धिषत् प्रबन्धाः । अवहितं सावधानं चेतो यस्य तेन प्रतिसंहितः परमार्थो येन तेन त्वया परिषदि स्थिताः पारिषदाः तेषां हृदयङ्गमाः प्रमाणतर्काः प्रमाणानुकूलास्तर्काः ।

प्रमादाभावः अतइत्यत आह ।

गुर्विति—गुरोः प्रसदनेन प्रसादेन स्फुरत् गुणगरिमा यस्मिन् तस्मिन् मानसे यद्वस्तु सकृत्स्फुरति तत् किमपि नापभ्रश्यति अन्यथा न भवति ऋषिस्तपोविशेष साक्षात्कृतपरावरवस्तुयाथात्म्यः तदितरः स्वतस्सर्वज्ञाः देवोपि वा मत्यन्तरं गृणाति यदि तदपि स्वयं विकल्प्य नानाभूत्वा विलयमभ्युपैति ॥ १९ ॥

विश्वेषां व्यामोहनाय याः विषमयुक्तयः ताभ्यो भयात् बाह्यकुदृष्टिकल्पितयुक्तीनां क्रौर्यमाह ॥

कुटिलमतिभिः क्लृप्ता बाह्यैः कुदृष्टिभिरप्यसौ
कथकपरिषद्धौरेयाणामपि त्वणकर्कशा ।
प्रलपनगुणीभूतालोकप्रकाशनपत्त्रला
युवतिहृदयक्रूरा युक्तिर्युनक्त्यमितं भयम् ॥ २० ॥

शिष्यः—भगवन् मय्यतिस्नेहेन नूनमियमतिशङ्का ।

त्वदादर्शितसन्मार्गे त्वन्निदेशे व्यवस्थिते ।
कथङ्कथकमानी स्यात्कश्चिदन्यो मयि स्थिते ॥ २१ ॥

गुरुः—भद्र, इदमपि पुनर्मन्त्रीयाः

शिष्यः—अनुगृह्णन्तु भगवन्तः

गुरुः—संक्षिप्तं विस्तृतं वा सरलसमुचितं सावधानप्रियं वा
प्राधान्येन प्रणीतं परफणितिपरिष्कारवृत्त्या स्थितं वा ।

कुटिलेति-कुटिला मति येषां तैः बाह्यैः कुदृष्टिभिरपि क्लृप्ता कथकानां वाव दूकानां परिषदो धौरेयाणां धूर्वहाणां त्वणकर्कशा अनेन त्वणान्तर एव तस्या युक्त्याभासत्वं प्रतीतं स्यादिति सूच्यते । प्रलपनं निरर्थकः प्रलापः तस्य गुणीभूतमङ्गभूतं यदलीकं तस्य प्रकाशनेन पत्त्रला पत्त्रवती विस्तृतेत्यर्थः युवतीनां हृदयमिव क्रूरं यथोक्तम् ।

किं क्रूरं स्त्रीहृदयं ततोऽपि किं क्रूरमंगनाहृदयं ।
क्रूरात्क्रूरतरं किं पतिसुतधनहीनमङ्गनाहृदयं ॥

इति । एवंभूता युक्तिः अमितमभयं युनक्ति योजयति जनयतीत्यर्थः ॥ २० ॥

अतिस्नेहकृतेयमतिशङ्केति कथमित्यत आह ।

त्वयेति—आदर्शितः आसमन्तात् दर्शितस्सन्मार्गः सतां पन्थाः यस्मिं तस्मिन् त्वन्निदेशे त्वदाज्ञायां व्यवस्थिते मयि स्थिते सति अन्यः कश्चित् कथकमानी कथकतयाभिमानी कथं स्यात् न स्यादेवेत्यर्थः ॥ २१ ॥

पञ्चधाः प्रबन्धाः प्राबन्धिषतेति पूर्वं प्रस्तुतानां स्वप्रबन्धानां वेदान्तैककण्ठ्य वदति ।

संक्षिप्तमिति—संक्षिप्तं संगृहीतं विस्तृतं वास्तु सरलसमुचितं सरलानां समुचितं सावधानानां प्रियं वास्तु प्राधान्येन प्रधानतया प्रणीतं वा परस्य फणितीनां परिष्कारवृत्त्या परिष्कारोऽलङ्कारः व्याख्या । व्याख्या हि पुरुषमलङ्कार इव मूलमलङ्करोति । तद्वृत्त्या तत्तद्रीत्येत्यर्थः तया स्थितं वास्तु । शिक्षा शासनं तस्यां यत्नाकय

शिक्षासौकर्यतुष्टिप्रचितगुरुजनानुग्रहेद्धं सुधीभि-
श्श्रद्धेयन्नाथजुष्टश्रुतियुवतिशिरोभूषणं भाषणन्नः॥ २२॥

शिष्यः—किमुच्यते, उपनिषदुपघ्नभूतानि खलु भगवता भाषितानि तथाहि

अनुदिनमनपायस्नेहदत्तावसेकै
स्सुमतिभिरनुभाव्यश्शोभनायान्दशायां।
शरणमुपगतानां प्रीणनार्थं भवद्भि
र्भवकलुषनिशीथे भावितोभाष्यदीपः॥ २३॥

अपि च।

असत्तामुच्छेत्तुं प्रकटयितुमीशप्रसदनं
तमः क्षेप्तुं तत्वप्रमितिसुखमुच्छृङ्खलयितुं।

सुकरत्वं तेन तुष्टिस्तोषस्तया प्रचितः अभिवृद्धः गुरुजनस्य यो अनुग्रहः तेनेद्धं समृद्धं सुधीभिः शोभनबुद्धिभिः श्रद्धेयं विश्वसनीयं नाथेन प्रतिपाद्येन भगवता जुष्टाया-श्श्रुतियुवतेः शिरसो भूषणं नः अस्माकं भाषणम्॥ २२॥

अत्र यतीन्द्रवेषो गुरुः भगवान्रामानुजार्यः। शिष्यवेषो वादश्च भगवान्वेदान्ताचार्यः। तत्प्रणीता प्रबन्धाश्च वेदान्तसारादयः तत्र संक्षिप्तमित्यादिशब्दवाच्याः वेदान्तसारश्रीभाष्यदीपवेदार्थसंग्रहगद्यत्रयगीताभाष्यरूपाः प्रबन्धा इति भाव्यम्॥

उपनिषदां उपघ्नभूतानि आश्रयभूतानि। तदेव प्रतिपादयति।

अनुदिनमिति—अनुदिनं दिनेदिने अनपायः अपायो निर्वाणं तद्रहितः अनेने तरदीपव्यावृत्तिः स्नेहेन प्रमाणतैलेन च दत्तः अवसेकः सेचनं यैस्तैः सुमतिभिः अनुभाव्यः शरणमुपगतानां शरणागतानां गृहगतानां च तत्वसन्दर्शनार्थं तत्वानां चिदचिदीश्वराणां ज्ञानार्थं च भवकलुषं संसारजनितदोषः तदेव निशीथं मध्यरात्रं तस्मिन् शोभनायां समीचीनायां दशायां समये वर्त्ती भाष्यमेव दीपः भावितः आरोपित इत्यर्थः॥ २३॥

पुनरपि भाष्यस्य सकृत्पठनमपि नानाविधातिशयहेतुरिति तदेव स्तौति।

असत्तामिति—असत्तां भगवत्स्वरूपाद्यज्ञानहेतुकमसत्वं। ब्रह्मस्वरूपज्ञानाज्ञानाभ्यां हि सत्वासत्वे भवतः। श्रूयते हि।

असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति।

तामुच्छेत्तुं ईशस्य परमात्मनः प्रसदनं प्रसादः।

अमार्गादाहर्तुं पथि च पदमाधातुमिह न-
स्त्वदादिष्टं शास्त्रं प्रभवति सकृद्भावितमपि ॥ २४ ॥

तथापि पारिप्लवमतिरहमिह किमप्यधिगतप्रमुषितं पृच्छामि ।

गुरुः—किन्तत्

शिष्यः—

आदिश्य स्वयमन्यथा नियमयन्नाप्तः कथं कल्पितः

गुरुः—अहो नु खलु सूक्ष्मार्थानुयोगकुशलता ।

शिष्यः—

सामग्रीवशदुर्निवारवृजिने शिष्टानिवृत्तिः कथं ।

एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः ।
जीवे दुःखाकुले विष्णोः कृपाकाप्युपजायते ॥

इत्यादिपूक्तं कृपाविशेषमित्यर्थः । स खल्वेवमाह ।

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात्पार्थ मय्यावेशितचेतसां ॥ इति ।

तत्प्रजनयितुं तमः अज्ञानजन्यमान्ध्यं तत्क्षेप्तुमुत्सारयितुं तत्वानां चिदचिदीश्वरस्वरूपाणां प्रमित्या याथात्म्यानुभवेन यत्सुखं ततुच्छृंखलयितुं निरर्गलं कर्तुं अमार्गात् विरुद्धमार्गात् संसारवर्धकात् स्वाधिकारानुरूपात देवतान्तरभजनादिरूपादित्यर्थः आहर्तुं आकर्षयितुं पथि सन्मार्गे पदमाधातुं निवेशयितुं च त्वया आदिष्टं उपदिष्टं शास्त्रं श्रीभाष्यरूपं शासनाच्छास्त्रं सकृद्भावित चिन्तितमपि प्रभवति शक्नोति ॥ २४ ॥

तथापि श्रीभाष्यस्यैवंविधवैभवत्वेपि पारिप्लवा चञ्चला परितः प्लवत इति पारिप्लवा मतिर्यस्य स तथा । अधिगतप्रमुषितं पूर्वं ज्ञातमिदानीं विस्मृतम् ।

आदिश्येति—अहरहस्सन्ध्यामुपासीत ।

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं ।
प्रियं च नानृतं ब्रूयादेवं धर्मस्सनातनः ॥

इत्यादिभिः शास्त्रैः कृत्याकृत्ये स्वयमुपदिश्यान्यथाविहितमकर्तुं निषिद्धं कर्तुं च नियमयन्नन्तर्यामितया प्रेरयन्भगवान्कथमाप्तः कल्पितः महर्षिभिरिति शेषः । आप्तत्वे ह्युपदेशानुगुणमेव प्रेरणं कार्यमिति भावः । सामग्रीवशादारम्भकपापरूपवशाकारणवशात् दुर्निवारे वारयितुमशक्ये वृजिने दुरिते निवृत्तिः एवं न कुर्यादिति निवारणं कथं शिष्टा अनुशिष्टा आरम्भकपापस्य प्राबल्यात् स्वकार्यदुरितजनकत्वमनिवार्यमित्याशयः । स्वेच्छया स्वशब्दोऽत्र भगवत्परः भावितस्य उत्पादितस्य दुष्कृतस्य च दण्डः

गुरुः-तदपि सूक्ष्मात्सूक्ष्मतरमनुयुज्यते ।

शिष्यः-

स्वेच्छाभावितदुष्कृतस्य च कथं दण्डस्स्वयं पातितः

गुरुः-

त्रिष्वप्यत्र न काचिदस्ति विहतिः कर्मोपधौ सावधौ ॥२५॥

शिष्यः-(सहर्षं) परि[illegible]गम्भीरमहं पटुमतिनिर्धारणीयं भाषितं

शिक्षा स्वयंस्वेनैव कथं पातितः प्रापितः स्वेच्छयैव दुरितमुत्पाद्य तच्छिक्षार्थं नरकादिप्राप्तिं च कथं करोतीति हृदयं । अथ शिष्योक्तस्य प्रश्नत्रयस्यैकमेवोत्तरमाह **त्रिष्विति**-। कर्मोपधौ कर्मरूपोपधौ सावधौ उत्तरावधि सहिते सति अत्र त्रिष्वपि प्रश्नेषु काचिदपि विहतिरनुपपत्तिर्नास्ति । इदमत्राकूतं भगवानादितः सूक्ष्मदशापन्नान् करचरणादिविधुरान्प्रवृत्तिनिवृत्त्यक्षमान्जीवानालोक्य दयमानस्तेषां [illegible] कलेवरप्रदानसमकालमेव तेषां कर्तृत्वादि शक्तिं शास्त्रमपि ददाति । तेन तच्छक्त्या तदा स्वस्व पूर्वकर्मानुगुणं ज्ञानचिकीर्षाप्रयत्नानभिजनन्त । [illegible] प्रकृतिमासाद्य तदानुगुण्येन वर्तन्ते तानेव एव साधुकर्म कारयति [illegible] उन्निनीषतीत्युक्तप्रकारेण सत्कर्मनिष्ठान्करोति । ये तु प्राक्तनदुरितवशादाकृष्टाः [illegible] गत्वा तदनुगुणं वर्तन्ते तानेव एवासाधुकर्म कारयति [illegible] कर्माभिरतान्करोति । अतः आप्तस्याप्यदेष्टुरीश्वरस्य तत्तत्कर्मानुगुणा [illegible] दानपूर्वकमन्यथानियमनं नानुपपन्नं पुण्यपापरूप तत्तदारम्भककर्मोपाधेरुत्तरावधि साहित्यमेव तत्र हेतुः । आरम्भककर्मणामपि स्वस्वकार्योत्पत्तिसमकालमेव विनाशात् । दृश्यते हि घटध्वंसक्षण एव मुद्गराभिघातस्य विनाशः । अतः आद्यप्रश्ने नानुपपत्तिः द्वितीये आरम्भकाणामपि केषांचित्कर्मणां प्रायश्चित्तादिना विनाशसम्भवात् तत्सजातीय कर्मान्तरनिवृत्त्यनुशासनमुचितमिति नविहतिः तृतीयेपि स्वेच्छानामादौ कृतापेक्षा तन्मात्रेणैव स्वैरकृतस्य दुरितस्यानुभवैकनाश्यत्वात्तत्फलादि प्रापणाय नरकादिप्रापणं न्याय्यमिति नानुपपत्तिः इति । एतत्सर्वमभिप्रेत्य ह्यभियुक्तैः (श्री वरदाचार्य)।

आदावीश्वरदत्तयैवपुरुष स्वातन्त्र्यशक्त्यास्वयं

तत्तज्ज्ञान चिकीर्षणप्रयतनान्युत्पादयन्वर्तते ।

तत्रोपेक्ष्य तथानुमत्य विदधत्तन्निग्रहानुग्रहौ

तत्तत्कर्मफलं प्रयच्छति ततस्सर्वस्यपुंसोहरिः ॥ २५ ॥

इति ।

परिमितत्वादेव गहनं दुरवगाहं गम्भीरं बहुविधतात्पर्यं सभासदः सभायां वर्तमानान् इदमेव युष्मत्प्रबन्धवैभवमेव श्रावयामि

भगवतः । इदमेव सभासदश्श्रावयामि ।

इदं प्रथमसम्भवत्कुमतिजालकूलङ्कषा
मृषामतविषानलज्वलितजीवजावातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तय-
श्चिरन्तनसरस्वती चिकुरबन्धसैरन्ध्रिकाः ॥२६॥

अपि च ।

चिन्ताशेषदुरर्थदन्तुरवचः कन्थाशतग्रन्थिला
स्सिद्धान्तानसमिन्धते यतिवरग्रन्थानुसन्धायिनि ।
मुक्ताशुक्तिविशुद्धसिद्धतटिनीचूडालचूडापदः
किंकुल्याङ्कलयेत खण्डपरशुर्मण्डूकमञ्जूषिकाम् ॥ २७ ॥

इदमिति- ॥ इदं प्रथमतया सम्भवन्तः नूतनतयोत्पाद्यमानाः ये कुमतयः तेषां जालं तस्य कूलंकषाः उच्छेदकाः मृषामतं ब्रह्मव्यतिरिक्तमिथ्यात्ववादिनां मतं तदेव विषानलः तेनज्वलितानां दह्यमानानां जीवानां जीवातवः जीवनौषधभूताः चिरन्तना अनादि सिद्धा सरस्वती वेदः ।

अनादिनिधनाह्येषा वागुत्सृष्टास्वयंभुवा ।
आदौ वेदमयी दिव्यायतस्सर्वाः प्रसूतयः ॥

इतिस्मृतेः । तस्याश्चिकुरबन्धे कुन्तलबन्धने उपनिषदां ब्रह्मैकपरताप्रतिपादनेत्यर्थः । सैरन्ध्रिकाः प्रसाधिकाः यतिपुरन्दरस्य यतीश्वरस्य कृतयः प्रबन्धाः अक्षरं क्षरणं शैथिल्य तद्रहितं अमृतं सुधां मोक्षं च क्षरन्ति प्रस्रवते ॥ २६ ॥

एतत्प्रबन्धेषु परिचयवतामग्रे सिद्धान्तान्तराणि नस्फुरन्तीत्याह

चिन्तेति- ॥ यतिवरस्य ग्रन्थाननुसन्धत्त इति यतिवर ग्रन्थानुसन्धायी तस्मिन् चिन्ताशेषाः चिन्तामात्रशेषा ये दुरर्थाः दुष्टार्थाः तैः दन्तुराणि विषमाणि यानि वचांसि तेषां कन्थाशतैः शकलशतैः ग्रन्थिलाः ग्रन्थिमन्तः सिद्धान्ताः नसमिन्धतेन वर्धन्ते यतिवरग्रन्थानुसन्धायिनः इतरसिद्धान्तानबहुमन्यत इत्यर्थः । उक्तमर्थं दृष्टान्तेन द्रढयति मुक्तेति- । मुक्तानां मौक्तिकानां शुक्तिभिः विशुद्धाया सिद्धतटिनी मन्दाकिनी तया चूडाल चूडावत् चूडापदं शिरः यस्य स तथोक्तः खण्डपरशुः शंभुः मण्डूकानां भेकानां मञ्जूषिकां पेटिकामिव स्थानभूतां क्षुद्रसारिणीं कलयेत किं वोढेत किं नवीक्षतेत्यर्थः । विबुधतरङ्गिणी क्षुद्रसारिण्योर्यदन्तरं तदन्तरं यतीन्द्रकृतान्तेतरमतयोरप्यस्तीति भावः ॥ २७ ॥

भगवच्चपरिमितबहुमतावष्टब्धे जगति परिमितमेतद्ब्रुवन्मतमिति पारिषदपार्श्ववर्त्तिनः केचित्प्रलपन्ति । प्रतिवदामितावदेतान् । (परिवृत्यावलोक्य).

भोभो देवानां प्रियाः ।

कुमतिविहितग्रन्थग्रन्थिप्रभूतमतान्तर
ग्रहिलमनसः पश्यन्त्यल्पां यतीश्वरभारतीं ।
विकटमरुभिद्वक्षः पीठी परिष्करणोचितः
कुलगिरि तुलारोहेभावी कियानिव कौस्तुभः॥२८॥

अपि च ।

स्थविरनिगमस्तोमस्थेयां यतीश्वरभारतीं
कुमतिफणितिक्षोभक्षीभाः क्षिपन्तु भजन्तुवा ।
रसपरिमलश्लाघा घोषस्फुटत्पुटभेदनं
लवणवणिजः कर्पूरार्घं किमत्यभिमन्वते ॥ २९ ॥

देवानां प्रियाः छागाः तद्वन्मूढाइत्यर्थः ।

कुमतीति– ॥ कुमतिभिः कुत्सितबुद्धिभिः विहितानां ग्रन्थानां ग्रन्थिर्मन्ति प्रभूतानि च यानि मतान्तराणि तेषुग्रहिलानि साभिलाषानि मनांसि येषां ते तथोक्ताः यतीश्वरभारतीं यतीन्द्रमतं अल्पां पश्यन्तु । तावतास्यनहैन्यसिद्धिरिति भावः । तदेव दृष्टान्तेनोपपादयति **विकटेति–**। विकटा विशाला मुरभिदो यावक्षः पीठी तस्याः परिष्करणे अलङ्कारे उचितः योग्यः कौस्तुभः कुलगिरिणासह तुलारोहे कियानिवभावी गरिमणानतुल्योभवति । तथापि मधुमथनवक्षस्थलालङ्कृतियोग्यतारूपमाहात्म्य शालीहि कौस्तुभः तथेदमपि यतीन्द्रमतं परिमितमपि सर्वातिशायीति भावः ॥ २८ ॥

अस्यमतान्तरस्थैः परिग्रहे त्यागे च गुणादोषौनास्य इत्याह **अपि चेति–**।

स्थविरेति–। स्थविराः वृद्धाः पुरातनाः । अनेन नित्यत्वं पौरुषेयत्वं च ते च ते निगमस्तोमाश्च निगमानां स्तोमाः राशयः । अनेन आनन्त्यं सूच्यते ।

अनन्ता वै वेदा इति श्रुतेः वेदानामानन्त्यं । तेषां स्थेयां संशयविषयनिश्चयाः यिक्तां यतीश्वरपद्धतिं यतीन्द्रमार्गं तत्प्रवर्तितं मतं कुमतीनां फणितिभिः यः क्षोभः कालुष्यं तेन क्षीभाः मत्ताः मूढाइति यावत् क्षिपन्तु त्यजन्तु भजन्तुवा । तत्कृतौ त्याग स्वीकारावकिञ्चित्करावित हृदयं । तेषा मेतन्मतगौरवाज्ञानं स्वाभाविकमित्येतद्दृष्टान्तेन दृढयति **रसेति–**।

(कर्णं दत्त्वा) किं ब्रूथ । नवीनमेतद्‌ब्रुवतो मतमिति ।

(सहस्तास्फालनं, विहस्य)

किञ्चित्केनापि दृष्टं प्रतिहतविषयन्त्वेन तत्तेन तैस्तै
र्द्वैं चोपादायिषातां द्वितयमपि सदित्यप्रमत्तो न वक्ता ।
इत्थं सत्येकभक्तैरितरपरिहृतौ नव्यवस्थानसिद्धिः
प्रत्येतव्यन्तदर्थ्यं पटुतरमतिभिः प्राक्तनं नूतनं वा ॥३०॥

किंच ।

तदात्वे नूतनं सर्वमायत्याञ्च पुरातनं ।
नदोषायै तदुभयन्नगुणाय च कल्पते ॥ ३१ ॥

रसपरिमलयोः श्लाघया प्रशंसया योघोषः कोलाहलः । अयं रसस्सर्वातिशायी असौपरिमलस्सर्वोत्तरइति तयोः प्रशंसया यो नागरिकाणां घोषः । तेन स्फुटाद्विदीर्यत् पुटभेदनं पत्तनं यस्यतं कर्पूरार्घं कर्पूरमूल्यं लवणवणिजः लवणविक्रेतारः किमित्यभिमन्वतेन किञ्चिदपि जानन्तीत्यर्थः ॥ २९ ॥

ते यत्किञ्चिद्वदन्तीति कृत्वा तदाकर्णनाय कर्णं दत्वा तदेवानुवदति किं ब्रूथेति–

किञ्चिदिति–॥ केनापि पुरुषेण किञ्चित्प्रमेयं यत्र कुत्राप्युपाधौ दृष्टं ज्ञातं भवति तत्तेनैव पुरुषेण तत्रैव प्रतिहतविषयं बाधितस्वरूपं भवति येवादिनः यत्किञ्चिद्वदन्ति ते च तैस्तैस्ततोपि कुशलैः प्रतिहतविषयाः दृष्टाः केनचित्किञ्चित्प्रतिपचं अन्येन वान्यत्तेद्वे चोपादायिषातां स्वीकृतेभवतां उभयमपि सदितिवक्ता अप्रमत्तो न प्रमत्त एवैवं वदतीत्यर्थः । इत्थं सति एकभक्तैः एकस्मिन् प्रीतैर्हेतोः इतरपरिहृतौ इतरस्य परित्यागे व्यवस्थानस्य व्यवस्थायास्सिद्धिर्न । एकस्मिन्प्रीत्या इतरपरित्यागे स्वीकृते वा परित्यागोस्त्विति व्यवस्थाया असिद्धिः । तत्तस्मात्कारणात् पटुतरमतिभिः अर्थ्यं अर्थादनपेतं यथार्थमित्यर्थः प्रत्येतव्यं परमार्थतया विश्वसनीयं तत्प्राक्तनं पुरातनं वास्तु नूतनं वास्तु ॥ ३० ॥

पुनरपि नवीनत्वानवीनत्वयोस्सर्वसाधारण्येन गुणदोषाप्रयोजकत्वमाह ।

तदात्व इति–॥ तदात्वे तदनीमुत्पत्तिसमये सर्वं नूतनं आयत्यामुत्तरकाले सर्वं पुरातनं च भवति एतदुभयं नूतनं पुरातनं च दोषाय न कल्पते समर्थनं न भवति गुणाय च न कल्पते ॥ ३१ ॥

गुरुः—किमेतैः किम्पचानैः । अपरे पुनरर्थसंस्पर्शिदोषवादिनः ।
प्रतिक्षिप्यन्ताम्

शिष्यः—भगवन्, निरस्तनिखिलदोषगन्धे भवन्मते कथमर्थसंस्पर्शिनो दोषाः स्वप्नेऽपि केनचिदुद्भाव्येरन् ।
इह हि ।

श्रुतिश्रेणीचूडापदबहुमते तावकमते
स्वपक्षस्यान्दोषान्वितथमतिरारोपयति यः ।
स्वहस्तेनोत्क्षिप्तैस्सखलु निजगात्रेषु बहुलं
गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः ॥ ३२ ॥

किञ्च । अभञ्जनीयः खल्वयमशेषैरपि भगवत्सिद्धान्तः । इह किल मोघप्रलापा एव मूढाः प्रतिवादवूकाः ।

निमीलयतु लोचने न हि तिरस्कृतो भास्कर
श्श्रवः स्थगयतु स्थिरं परभृतः किमुध्वांक्षति ।

किंपचानैः क्षुद्रैः किरातैः किं निरस्तैरनिरस्तैर्वा किं फलमिति भाव ।

एवं प्रबन्धसंस्पर्शिदोषवादिनः प्रत्युक्ताः । अथार्थसंस्पर्शिदोषवादिनः प्रतिक्षिप्यन्त इति विवेकः गुरुस्तदेवाह्—अपरे पुनरिति—।

निरस्तदोष इति विशेषणं साभिप्रायं कथमुद्भाव्येरन् नोद्भाव्येरन्नेव ॥

श्रुतीति—॥ श्रुतीनां श्रेणयः तासां चूडापदैः शिरोभिः वेदान्तैः बहुमते पूजिते लक्ष्मणमते यतीन्द्रमतस्य वेदान्तबहुमतत्वं स्वाभिप्रायप्रकाशनादिनिर्ध्येयं । स्वपक्षस्यान् स्वमतानुबन्धिभिः दोषान् वितथमतिः व्यर्थबुद्धिर्यं आरोपयति सः स्वहस्तेनोत्क्षिप्तैः उद्धृतैः निजगात्रेषु बहुलं यथा तथा गलद्भिः पतद्भिः जम्बालैः पङ्कैः गगनतलमालिंपति खलु अशेषैर्मतान्तरस्थैरिति शेषः ॥ ३२ ॥

अभञ्जनीयः भंक्तुमयोग्यः । मोघः प्रलापो येषां तेतथोक्ताः । प्रतिवादवूकाः प्रतिकथकाः ।

निमीलयत्विति—॥ लोचने निमीलयतु तेन भास्करः तिरस्कृतो न भवति श्रवः श्रोत्रं स्थिरं दृढं स्थगयतु निरुद्धं करोतु तेन परभृतः कोकिलः ध्वांक्षति किमुकाकवदाचरति किं काकोनभवतीत्यर्थः । कोकिलकूजितमसहमानो बालिशः मूर्खः स्वयं भ्रमतु तेन क्षितिर्नबंभ्रमीति खलु नभः आकाशं मुष्टिभिः कदर्थयतु क्लिष्टं करोतु तेन तत्क्षुभ्यते किं कथय न क्षुभ्यत एव । अयं भावः यथा भास्करप्रभामसह

स्वयं भ्रमतु बालिशो नखलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किन्नभः क्षुभ्यते ॥ ३३ ॥

गुरुः—सूनृतमेव सौम्यभाषसे । अद्य खलु सर्वप्रतिकथकसमापनप्रवृत्तस्य ते सभास्तारं सभ्यञ्चावमृशामि । (ध्यानमभिनयति)

राजा—सेनापते अयमिहास्मदुपसर्पणावसरः

सेना—मह्यमपि रोचते महाराजस्य मनीषितं (उभावुपसर्पतः)

शिष्यः—सन्निहितः खलु भगवन् सभापतिस्सेनापतिसहायः ।

गुरुः—(परिवृत्यावलोक्य) (सहर्षबहुमानं)

उदितस्सहसा स एष काले
व्यवसायातपसेवितो विवेकः ।
विनिवर्तयति स्वयं प्रजानां
विचिकित्सारजनीं विलुप्तबोधाम् ॥ ३४ ॥

अयं च ।

विवेकस्य गुणश्रेयान्व्यवसायश्चमूपतिः ।
स्वपक्षे तिष्ठमानेभ्यस्सूरिभिस्सहतिष्ठते ॥ ३५ ॥

राजा—(सविनयं) उचितमुपचरति विवेक इह सेनापतिर्भगवन्तः

गुरुः—महाराज सर्वत्र कुशली भूयाः ।

मानेन नेत्रे निमीलिते सति न तिरस्कृतो न भवति, कोकिलकूजितमसहमानेन श्रोत्रे पिहिते यथा पिकः काको न भवति, भूमेस्स्थैर्यमसहमानेन स्वयं भ्रमता यथा यथा भूमिर्न भ्रमति. नभसो विभुत्वमसहमानेन तच्छिथिलीकरणाय मुष्टोन्पातयता यथा तन्न क्षुभ्यते, तथा यतीन्द्रमतमसहमानैः यानि दूषणानि प्रतिपाद्यन्ते न तैस्तस्य क्षतिरिति ॥ ३३ ॥

सूनृतं साधुसत्यं च सर्वेषां प्रतिकथकानां समापने प्रवृत्तस्य सभास्तारं ।

उदित इति—॥ काले प्राप्तावसरे सहसा उदितः आगतः उदयं प्राप्तः व्यवसाय एवातपः तेन सेवितः यः पूर्वं विमृश्य ध्यातः एष सभापतिर्विवेकः विलुप्तबोधां प्रणष्टप्रबोधां विचिकित्सा संशयः सैव रजनी तां विनिवर्तयति । अत्र विवेक इति पुंल्लिङ्गनिर्देशात्तद्धर्माभिधानाच्च सूर्यः प्रतीयते ॥ ३४ ॥

विवेकस्येति—॥ विवेकस्य चमूपतिः व्यवसायः गुणश्रेयान् गुणे श्रेष्ठः स्वपक्षे व्यवसायपक्षे तिष्ठमानेभ्य आत्मानं प्रकाश्य तिष्ठद्भ्योस्मभ्य स्वयमागत्य तिष्ठते आत्मानं प्रकाशयन् तिष्ठतीत्यर्थः आत्मप्रकाशनार्थत्वेन उभयत्रात्मनेपदं । प्रकाशन स्थेयाख्ययोश्चेत्यनुशासनात् ॥ ३५ ॥

उचितं योग्यं यथा भवति तथा उपचरति अहमुपचरामीत्यर्थः ।

कुशलं मङ्गलं तदस्यास्तीति कुशली सर्वत्र सुहृदमात्यकोश बलादिषु ।

अपि च ।

शाक्यौलूक्याक्षपादक्षपणककपिलामर्त्यवन्द्यप्रधानै
रन्यै राम्नायचर्चाकवचधृतिकनद्गोमुखद्वीपिभिश्च ।
बह्वीयः क्षोभितापि श्रुतिरिह बहुधाजायमानेनगोप्त्रा
काले कालेभिगुप्ता कलहमतितरन्त्यक्षतारक्षतात्त्वां॥३६॥

राजा-भगवन्, अस्यखलुभवदवलोकनादेव सम्मुखीकृतसकलमङ्गलाना मस्माकमधिकोयमाशीर्वादः

शाक्येति-॥ शाक्याः बौद्धाः औलूक्याः काणादाः । कदाचित् पशुपतिरुलूको भूत्वा कणादायमुनयेवैशेषिकं मतमुपदिष्टवानिति प्रसिद्धिः ।

तन्मतनिष्टाः औलूक्याः अक्षपादनामा कश्चित् मुनिर्न्यायमतं प्रवर्त्तितवान् तन्मतनिष्टाः आक्षपादाः क्षपणकाः जैनाः कपिलः सांख्यमतप्रवर्त्ता अमर्त्यवन्द्यो बृहस्पतिः सचलोकायतमतमुत्पादितवान् एते प्रधानाः येषां तैस्तथोक्ताः तैः । आम्नायाणां चर्चामीमांसा सैव कवचः तस्यधृतिः धारणं तेन कनन्तः विलसन्तः ये गोमुखद्वीपिनः गवां मुखानीव मुखानि येषां द्वीपिनां व्याघ्राणां ते गोमुखद्वीपिनः तैश्चान्यैः । बह्वीयः बहुतरं क्षोभितापि इहलोके बहुधाजायमानेन मत्स्यकूर्मादिरूपैः बहुधावतारता गोप्त्रा विष्णुना तस्यैव किलसाधुपरित्राणदुष्कृद्विनाशधर्मसंस्थापनार्थं बहुधा जायमानत्वं श्रुतिस्मृतिषु प्रतीयते ।

अजायमानो बहुधा विजायते ।

परित्राणाय साधूनां विनाशाय च दुष्कृतां ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इच्छागृहीताभिमतोरुदेहस्संसाधिताशेषजगद्धितोसौ ।
काणादशाक्यपाषण्डैस्त्रयीधर्मोविलोपितः ।
त्रिदण्डधारिणापूर्वं विष्णुनारक्षितात्रयी ।

इत्यादिकासु । कालेकाले धर्मक्षया धर्मवृद्धिकालेषु । गीतं ह्येतत्भगवता ।

यदायदाहि धर्मस्यग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं ॥ इति ।

अभिगुप्ता अभिरक्षिता अत एव कलहं बाह्यकुदृष्टिकल्पितं अतितरन्ती अतीत्यवर्तमाना अक्षता कैश्चिदप्यखण्डिता श्रुतिस्त्वां रक्षतात् अवतु ॥ ३६ ॥

सन्मुखीकृतानि अभिमुखीकृतानि सकलानि मङ्गलानियेषां तेषामस्माकं अयमाशीर्वादोधिकः । आशीर्वादेन मङ्गलसिद्धिः खलु साभवदवलोकनादेव सिद्धास्माकमतोय मधिक इति भावः ।

गुरुः—राजन्, विमर्शकाले सुचरितवशात् सेनापतिसेवितस्सन्निहितोऽसि । तदादिश्यतामयमन्तेवासी समीहितसमर्थनाय सदसस्पतिना महाराजेन

राजा—अत्रभवदभिप्रेतमादिशामि ।

(शिष्यमवलोक्य)

सौम्यब्रह्मन्, सम्यगुपसन्नोसि सर्वविदं भगवन्तं ।

इह च ।

स्वयञ्चाप्यन्तसिद्धान्तो विभाति गुरुरेषते ।
प्रभुः प्रवदतां योभूत् सवादस्त्वं मतोमम ॥ ३७ ॥

इदन्त्विह भवता प्रथममवधातव्यं ।

शिष्यः—आज्ञापयतु महाराजः ।

राजा—सत्वस्थान्निभृतः प्रसादय सतां वृत्तिं व्यवस्थापय तस्य ब्रह्मविदागसस्तृणमिव त्रैवर्गिकान्भावय ।

विमर्शकाले विचारणावसरे । अन्तेवासी शिष्यः ममेति शेषः समीहितमिष्टं तत्समर्थनाय तन्निवृत्तये भवदभिप्रेतमिति । सत्वस्थानित्यादिना वक्ष्यमाणमभिप्रेतं । सम्यगुपसन्नोसीत्यनेन तद्विज्ञानार्थं सगुरुमेवाभिगच्छेदित्यादौ श्रुतः शिष्यगुणा प्रत्यभिज्ञायन्ते ।

प्रवदतां प्रकर्षेणावदतां प्रभुः श्रेष्टः ॥ ३७ ॥

सत्वेति—॥ सत्वेसत्वगुणेतिष्टन्तीति सत्वस्थाः तान् । निभृतः निश्चलः सविनय इत्यर्थः प्रसादय तेषां प्रसादस्त्वयि यथास्यात्तथा कुरु प्रसादहेतुश्च प्रणिपातादिः । तदुक्तं ।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्वदर्शिनः ॥ इति ।

सतां भगवत्ज्ञानवतां वृत्तिं आचारं व्यवस्थापय । तदाचरणेन व्यवस्थितां कुरु-अनेन सदाचार एवानुष्टेयः नान्यदिति ज्ञायते । श्रूयते हि ।

यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नोइतराणि इति सदाचारव्यवस्थापनं नाम स्वानुष्टानेन परेषामप्यनुष्टानापादनं अयं शिष्ट एवमाचरति हि एवमेवास्माभिरप्याचरितव्यमिति परेषां बुद्धिर्जायते ततस्तथैवानुष्टानं च ततस्तद्वृत्तिर्व्यवस्थिताभवति श्रेष्टैराचरितमेव तदितरे सर्वेप्याचरन्तीति भगवतैव गीतं ॥

नित्यंशेषिणि निक्षपन्निजभरं सर्वं सहे श्रीसखे
धर्मं धारय चातकस्य कुशलिन्धाराधरैकान्तिनः॥३८॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरेजनाः।
सयत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते॥ इति।

ब्रह्मविदागसः ब्रह्मविद्विषयादपराधात् त्रस्य बिभेहि सर्वेभ्यो हि पापेभ्यस्तस्यैव क्रूरत्वात् ततो भेतव्यमितिभावः। तस्यक्रौर्यं चनानाविधं प्रथमं तावल्लोकनिन्दाहेतुत्वंब्रह्मविदपराधं कुर्वाणं निन्दन्तीह सर्वे पापिष्ठोयमस्मिन्महानुभावे किमर्थमपराध्यतीति नरकावहत्वमन्यत्स्मर्यते हि नरकहेतुत्व ब्रह्मविदपचारस्य।

हरिकीर्त्तिं विनैवान्यत् ब्राह्मणेन नरोत्तम।
भाषागानं नगातव्यं तस्मात्पापं त्वयाकृतं॥

इत्यादिषु तस्यानारब्धानामनभ्युपगतप्रारब्धखण्डानां च दुष्कृतानां स्वस्मिन्संक्रमहेतुत्वमपरं श्रूयते हि। तस्यपुत्रादायमुपयन्ति सुहृदस्साधुकृत्या द्विषन्ता पापकृत्यामिति। ब्रह्मप्राप्तिविलंबहेतुत्वं च परं यदाहभगवान्बादरायणः।

एवं मुक्तिफलानियमस्तदवस्थावधृते स्तदवस्थावधृतेः। इति।

भाषितं चात्र भगवता रामानुजाचार्येण।

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्मभिरुत्पत्तावेवमेवकालो नियमः। तस्यापि पूर्ववत् प्रतिबन्धाभावप्रतिबन्धसमाप्तिरूपावस्थावधृतेः। अत्रापि तस्यहेतो स्समानत्वादित्यर्थः॥ सर्वेभ्यः कर्मभ्योमुक्तिफलविद्यासाधनस्य कर्मणः प्रबलत्वात् प्रतिबन्धासम्भव इत्यधिकाशङ्का। तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां सम्भवात् प्रतिबन्धसम्भव इति परिहारः। इति।

त्रैवर्गिकान् त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः त्रयोवर्गास्त्रिवर्गमिति वा तत्सम्बन्धिनः त्रैवर्गिकाः तान्त्रैवर्गिकान् त्यजन्धर्मानित्युक्तरीत्या तत्साधनभूतान्धर्मानितिवा तृणमिव भावय तदनुपादेयतां मत्वा तेषूपेक्षां कुर्वित्यर्थः। नित्ये सर्वदावर्त्तमाने शेषिणि स्वामिनि शेषेस्तीति शेषी परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं सशेषः परश्शेषीतिहितयोर्लक्षणं ततश्च स्वेतरसमस्तचिदचिद्वस्तुजातं स्वातिशयाधानेच्छयोपादानस्य भगवत एव शेषित्वमिति सिद्धं। तदुक्तमभियुक्तैः

उपादत्तेसत्ता स्थितिनियमनाद्यैश्चिदचितौस्वमुद्दिश्य श्रीमान्!

इति। नित्यशेषिणीति शेषित्वस्य स्वाभाविकत्वं द्योत्यते।

सेना—ब्रह्मन्, अवधारितं हि भवता महाराजस्य वचनं

शिष्यः—किमन्यदवधार्यं

परिचिनु निगमान्तभारतीं परिहर बाह्यजनेन सङ्गमं।
परिचरनियमेनसज्जनान्परिभवमोहमुखान्विरोधिनः॥३९॥

सकलेतरशेषित्वं भगवत एव स्वाभाविकं। श्रुतौहि।

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं।
प्रधानक्षेत्रज्ञपतिगुणेशः क्षरात्मानावीशते देव एक।

इत्यादिषु। स्मर्यते च।

परं पराणां परमः परमात्मात्मसंस्थितः।
मत्तः परतरं नान्यत् किंचिदस्ति धनंजय॥
ममाश्रयेणकश्चित्तु सर्वेषामाश्रयोह्यहं।

इत्यादिषु। सर्वं सहे आश्रितापराधान् अविज्ञातेत्युक्तप्रकारेणानवलोकयति आश्रितापराधानवेक्षमाणमतिदयालोभगवत एवसर्किलेवमाह।

मित्रभावेन संप्राप्तं नत्यजेय कथंचन।
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितं॥ इति।

उक्तानां नित्यत्वादीनां हेतुरुच्यते श्रीसखे इति। श्रीपतित्व मेवहि सर्वातिशयत्वहेतुः

अप्रमेयं हि तत्तेजो यस्य साजनकात्मजा।

इत्युक्तेः। निजभरमात्मरक्षाभरं निक्षिपचिदधानः आत्मसमर्पणरूपं प्रपदनं कुर्वन् धाराधरे मेघे एकः अद्वितीयः अन्तः निश्चयोस्यास्तीति धाराधरैकान्ती तस्य मम मेघ एव रक्षकः तदेकप्रवणस्य चातकस्य धर्मं तदैकान्त्यं सततं धारय उद्वह। अत्र

शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः।
माश्रयेद्यदि काकुत्स्थस्तत्तस्य सदृशंभवे॥

इत्यादिकमनुसन्धेयं। अत्र नित्य इत्यादि विशेषणचतुष्टयेनाश्रयणसौकर्यापादकं शरण्यगुणचतुष्टयं स्पष्टीकृतं यथा प्रपत्तव्यस्यनित्यत्वं प्रपत्तुस्समाश्रयणकृत्यत्वनिसमकालमाश्रयणहेतुः शेषित्वं च प्राप्यतयाश्रयणहेतुः सर्वसहत्वं चापराधसहतयाश्रयणहेतुः श्रीसखत्वं च पुरुषकारसाहित्येनाश्रयणहेतुः॥ ३८॥

सेनापतिः शिष्यंप्रत्याह ब्रह्मन्निति॥

किमन्यदवधार्यं अन्यदप्यवधार्यमस्तिकिमित्यर्थः।

परिचिन्विति—॥ निगमान्तभारतीं वेदान्तवाणीं परिचिनु पुनः पुनरावर्तय बाह्यः वेदबाह्यः सचासौजनश्च तेन इदं कुदृष्टीनामप्युपलक्षणं संगमं सहासिका संभाषण सन्दर्शनादिरूपं परिहर परित्यज। तदुक्तं।

गुरुः-आयुष्मन्नवहितमनाश्शृणु

शिष्यः-महानयं प्रसादः

राजा-श्रृणन् ।

प्रमाणपथविभ्रष्टप्रधानार्थविमर्दनैः ।
स्थालीपुलाकनीत्यैव निवर्त्याः प्रतिवादिनः ॥ ४० ॥

न खल्वखिलमपि निघृष्यते सुवर्णखण्डोवर्णनिष्कर्षाय

शिष्यः-यदादिशतिमहाराजः । तदहं सन्धुक्षयामि कथासमरसन्नाहाय कौतस्कुतान् । (किञ्चिदुच्चैः)

जयति सकलविद्यावाहिनी जन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरी बालसूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥ ४१ ॥

पाषण्डिनो विकर्मस्थान् बैलालवृतिकांश्शठान् ।
हेतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥ इति ।

सज्जनान् नियमेन शास्त्रोक्तेन परिचरपूजय । अत्र नियमः प्रणिपातपरिप्रश्नाभिवादनादिरूपो विवक्षितः । मोहमुखान् महामोहप्रमुखान्विरोधिनः प्रतिपक्षान् परिभव ॥ ३९ ॥

प्रमाणेति-॥ प्रमाणपथात्प्रमाणमार्गात् विभ्रष्टाः ये प्रधानार्थाः तत्तन्मतनिष्टैः प्रधानतयास्वीकृताः तेषां विमर्दनैः प्रतिक्षेपैः स्थालीपुलाकनीत्यैव स्थाल्यां पच्यमानेष्वन्नेषु पुलाकमन्नमेकमादाय परीक्ष्यान्येषां सर्वेषां यथा पक्वतां जानाति तथैवेत्यर्थः ॥ ४० ॥

ननु प्रधानार्थविमर्दनमात्रे कथं ते निरस्ताभवन्तीत्यत्राह-**न खल्विति** ।

वर्णस्य निष्कर्षायाखिलोपि सुवर्णखण्डोननिघृष्यते खलु ।

कौतस्कुतान्-कुतः कुतइति युक्तिवादिनः समरसन्नाहाय समरे वादाहवे सन्नाहः उद्योगः तस्मै सन्धुक्षयामिवर्धयामीत्यर्थः ।

जयतीति-॥ सकलाश्चताः विद्याश्च सकलविद्याः ता एव वाहिन्यः नद्यः तासां जन्मशैलः सह्यादिवदुत्पत्तिस्थानं जनिपथः संसारमार्गः तस्मिन् परिवृत्तिः पुनः पुनर्यातायातं तेन श्रान्तानां दुःखितानां विश्रान्तिशाखी विश्रमोचिततरुः शाखीत्यनेन बहुशाखत्वं तत एवनिबिडच्छायत्वं च सूच्यते । निखिलानां कुमतीनां बाह्यकुदृष्टीनां माया वञ्चनं सैवशर्वरी रात्रिः तस्याः बालसूर्यः तरुणतरणिः नाश-इत्यर्थः । निगमा एव जलधयः तेषां वेलाः कल्लोलाः तासां पूर्णचन्द्रः राकासुधांशुः । यथा राकाचन्द्रः सागरकल्लोलानामुल्लासहेतुः तथायमपि निगमानां नानाविधं बाह्यकुदृष्टिकल्पितं व्यसनमपनीय भगवत्परताप्रतिपादनेनाभिवृद्धिहेतुरिति भावः । एवं भूतो यतीन्द्रोजयति सर्वातिशायो वर्तत इत्यर्थः ॥ ४१ ॥

नेपथ्ये

तर्कव्याकृतितन्त्रशिक्षितधियः पक्षेषु बाह्येष्वपि
प्रत्यक्षीकृतपौरुषावयममीमध्ये सभं ब्रूमहे ।
वादाटोपमुपेयुषः प्रतिभटानासेतुहेमाचलं
तूलायापि तृणायवानचतुषच्छेदायमन्यामहे ॥ ४२ ॥

सेना—आर्य श्रूयते किल प्रतिभटवादिनां प्रगल्भवादः

शिष्यः—(सक्रोधं) अलमतिगर्वेण

यतीश्वरसरस्वती सुरभिताशयानां सतां
वहामिचरणांबुजं प्रणतिशालिनामौलिना ।
तदन्यमतदुर्मदज्वलितचेतसां वादिनां
शिरस्सुनिहितं मया पदमदक्षिणं लक्ष्यतां ॥ ४३ ॥

राजा—भगवन्, अभङ्गुरस्वामिभक्तेरवसरोपपन्नं
हनूमत इवेदमार्यस्य विकत्थनं ।

एतदसहमाना: प्रतिकथका वदन्ति ।

तर्केति—॥ तर्कशब्देनान्वीक्षिकीविद्या व्याकृतिर्व्याकरणं शब्दानुशासनं तन्त्रं मीमांसा तैश्शिक्षिताधीर्येषां ते तथोक्ताः बाह्येषु एतद्व्यतिरिक्तेषु पक्षेष्वपि प्रत्यक्षीकृतं साक्षात्कृतं पौरुषंपाण्डित्यं येषां ते तथा अमी अत्रवतमानाः वयं मध्येसभं सभायां मध्ये ब्रूमहे वदामः । अनेन प्रतिज्ञानार्थं निर्बन्धोस्माकं सामर्थ्यमस्तीतिद्योत्यते । आसेतु हेमाचलं सेतुः श्रीरामसेतुः हेमाचलः मेरुः तयोर्मध्यभूमावित्यर्थः वादे आटोपं गर्वमुपेयुषः प्रतिभटान् प्रतिकथकान् तूलाय तृणाय तुषच्छेदाय फलीकरणाय च नमन्यामहे । अत्यन्तलघीयसामपि तूलादीनां सदृशाश्च मन्यामह इत्यर्थः ॥ ४२ ॥

प्रतिभटभूतावादिनः प्रतिभटवादिनः तेषां प्रगल्भवादः धृष्टं वचनं ।

यतीश्वरेति—॥ यतीश्वरसरस्वतीभिः तत्प्रणीतप्रबन्धैरित्यर्थः सुरभितः आशयो हृदयं येषां ते तथा तेषां सतां चरणांबुजं चरणशब्देन प्राप्यत्वं अंबुज शब्देन भोग्यत्वं च सूच्यते प्रणतिशालिना प्रणामशोभिना मौलिना मूर्ध्ना वहनमेव सूचितं तस्मादन्ये तदन्ये तेषां यन्मतं तस्मिन्योदुर्मदः दुष्टमदः मदस्यदूषत्वं नाम असन्मत अन्यत्वे तेन ज्वलितं दग्धं चेतो येषां तेषां वादिनां शिरस्सु मया निहितं अदक्षिणं वामं पदं दृश्यतां लक्ष्यतां ॥ ४३ ॥

अभंगुरा दृढा स्वामिनि भक्तिः यस्य तस्य अवसरोपपन्नं समयोचितं विकत्थनं श्लाघावचनं हनूमत इवेत्यत्र नरावणसहस्रं मे युद्धे प्रतिबलं भवेदित्यादिक

गुरुः—(स्वगतं) क इवाभिप्राय इह विकत्थनमुद्घाटयतो विवेकस्य ।
(प्रकाशं)

श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान्निरुन्धतः ।
वल्गितं वावदूकस्य कृतिनः किन्नशोभते ॥ ४४ ॥

शिष्यः—(सविनयभयं) (स्वगतं) अतर्कितोपनतमात्मश्लाघनदोषमपमार्ष्टुमभिष्टवानि देशिकान् तद्दर्शनं च ।

(प्रकाशं)

हृद्याहृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष-
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पंक्तिरस्मद्गुरूणां ।
दिक्सौधाबद्धजैत्रध्वजपट पवनस्फातिनिर्धूततत्त-
त्सिद्धान्तस्तोम तूलस्तबकविगमनव्यक्तसद्वर्त्तनीका॥४५॥

मभिप्रेतं । विकत्थनमुद्घाटयतः विकत्थनमिति वदतो विवेकस्य कइवाभिप्रायः विरुद्धं कत्थनमिति वा विशिष्टं कत्थनमिति वा नज्ञायत इत्यर्थः ।

श्रुतीनां—॥ श्रुतीनां यस्सिद्धान्तः तस्मिन् शूरस्यानिवर्त्तनेः तद्विरुद्धान् श्रुतिसिद्धान्तविरुद्धान् बाह्यान् कुदृष्टींश्च निरुन्धतः निवारयतः कृतिनः समर्थस्य वावदूकस्य किं किंवा वल्गितं व्याहृतं नशोभते सर्वं शोभत एवेत्यर्थः ॥ ४४ ॥

गुरुसन्निधावेतत् प्रमादादुक्तमिति शिष्यस्य विनयभये सञ्जाते अतर्कितोपनतं पूर्वमतर्कितमपोढमनवधानात् उपनतमात्मनस्स्वस्य श्लाघनेन स्तुतं दोषं प्रमार्ष्टुमपहर्तुमभिष्टवानि तद्विषयस्तोत्रं करवाणि । तत्र प्रथमं तावद्देशिकानभिष्टौति ॥

हृद्येति—॥ हृद्या ज्ञानानुष्ठानसंपत्त्या हृदयंगमा हृत् हृदयं तस्मिन्पद्मं तदेवसिंहासनं तस्मिन्रसिकः प्रीतिमान्योहयग्रीवः तन्मूर्तिर्भगवान् तस्य हेषोर्मिणा हेषापरंपराणां घोषेण क्षिप्ताप्रत्यर्थिनां दृप्तिः प्रतिकथकानां दर्पो यस्यास्सा तथा बहवः गुणाः शमदमार्जवादयो यस्यास्सा बहुगुणा । दिशएव सौधानि प्रासादाः तेष्वासमन्तात् बद्धानां जैत्राणां ध्वजानां पटचलनजन्यानां मरुतां स्फात्या आधिक्येन निर्धूताः दूरोत्सारिताः तत्तत्सिद्धान्त स्तोमा एवतूलस्तबकाः सिद्धान्तस्तोमानां तूलस्तबकत्वरूपणादत्यल्पत्वानत्वं व्यज्यते । तेषां विगमनेनापायेन व्यक्ता विशदासद्वर्त्तिनी सन्मार्गः यस्यास्सा तथोक्ता एवं भूता अस्मद्गुरूणां पंक्ति र्जयति सर्वोत्कर्षेण वर्तते ॥ ४५ ॥

अथ तद्दर्शनं स्तौति—

किञ्च ।

नाथाश्लेषसनाथनश्रुतिवधूवैधव्यखेदच्छिदं
प्राचीनाश्रयपद्धतिं यतिपतिः प्राचीकशन्नैव चेत् ।
व्यासो हासपदीकृतो विगलितः प्राचेतसश्चेतसः
क्रुद्धः केलिशुकश्शुकस्य च मुधाबाधाय बोधायनः ॥४६॥

राजा—(स प्रसादं) अभङ्गुरगुरुभक्तेरार्यस्य क इव न जेतव्यः । तथाहि

अशिथिलगुरुभक्तिस्तत्प्रशंसादिशीलः
प्रचुरबहुमतिस्तद्वस्तुवासःस्वादिकेऽपि ।
गुणवति विनियोक्तुं गोपयन्सम्प्रदायं
कृतविदनघवृत्तिः किन्नविन्देन्निधानं ॥ ४७ ॥

नाथेति—॥ नाथः प्रतिपाद्यतया स्वामी भर्ता च तस्याश्लेषेण प्रतिपाद्यप्रतिपादकभावरूपसंबन्धेन सनाथनात् सनाथीकरणात् श्रुतिरेव वधूः तस्य वैधव्येन विधवात्वेन प्रतिपाद्यनायकाभावेन वैधव्यं ननु । सर्वे वेदाः यत्पदमामनन्ति इति श्रवणात् भगवानेव श्रुतीनां प्रतिपाद्यः । तत्कथमिदं वैधव्यमुच्यते बाह्यास्तावत् भगवतस्स्वरूपमेव नाभ्युपगच्छन्ति । कुदृष्टयस्तु निर्विशेषं स्वरूपमात्रमंगीकृत्य गुणविभूत्यादिकं नाभ्युपयन्ति । केचिद्भागवतः प्रकारभूतं चतुर्मुखमीश्वरं मन्यन्ते अपरे तु तं त्यक्त्वा पशुपतिमीश्वरमाचक्षते एवमेतेषामितरेतरविरोधादयसाश्वरो वेदप्रतिपाद्य इतिनिर्णयाभावात् श्रुतिवध्वाः वैधव्यं जातं तेन यः खेदः दुःखं तच्छिदं तदपहन्त्रीं प्राचीनां प्राक्तनीं बादरायणबोधायनादिभिः प्रवर्तितामित्यर्थः आश्रयपद्धतिं नीतिपदवीं एव यतिपतिः न प्राचीकशच्चेत् न प्रकाशयामास चेत् व्यासः पाराशर्यः हासपदीकृतः हासास्पदीकृतः तं सर्वेपि हसन्तीत्यर्थः प्राचेतसः वाल्मीकिः चेतसः परिच्युतः तं मनसापि न स्मरन्तीत्यर्थः शुकः वैयासिकि क्रीडार्थशुक इव क्रुद्धः अयं यत्किंचिज्जल्पतीति न तद्विषये विश्वासं कुर्वन्तीत्यर्थः सः भगवत्पादतया प्रसिद्धः बोधायनश्च परं बाधाय पीडायै भवति परस्परविरुद्धानेषः तद्ग्रन्थानां बोधायनकृता ब्रह्मसूत्रवृत्तिरपि न प्रमाण्यमवगाहेत इति भावः ॥ ४६ ॥

कइव न जेतव्यः सर्वोपि जेतुं शक्य एवेत्यर्थः । तदेवोपपादयति । तथाहीति ।

अशिथिलेति—॥ अशिथिला स्थिरा गुरोर्भक्तिर्यस्य स तथा तस्य गुरोः प्रशंसादौ तज्ज्ञानभक्त्यादिगुणकीर्तनादौ शीलं स्वभावो यस्य स तथा । आदिशब्देन तद्विषयचिन्तनादि गृह्यते तस्य वस्तुषु वस्त्राभरणादिषु वास्त्वादिकेषु गृहक्षेत्रारामादिकेषु

शिष्यः—सिद्धान्तबलादेव विजिगीषे । तदत्रसंपश्यतां महाराजः ।

निराबाधा बोधायनफणितिनिष्यन्दसुभगा
विशुद्धोपन्यासव्यतिभिदुरशारीरकनयाः ।
अकुण्ठैः कल्पन्ते यतिपतिनिबन्धानिजमुखै
रनिद्राणप्रज्ञारसधमनिवेधायसुधियां ॥ ४८ ॥

किंच ।

दृष्टेपह्नुत्यभावादनुमितिविषये लाघवस्यानुसारा
च्छास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।

प्रचुरा अधिका बहुमतिर्यस्य स तथा गुणवति शिष्ये विनियोक्तुमुपदेष्टुं संप्रदायं ब्रह्मवित्परंपराधिगतमर्थं गोपयन् अपात्रेभ्यो रक्षन् कृतवित् कृतज्ञः । ब्रह्मवेदनाभावादसत्कल्पस्य मम तत्स्वरूपाद्युपदेशेन सत्तामुत्पाद्य भगवत्कृपाजननीं शरणागतिं विधाय शरीरपातसमनन्तरमेव मुक्तिसंपदमपिदापयिष्यति । केवलकृपयैव सर्वमिदं कृतवान् अहो महानयमस्यानुभाव इत्याचार्यविषये कृतज्ञः अनघवृत्तिः अनघा दोषरहिता वृत्तिर्जीविका यस्य स तथा । यथाह मनुः—

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।
सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥

यद्वा वृत्तिः व्यापारः धर्मानुष्ठानमिति यावत् । तस्याघराहित्यं निषिद्धकाम्यानुष्ठानवैमुख्यं मुमुक्षुणा हि निषिद्धकाम्यपरित्याज्ये किं निधानं न विन्देत् सर्वमपि विन्देदेवेत्यर्थः. अत्र निधानशब्दस्संपद्वाची । प्रतिकयकजयस्यापि संबन्धस्संभाव इति ॥ ४७ ॥

सिद्धान्तबलात् गुरुप्रसादबलादेव विजिगीषे जेतुमिच्छामि ।

निराबाधा इति—॥ निराबाधाः आबाधाऽपबाधाः तद्रहिताः नकेन चिदप्येषां बाधो विद्यत इत्यर्थः बोधायनफणितिः तत्कृता ब्रह्मसूत्रवृत्तिः तस्या निष्यन्दः प्रवाहः तेन सुभगाः मनोहराः । विशुद्धेन दूषणानर्हेण उपन्यासेन व्यतिभिदुराः व्यतिभिन्नाः शारीरकस्य ब्रह्ममीमांसायाः नयाः उक्तयः येषां ते तथोक्ताः । यतिपतेर्निबन्धाः तत्कृताः प्रबन्धाः अकुण्ठैः तीक्ष्णैः प्रामाणिकैर्निजमुखैः प्रतिपाद्यार्थविशेषैः सुधियां शोभनबुद्धीनां प्रमाणशरणानां अनिद्राणा प्रबुद्धा प्रज्ञैव रसः तस्य या धमनिर्नाडी तस्या वेधाय घट्टनाय कल्पन्ते समर्था भवन्ति । लोकेऽपि तदभिज्ञास्तद्रसोन्मेषाय तत्तत् सिराः विध्यन्ति तद्वदेतेपीति भावः ॥ ४८ ॥

यतिपतिनिबद्धानां प्रज्ञाजनन सामर्थ्यं कुतोऽवगम्यत इत्यत्राह—।

दृष्ट इति—॥ दृष्टे प्रत्यक्षसिद्धेर्थे अपह्नुतेरपलापस्याभावात् अनेन सौगतमतान्मृषावादिमताच्चास्यमतस्य व्यावृत्तिरुक्ता । तन्मतद्वयनिष्ठैः प्रत्यक्ष सिद्धजगतोपला

नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धै
र्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमः कर्शनन्दर्शनन्नः ॥ ४६ ॥

राजा—किमुच्यते

नेपथ्ये—(तर्कव्याकुलीत्यादि पुनः पठित्वा)

सर्वातिशं महान् कलकलः ।

(सर्वे समाकर्णयन्ति)

शिष्यः—(यतीश्वरेत्यादि पुनः पठन्नर्धोक्ते विरम्य)

(राजानमवलोकयति)

राजा—पठ्यतां पठ्यतां ।

शिष्यः—(शेषं पठति)

राजा—आर्य, सर्वज्ञाद्भगवतस्समासादितसर्वविद्यानिधेस्त्वभवतस्सं प्रति विपश्चितामपश्चिमैरेतैरापतद्भिस्संव्यवहारेण संशयप्रशमनमिच्छामि ।

पात् अस्मन्मते प्रत्यक्षसिद्धानां सत्यत्वांगीकारात् अनुमितिरनुमानं तद्विषये अनुमेये वस्तुनि लाघवस्यानुसारात् कल्पनालाघवस्याश्रयणात् परिमाणतारतम्यसिद्धये पारिमाण्डल्याभ्युपगमे न्यायवैशेषिकपक्षयोः गौरवं त्रसरेणोरेव परिमाणाश्रयत्वांगीकारेणास्मिन् पक्षे लाघवस्यानुगमात् । तन्मतद्वयादस्यातिशय इति हृदयं । यथोक्त

कल्पना लाघवं यत्र तं पक्षं रोचयामहे ।

कल्पना गौरवं यत्र तं पक्षं नसहामहे । इति ।

विहृतिर्विवादः तद्विरहिते शास्त्रैकगम्यमेनैवावसेये निश्चेतव्येऽर्थे नास्तिकत्वप्रसाणात् नास्तिक्यपरित्यागात् । अनेन कुमारिलगुरुमताभ्यामस्य विशेषः । तन्मतद्वयेपि वेदैकगम्यस्य भगवतो नांगीकारात् तत्र तदभ्युपगमाच्च । अस्यमतस्संप्रदायागतत्वमप्यस्तीत्याह नाथेति—। नाथात् नाथमुनेः उपज्ञा प्रथमप्रमितिर्यथा भवति तथा प्रवृत्तं । प्रथमं भगवान्नाथमुनिः पराशरपाराशर्यप्राचेतसबोधायनादि परमर्षि हृदयं ज्ञात्वा मतमेतत्प्रवर्त्तितवान् । अतः तदुपज्ञं प्रवृत्त बहुभिः यामुनेयप्रबन्धैः सिद्धित्रयागमप्रामाण्यस्तोत्रादिभिः उपचितं वर्धितं यतीन्द्रैः सम्यक् त्रातं रक्षितं श्रीभाष्यवेदार्थसंग्रहादिभिस्स्थिरीकृतं इदं दर्शनं नः अस्माकं अखिलतमःकर्शनं चिदचिदीश्वरयाथात्म्यावबोधित्वादखिलाज्ञान निवर्तकम् ॥ ४६ ॥

किमुच्यते किंवक्तव्यमित्यर्थः ।

अर्धे विरम्य पूर्वार्धे विरम्येत्यर्थः । शेषमुत्तरार्धे भगवतस्समासादितानां सर्वासां विद्यानां निधेः वासस्थानस्य भवतः विपश्चितां सर्वज्ञानां अपश्चिमः प्रथमः संव्यवहारेण कथया संशय प्रशमनमिच्छामि ।

शिष्यः-(भगवंचार्यं) निशमयतु निपुणमेतन्महाराजः ।

पर्याप्तं पर्यचैषं कणचरणकथामाक्षपादं शिशिक्षे
मीमांसामांसलात्मा समजनिषि मुहुस्सांख्ययोगी समाख्यं ।
इत्थं तैस्तैर्यतीन्द्रत्रुटित बहुमृषा तन्त्रकान्तारपान्थै
रन्तर्मोहक्षपान्धैरहह किमिह नश्चिन्तनीयन्तनीयः ॥५०॥

किंच ।

यद्येतं यतिसार्वभौमकथितं विद्यादविद्यातमः
प्रत्यूषंप्रतितन्त्रमन्तिमयुगे कश्चिद्विपश्चित्तमः ।
तत्रैकत्र झटित्युपैति विलयन्तत्तन्मतस्थापना
हेवाकप्रथमानहैतुककथाकल्लोलकोलाहलः ॥ ५१ ॥

स्वर्पाणिहत्येन गर्वितेष्ववज्ञया हासः ताभ्यां सहितं यथा भवति तथा । निपुणं सम्यक् । निशमयतु ।

पर्याप्तमिति—॥ कणाचरणकथा कणादयन्थः कणानां चरणं भक्षणं यस्यस कणचरणः चरगतिभक्षणयोरिति धातुः पर्याप्तं पूर्णं यथाभवति तथा पर्यचैषं परिचितवानस्मि आक्षपादं अक्षपादकृतं निबन्धनं शिशिक्षे शिष्यान् शिक्षितवानस्मि मीमांसया कर्ममीमांसया मांसलः तुन्दिलः आत्मा मनो यस्य सतथा समजनिषि अभवं मुहुः पुनः पुनः सांख्ययोगी सांख्ययोगशास्त्रे समाख्यमाख्यातवानस्मि । इत्थमुक्तप्रकारेणान्तर्मोह मानसाज्ञानं तदेव क्षपातया अन्धैः मूढैः यतीन्द्रेण त्रुटितानि बहूनि च मृषा तन्त्राणि अप्रामाणिकमतानि तान्येव कान्ताराणि तेषुपान्थैस्तैरिह लोके तनीयः अत्यल्पमपि किंचिच्चिन्तनीयं न किंचिदपीत्यर्थः ॥ ५० ॥

यतीन्द्रकृतग्रन्थेषु सर्वथाभ्यासो मास्तु । एकस्मिन्नपिपरिचयवतोपि प्रतिकथकानस्थातुं क्षमन्तइत्याह—

यद्विति-॥ यतिसार्वभौमः यतिपतिः तेन कथितं अविद्या अज्ञानं तदेव तमः तस्यप्रत्यूषं दिनमुखं तत्प्रणाशकं यत् प्रतितन्त्रं इतरैःछद्मान्मिभिरनंगीकृतं स्वसिद्धान्तमात्राभ्युपगमं अर्थं विपश्चित्तमः कश्चिद्विद्यादपि एकत्र एकस्मिन्नेव तत्र तस्मिन् पुरुषे तत्तन्मतानि सांख्यादि मतानि तेषां स्थापनायां स्थिरीकरणे हेवाकेन इच्छया प्रथमानानां वर्धमानानां हैतुककथानां युक्तिमात्रशरणप्रसंगानां कल्लोलाः । वितनयः तेषां कोलाहलः कलकलः कल्लोलानां परस्परास्फालनजन्य इव घोषो विलयं झटित्युपैति ॥५१॥

गुरुः–महाराज, एते मोघप्रलापमुखरमुखतुन्दुभयः कलहकोलाहलकुतूहलिनः कथकाः ।

श्वावराहकलहक्रमादमी संपतन्ति निगमान्तरोधकाः ।
तानिमान्युगलवादसिद्धये वारयत्वयमसौ चमूपतिः ॥ ५२ ॥

शिष्यः–(सान्तर्हासं)

अध्यक्षं यच्छ्रुतं वा लघु तदिति भवत्यादिमो वादिमोह
स्तत्त्वोदर्कानतर्कास्तदिह जगति किं मेधया साधयामः ।
तिष्ठन्त्वेते लघिष्ठाः कतिचन दधतो मानसे मानसेतुं
हंहो सभ्यानसभ्यस्थपुटमुखपुटा दुर्जना निर्जयन्ति ॥ ५३ ॥

मोघेन व्यर्थेन प्रलापेनासंगतभाषणेन मुखराः शब्दायमानाः मुखान्येव तुन्दुभयो येषां ते तथोक्ताः कलहकोलाहले परस्परजनितकलकले कुतूहलिनः इच्छावन्तः ।

श्वावराहेति–॥ निगमान्तानां रोधकाः तत्पर्यालोचनेन विरुद्धार्थकथनात् बाधकाः बाह्याः कुदृष्टयश्चामी श्वावराहकलहक्रमात् शुनां वराहाणां च कलहेषु क्रमः परस्परमवकाशान्वेषणं तत्क्रमात्संपतन्ति आपतन्ति युगलवादसिद्धये युगलस्य वादिप्रतिवादिरूपस्य वादसिद्धयेतानिमानसौ चमूपतिर्वारयितुं संघश आपततश्चतानिवार्य एकमेकं वादाय नियुङ्क्ष्वेत्यर्थः ॥ ५२ ॥

स्वमते परोक्तदूषणमनुवदति–

अध्यक्षमिति–॥ अध्यक्षं प्रत्यक्षविषयं श्रुतमागमेषु श्रुतं वा यद्वस्तु तल्लघुयुक्तिबाधादागमबाधाद्वा सिद्धं भवतीति । अयं भावः । भेदवादिना हि भेदः प्रत्यक्षेण साध्यते उत श्रुत्या । आद्यः कल्पो न कल्पते प्रत्यक्षस्य युक्त्याबाधितत्वात् न द्वितीयः अभेदश्रुत्याभेदश्रुतेर्बाधितत्वात् । अत एतत् भेदसाधनं क्षुद्रमभवतीति परिहार इति । वादिमोह इति वादिमोहः अज्ञानं आदिमः आद्यः अहो अनादिकालादागतः मोहमात्रमेवेदमित्याशयः । तर्कैरेवाभेदस्सिध्यतीति सिद्धान्तिमतं दूषयति पूर्वपक्षी तत्त्वेति तर्काः तत्त्वोदर्कान तत्त्वं याथात्म्यं उदर्कः उत्तरफलं येषां ते तथोक्ताः तदेतत्सिद्धान्ती दूषयति तदिति यस्मात्तर्काणां वैयर्थ्यं तस्मात्कारणादित्यर्थः मेधया बुध्या किं साधयामः न किञ्चिदपीत्यर्थः । लघिष्ठाः अतिशयेन लघवः एते तिष्ठन्तु मानसे हृदये मानसेतुं मानः अभिमानः स एव सेतुं दधतः कतिचन दुर्जनाः असभ्यैर्वचनैः स्थपुटानि संभृतानि मुखपुटानि वक्त्रपुटानि येषां ते तथोक्तास्सन्तः सभ्यान्निर्जयन्ति हंहो इति खेदे ॥ ५३ ॥

निशम्यतां चेदं सभापतिसेनापतिभ्यां ।

बाधादिभिस्स्वमतहेतुगणे निरस्ते
नित्यागमप्रतिहतेषु निजागमेषु ।
प्रागल्भ्यमात्रशरणाः प्रतिवावदूका
स्संभूयवादकरणेपिनमे प्रभूताः ॥ ५४ ॥

(विहस्य) अहोन खल्वन्धैरन्धस्य यष्टिभिः प्रदीयते पङ्गवो पङ्गुभिरतिवहरं, यदेतेकर्मान्धकारप्रतिहतमतयः कुमतयो महामोहस्य साचिव्यमाचरन्ते ।

किंच ।

वशिकतटिनी वर्षारंभप्रवाहविडंबकै
रलघुभिरपभ्रश्यद्गुंभोपलंभित डंबरैः ।
उपकरणयन्त्येते बालानुदग्रकुतूहला
नुपलनिकरप्रासप्रायैरुपन्यसनक्रमैः ॥ ५५ ॥

अहहामीषां प्रतिवावदूकानां प्रवादमनुमोदमाना महामोहपक्षपातिनो गर्दभगाने सृगालविस्मयमनुस्मारयन्ति ।

निशम्यतामवलोक्यतां ।

बाधादिभिरिति--॥ स्वमते स्वकीयमते यो हेतुगणःहेतूनां युक्तीनां गण तस्मिन् बाधादिभिः बाधः असिद्धिः आदिशब्देन विरोधादिग्रहणं तैर्निरस्ते प्रतिक्षिप्ते निजागमेषु स्वशास्त्रेषु नित्यागमो वेदः तेन प्रतिहतेषु प्रागल्भ्यमात्रशरणाः धार्ष्ट्यमात्रशरणाः प्रतिवावदूकाः प्रतिकथकाः संभूय एकीभूयापि सर्वसमूहीभूयापीत्यर्थः वादकरणे वादकल्पने मेनप्रभूताः नपर्याप्ताः नसमर्थाः ॥ ५४ ॥

एतैः क्रियमाणं महामोहस्य साचिव्यं विचिन्त्य हासः । अहो इति विस्मये यष्टिरवलंबनार्थोदण्डः । अतिवहनं मार्गानयनं । कर्म प्राचीनदुरितं तदेवान्धकार तेनप्रतिहता मतिः येषां ते तथोक्ताः ।

वशिकेति -॥ वशिकाः तटिन्यः क्षुद्रनद्यः तासांवर्षारंभे येप्रवाहाः तान्विडम्बयन्तीति तद्विडम्बकाः तदनुकारिण इत्यर्थःतत् प्रवाहा हिवर्षारम्भसमय एव प्रवृत्ता तद्विरामे विरमन्ति एवमेवामुपन्यसनक्रमा अपि उपक्रमसमय एव दुरवगमाः क्षणान्तर एव विनश्यन्तीत्यर्थः । अलघुभिः विस्तृतैः अपभ्रश्यद्भिः शिथिलीभवद्भिः गुंभैः संदर्भैः उपलंभितः प्रापितः डम्बरः संभ्रमो येषांते तथोक्ताः । उपलनिकराणां ग्रासश्च र्वणं तत्प्रायैः तत्तुल्यैरित्यर्थः उपन्यसनक्रमैः उदग्रं अधिकं कुतूहलं येषां तान् बाला नुपकरणयन्ति उपकरणं कुर्वन्ति वशीकुर्वन्तीत्यर्थः ॥ ५५ ॥

गर्दभगानेषु सृगालानां विस्मयमनुस्मारयन्ति अनुस्मरणं कारयन्ति ।

राजा—सेनापते, नियम्यन्तामेते निर्भरनिगमान्तवैरविप्लुतप्रतिपत्तयः प्रत्येककथाप्रवर्तनाय ।

सेना—नियच्छामि तानेतान्निरर्थकवादाटोपात् । (परिवृत्यावलोक्य) भोभोस्त्रयीब्राह्माः क्षुद्रदृष्टयश्च ।

अलमिह मिथश्श्लाघामाद्यन्मितंपचसंमतै
रनघपरिषत्प्रत्यादिष्टैरलीकविकत्थनैः ।
अवितथकथाधौरेयाणामनुप्रसृतौ सतां
ध्रुवमिह भवद्वृत्तेराविर्भविष्यति पङ्गुता ॥ ५६ ॥

शिष्यः—भगवन्, इतः प्रसार्यतां दृष्टिः ।

माहाराष्ट्रीं मागधीं शौरसेनीं
लाटीं गौडीमित्थमन्यादृशीं च ।
अङ्गीकुर्वन्त्यागमी कृत्यदत्तां
हास्यां भाषां हन्त बुद्धार्हदाद्यैः ॥ ५७ ॥

अहन्त्वशेषभाषावेदी तत्तदभ्यस्तभाषयापि तार्किकानेतान् प्रतिक्षेप्स्यामि । वदन्ति हि पिशाचानां पिशाचभाषयैवोत्तरं देयमिति ।

निर्भरं पूर्णे निगमान्तेषु वैरं तेन विप्लुता विनाशिता प्रतिपत् ज्ञानं येषां ते तथोक्ताः ।

निरर्थकः प्रयोजनशून्यः वादेषु आटोपः गर्वः तस्मात् नियच्छामि नियमयामि वारयामित्यर्थः ।

अलमिति—॥ मिथः परस्परं श्लाघया माद्यन्तः मुह्यमानाः ये मितंपचाः क्षुद्राः तैस्संमतैः अङ्गीकृतैः अनघानामवैदिकता दोषरहितानां परिषदा गोष्ठ्या प्रत्यादिष्टैः निरस्तैः अलीकैरपरमार्थैः विकत्थनैः वृथाजल्पैः अलं । अवितथो स्वमोघासु कथासु वादेषु धौरेयाणां धुरंधराणां सतामिहानुप्रसृतौ अनुप्रसरणे भवद्वृत्तेः भवतामृत्तेः पंगुता आविर्भविष्यति ध्रुवं ॥ ५६ ॥

माहाराष्ट्रीमिति—॥ महाराष्ट्री महाराष्ट्रदेशीयां मागधीं मगधदेशीयां शौरसेनीं शूरसेनदेशीयां लाटीं लाटदेशीयां इत्थमेवमन्यादृशीं अपरिचितामिश्रस्थित बुद्धार्हताद्यैः सुगत जैनाद्यैः आगमीकृत्य शास्त्रं कृत्वा दत्तां हास्यां हासयोग्यां भाषां अङ्गीकुर्वन्ति पठन्तीत्यर्थः ॥ ५७ ॥

तत्तदभ्यस्तया तैस्तैः अभ्यस्तया भाषया प्रतिक्षेप्स्यामि । वदन्ति लौकिका इति शेषः ।

गुरुः—यथारुचि दैवीमदैवीं वा भाषां पुरस्कुर्याः । अपि तु दैव्येव विश्वहृदयङ्गमा, महाराजोपि प्रायशस्तस्यामेव बहुलदृष्टिः ।

राजा—भगवन् अतिधृष्टोयं भगवत्प्रसादगोचरो महानुभावः ॥

सेना—किमत्रचित्रं ।

कथाकलहकौतुकग्रहगृहीतकौतस्कुत-
प्रथाजलधिसंप्लवग्रसनकुंभसंभूतयः ।
जयन्ति सुधियो यतिक्षितिभृदन्तिकोपासन
प्रभावपरिपच्चिमप्रमितिभारतीसंपदः ॥ ५८ ॥

अपि च ।

विकल्पाटोपेन श्रुतिपथमशेषं विघटयन्
यदृच्छानिर्दिष्टे यतिनृपतिशब्दे विरमति ।
वितण्डाहङ्कुर्वत्प्रतिकथकवैतण्डपृतना
वियातव्यापार व्यतिमथनसंरंभकलहः ॥ ५९ ॥

शिष्यः—सभापतिसेनापतिसान्तिकं प्रवृत्तस्य दयाध्रुपदेशिकदृष्टि-वृष्टदंसितस्य कथाहवेषु कस्त्रासः ।

दैवीं संस्कृतां अदैवीं मानुषीं वा विश्वहृदयङ्गमा विश्वेषां हृदयङ्गमा । तस्या नयैव व्यवहर्तव्यं हेत्वन्तरमाह महाराजोपीति । भगवत्प्रसादस्य भगवदनुग्रहस्य गोचर विषयः महानुभावः अतिशयो यस्य स महानुभावः किञ्चित्र इदमाश्चर्यं नभवतीत्यर्थः । तदेवाह ।

कथेति—॥ कथाप्रसङ्गेन कलहं तस्मिन् कौतुकमिच्छातदेवग्रहः भूतविशेषः तेनगृहीतानां कौतस्कुतानां प्रथाप्रसिद्धिः सैवजलधिः तस्य यस्संप्लवः उद्रेकस्तस्य ग्रसने कुम्भसम्भूतयः कुम्भात्सम्भूतिः जन्मयेषां ते अगस्त्या इत्यर्थः तत्प्रसिद्ध्यपहर्तार इत्यर्थः । यतिक्षितिभृतः यतिराजस्यान्तिके समीपे उपासनस्य सेवायां प्रभावेन परिपच्चिमाः परिपक्वाः प्रमितिभारत्योः ज्ञानसाहित्ययोः संपदः समृद्धयः येषां ते तथोक्तास्सुधियः शोभनबुद्धयः जयन्ति ॥ ५८ ॥

विकल्पेति-॥ विकल्पेषु एवं वा एवंवेत्यनेकपक्षाश्रयणरूपेषु आटोपेनगर्वेणाशेषं भगवतस्स्वरूपरूपगुणविभूतिप्रतिपादनलक्षणं श्रुतिपथं वेदान्तमार्गं विघटयन् अन्यथा कुर्वन् वितण्डया अनैकान्तिकवादेनात्मं कुर्वन्तः येप्रतिकथकाः त एव वैतण्डाः गजाः तेषां पृतनासमूहः तस्याः वियातानां धृष्टानां व्यापाराणां व्यतिमथने विमर्दने यस्संरंभ तेन कलहः यदृच्छया दैवान्निर्दिष्टे यतिनृपतेः यतीश्वरस्य शब्दे उक्तो विरमति शाम्यति । अनेन यतीश्वरविरचितप्रबन्धेषु एकैकशब्दोपि यदृच्छयोक्तस्सर्वमतखण्डनाशप्रशमन इति सूच्यते ॥ ५९ ॥

अन्यच्च ।

अर्थ्या तिष्ठति मामिकामतिरसौ याजन्मराजन्वती
पत्यासंयमिनामनेन जगतामत्याहितच्छेदिना ।
तत्सारस्वतदुग्धसागरसुधासिद्धौषधास्वादिनां
प्रस्वापायन बोभवीति भगवन्मायामहायामिनी ॥६०॥

अपि च । वयमेतावन्तमनेहसमनेकसहस्रवैतण्डिकमण्डलमण्डितेषु तुण्डीर चोलपाण्ड्यकेरल कर्णाटनेपालमालवगौडलाटादि कटकेष्वखण्डिताहङ्कारा निष्कण्टकेन नीतिघण्टापथेन निगमसंचरेषु संचरमाणाः सद्भिरेव जातसख्याः सुख्यामः ।

किं बहुना ।

आस्तान्नाम यतीन्द्रपद्धतिजुषामाजानशुद्धा मति
स्त्वाव्याजविदग्धमुग्धमधुरं सारस्वतं शाश्वतं ।

सनापति सेनापतिसाक्षिणी यस्मिन्कर्मणि तद्यथा भवति तथा प्रवृत्तस्य दयैव रूपं शरीरं यस्य स तथा देशिकानामिन्द्रः स्वामी तस्य दृष्ट्या दृढं यथाभवति तथा दंशितस्य कवचितस्य ममेति शेषः ।

अर्थ्येति—॥ अर्थ्या अर्थादनपेता अर्थः प्रयोजनं जगतामत्याहितच्छेदिना आभयनिवर्तकेन अनेन संयमिनां पत्या आजन्म जन्मप्रभृति राजन्वती समीचीनाधिपयुक्ता मामिकामतिस्तिष्ठति । यस्य संयमिपतेस्सारस्वतं साहित्यं तदेव दुग्धसागरस्तस्मिन् धार सारांशस्सिद्धौषधमसकृदुष्टवीर्यं औषधं तदास्वादिनां तन्मुखां भगवन्माया भवद्विभूति भूता प्रकृतिः सैव महायामिनी महती रात्रिः प्रस्वापाय प्रसुप्तये अज्ञानाय न बोभवीति न प्रभवति । अनादिमायया सुप्त इति विभूयते ॥ ६० ॥

अनेहसङ्कालं अनेकसहस्राणि वैतण्डिकास्तैर्मण्डितेषु तुण्डीरादिकटकेषु शिबिरेष्वखण्डितः अहङ्कारो येषां ते तथा निष्कण्टकेन निर्बाधेन नीति घण्टापथेन नीतयः युक्तयः सोपबृंहणा वेदानुविधायिन्यः तासां घण्टापथः महापथः तेन निगमाः वेदाः नगराणि च तेषु संचरणानि समीचीनविचाराणि संचाराश्च तेषु सद्भिरेव जातसख्याः सुख्यामःसुखमनुभवामः । किंबहुना उक्तेनेति शेषः ।

आस्तान्नामेति—॥ यतीन्द्रपद्धतिजुषां यतीश्वरदर्शितमार्गसेविनां नः आजानशुद्धा आजन्मविमला मतिः अव्याजविशुद्धं स्वभावतो विशुद्धं । अनेन सुहृद्देवतोपासनजनित विशुद्धी व्यावृत्तिः । मुग्धं सुन्दरं शब्दसौष्ठवयुक्तं मधुरं प्रति पाद्यार्थसौष्ठवात्मनोहरं यद्वाविशुद्धमित्यनेन शब्दार्थदोष राहित्यं मुग्धमित्यनेन शब्दगत ओजःप्रसादादिगुणसाहित्य मधुरमित्यनेन अर्थगतगुणपौष्कल्य च सूच्यते । शाश्वतं

कोवाचक्षुरुदञ्चयेदपि पुरस्साटोपतर्कच्छटा
शस्त्राशस्त्रिविहारसंभृतरणास्वादेषु वादेषु नः ॥ ६१ ॥

सेना—किमुच्यते ॥

एकयैव गुरोर्दृष्ट्या द्वाभ्यां वापि लभेत यत् ।
न तत्त्रिभिरष्टाभिस्सहस्रेणापि कस्यचित् ॥ ६२ ॥

अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासना
दाचार्यादिह देवतां समधिकां मन्यामहे ।
यस्यासौ भजते कदाचिदजहद्भूमास्वयंभूमिकां
मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥ ६३ ॥

गुरुः—महाराज, भवद्भावितेन भवत्त्वमूपतिना नियमितास्त एते परमतकथकधौरेयाः प्रत्येकमुपतिष्ठन्तां । (शिष्यमवलोक्य) शृणु सौम्य, श्रुतिशिरः प्रत्यासन्नतया प्रथमसमुत्थितानां साङ्ख्यानां संप्रति स्वमतोपन्यास ।

सर्दकरूपं सारस्वतं कवनं चास्ता तिष्टतु नाम इर्वद्वितयमपि वर्तत एवेतिभावः । किमन्यदित्यत आह क इति । साटोपाः ससंभ्रमाः तर्काणां छटाः परंपराः ताभिः शस्त्राशस्त्रि शस्त्रैश्च शस्त्रैश्च प्रवृत्त युद्धं तदेव विहारस्तस्मिन् संभृतः संपादितः रणास्वादः रणरसानुभावो येषु तेषु वादेषु नः अस्माकं पुरोऽग्रे कोवाचक्षु उदञ्चयेत् उन्नमयेत् नकश्चिदपि चक्षुरुन्नमय्य विलोकयितुं शक्नुयादित्यर्थः ॥ ६१ ॥

एकयेति—॥ गुरोरेकयैव दृष्ट्या ज्ञानरूपया द्वाभ्यां दृष्टिभ्यां वालोचनाभ्यां वापि यल्लभेत प्राप्नुयात् तत्फलं कस्यचित्त्रिभिरष्टाभिस्सहस्रेण दृष्टिभिरपि न लभ्यते । अयंभावः इह जातिकस्यचित्पुरुषः गुरोः ।

गुशब्दस्त्वन्धकारस्स्याद्रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥

इत्युक्तरीत्या अज्ञाननिवर्तकस्य एकयैव तदुपदिष्टज्ञानरूपया कृपारूपयादृष्ट्या यत्फलं लभेत द्वाभ्यां दृष्टिभ्यां वा यल्लभेत तत्कस्यचिद्रुद्रस्य तिसृभिः दृष्टिभिः कस्यचिच्चतुर्मुखस्याष्टाभिः कस्यचिदिन्द्रस्य सहस्रेणापि न लभेतेति ॥ ६२ ॥

परेषां मतं परमतं तस्मिन्कथकानां वादिकानां धौरेयाः धुरंधराः प्रत्येकं पृथक् पृथक् श्रुतिशिरसः वेदान्तस्य प्रत्यासन्नतया समीपवर्तितया तेषां वेदान्तपर्यायत्वस्य अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपामित्यादि वेदान्तवाक्योदितत्रिगुणप्रकृतिस्वीकारादिति मन्तव्य । प्रथमं अग्रे समुत्थितानां साङ्ख्यानां स्वमतोपन्यासे श्रुयितामिति सम्बन्धः ।

अमी च ।

कपिलासुरिपञ्चशिखादिमुनि
प्रतिपादितसाङ्ख्यमतप्रवणाः ।
प्रकृतिं पुरुषं च विभज्यपरं
पुरुषं न पठन्त्यघरुद्धधियः ॥ ६४ ॥

शिष्यः-(स्वगतं) संप्रवृत्तेस्मिन्वादे संवननीयाश्चैते प्रथमं सभासदः (प्रकाशं)

अनुव्ययशान्तिमकरन्दरसप्रवृत्ता
नभ्यर्थयेमुरभिदङ्घ्रिसरोजभृङ्गान् ।
कामं प्रसीदत यथाहमनन्यभावः
कर्णामृतानि भवतामवतारयेयं ॥ ६५ ॥

(गुरुमवलोक्य, सविनयमञ्जलिं बध्वा) भगवन्, भवदाज्ञया प्रतिक्षिपामि तावत्साङ्ख्यान् ।

कपिलेति-॥ कपिलं ऋषिं प्रसूतं कपिलं महान्तं ।

अयं सिद्धगणाधीशस्सांख्याचार्यैस्सुसंमतः ।
लोके कपिलइत्याख्यां गन्ता ते कीर्तिवर्धनः । इत्यादिषु ।

प्रसिद्धः आसुरीनाम कश्चिदृषिः पंचशिखोपि तद्वत एतदादिभिः मुनिभिः । आदिशब्देन तेष्वनादरो द्योत्यते । प्रतिपादितं यत्साङ्ख्यमतं साङ्ख्यानांमतं तस्मिन प्रवणाः आसक्ताः । प्रकृतिं पंचविंशतितत्वात्मिकां पुरुषं जीवञ्च विभज्य मूलप्रकृतिर विकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्तषोडशकश्चविकारो नप्रकृतिर्नविकृतिरितिविविच्य-परं पुरुषं भगवन्तं अघेन पापेन रुद्धधियस्सन्तः नपठन्ति भगवदनंगीकारहेतुः प्राचीनदुरितमेवेतिभावः ॥ ६४ ॥

संवनीयाः वशीकरणीयः ।

अक्षय्येति -॥ अक्षय्या क्षयं नेतुमशक्या या शान्तिः चित्तस्याविकारत्वं सैवमकरन्दरसः तस्मिन् प्रवृत्तान् प्रकर्षेणवर्तमानान् भगवतः अंघ्रियेव सरोजे तयोभृङ्गान् मधुपान् भवत अभ्यर्थये प्रार्थयामि । अस्माभिस्तत्र किं कर्तव्यमित्यत आह । कामं प्रकामं प्रसीदत प्रसन्नाभवत अनन्यभावः नविद्यते अन्यस्मिन भावो यस्य स तथा-अहं यथा भवतां युष्माकं कर्णामृतानि कर्णानाममृतमिव सुखावहानि वचनानीत्यर्थः अवतारयेयमुत्पादयेयं ॥ ६५ ॥

भवदाज्ञया भवतामाज्ञया एते प्रतिक्षेप्तव्या इत्येवंरूपया ।

प्रधानपुरुषौ यदि प्रकृतिपश्चितैराहृतौ
परः किमपराध्यति श्रुतिसहस्रचूडामणिः ।
कुतर्कशतकर्कशैर्यदि विभुः प्रतिक्षिप्यते
भवत्परि गृहीतमप्यपहरन्तु पाटच्चराः ॥ ६६ ॥

सेना—देव ।

विश्वपतिमार्यवचसा साङ्ख्यास्संमत्य विगतसंरंभाः ।
गणयन्ति पञ्चविंशं षड्विंशं सप्तविंशं वा ॥ ६७ ॥

राजा—भगवन्, यदि खल्वेते सेश्वरता मानीताः । भजन्तु ताव द्भवत्समागोचरास्साङ्ख्यास्त्वय्यन्तपार्श्वं ।

गुरुः—महाराज, मैवं वादीः, किन्तु अभ्युपगतेश्वराणामपि साङ्ख्यानां प्रायिकसंवादयोगसमय मिद्धपरिच्छिन्नैश्वर्यैश्वरपक्षप्रणिहितचक्षुषां प्रतिवक्तव्यमयमादिश्यता मौपनिषदवादी ।

प्रधानेति-॥ प्रकृत्या मायया पन्विते बद्धैः भवद्भिरितिशेषः प्रधानपुरुषवाहृतौ यदिश्रुतिसहस्राणामनन्तश्रुतीनां चूडामणिः उपनिषत् प्रतिपाद्य अजामेकामित्यादिभिः श्रुतिभिः प्रतिपादितौ प्रधानपुरुषौ भवद्भिरङ्गीकृतौ यदि तद्वदेव वेदान्तेषु । सत्यं ज्ञानमनन्तंब्रह्म, आनन्दोब्रह्म, प्रधानक्षेत्रज्ञपतिर्गुणेशः । अनश्नन्नन्यो-भिचाकशीतीत्यादिषु प्रतिपन्नः परः उत्तमः पुरुषः किं किंवा भवतामपराध्यति अपराधं करोति । कुत्सिताः तर्काः कुतर्काः तेषां शतैः कर्कशाः कठिनाः तैर्भवद्भिर्विभुरीश्वरः प्रतिक्षिप्यते यदि भवद्भिः परिगृहीतं भवद्भिरंगीकृतमपि अर्थं पाटच्चराः चोराः माध्यमिका अपहरन्तु । कैश्चित्तर्काभासैरीश्वराभावे भवद्भिरंगीकृते तैरेव चोरादिव कैश्चित्पापिष्टाः प्रधानपुरुषावपि नांगीकुर्वन्तीति भावः ॥ ६६ ॥

विश्वेति-॥ आर्यस्य वादस्य वचसा विश्वपतिं सर्वेश्वरं संमत्यांगीकृत्य विगतसंरंभाः अपगतसंनाहाः सांख्याः पंचविंशं षड्विंशं सप्तविंशं तं गणयन्ति प्रकृति प्राकृतानि चतुर्विंशति तत्वानि परमात्मा पंचविंशकः षड्विंशः पुरुष इति केचित् पंचविंशो जीवः षड्विंशः परमात्मेति अन्ये पंचविंशः पुरुषः षड्विंशः कालः सप्तविंशः परमात्मेत्यपरे ॥ ६७ ॥

सेश्वरता अङ्गीकृते ईश्वरसहितता यदि । भवत्समायाः गोचरास्त्वय्यन्तपार्श्वं भजन्त्विति ।

मावादीः प्रायिकः बहुतः संवादः ऐकमत्यंयस्मिन्स्तथोक्तः । योगसमयः योगमतं तस्मिन्यः परिच्छिन्नैश्वर्यः ईश्वरः तत्पक्षे प्रणिहितं न्यस्तं चक्षुर्येषां सांख्यानां प्रतिवक्तव्यास्त इति शेषः ।

राजा–आविष्ट एवायमीदृशेन भवतो वाक्येन ।

शिष्यः–

य एते योगाख्ये कतिचिदपतन्त्रे पठितिनः
प्रजल्पन्त्यैश्वर्यं प्रतिफलनकल्पं भगवतः ।
स्वतस्सिद्धान् बोधप्रशकन बलादीन् गुणगणान्
गृणन्तस्त्रय्यन्ताः प्रतिफणितिरेषामवितथा ॥६८॥

सेना–देव ।

कृतं सांख्यकृतान्तस्थैः कृपणैरप्यशिक्षितैः ।
काणादमतभङ्गाय कार्यमार्यस्य शासनं ॥ ६९ ॥

राजा–नियुक्त एवायं यथार्हं निगमान्तविपक्षपक्षप्रतिक्षेपाय ।

शिष्यः–महाराज, अनुतिष्ठामि यथानियोगं ।

य एते इति–॥ योगाख्ये योगनाम्नि अपतन्त्रे तन्त्राभासे पठितिनः परिचयवन्तः य एते ये केचित् भगवत ऐश्वर्यं प्रतिफलनकल्पं आदर्शादिषु वस्तुतो सतां पदार्थानां प्रतिफलनमिव प्रजल्पन्ति । स्वतस्सिद्धान्स्वाभाविकान् बोधप्रशकनबलादीन् ज्ञानशक्तिबलप्रभृतीन् गुणगणान् गृणन्तः भोग्यतातिशयेन पुनः पुनरावर्तन्ते गुणाः तेषां गुणान् गृणन्तः वदन्तः त्रय्यन्ताः वेदान्ताः । परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च, यस्सर्वज्ञस्सर्ववित्, यस्य ज्ञानमयं तपः, सत्यकामस्सत्यसंकल्पः इत्यादयः । एषां योगशास्त्रनिष्ठानां अवितथा अमोघा प्रतिफणितिः प्रत्युक्तिः । भगवतो ज्ञानशक्त्यादीनां कल्याणगुणानां स्वाभाविकत्वं वदन्तो वेदान्ता एव तेषां बाधका इति भावः ॥ ६८ ॥

कृतमिति–॥ सांख्यानां कृतान्ते सिद्धान्ते तिष्ठन्तीति सांख्यकृतान्तस्थाः तैः कृपणैः स्वसिद्धान्तस्थापनलुब्धैरप्यशिक्षितैः सेश्वरतया विनीतैरलं पर्याप्तम् आर्यस्य वादस्य काणादमतभंगाय शासनं नियमनं कार्यं ॥ ६९ ॥

भगवता गुरुणा यथार्हं यथायोग्यं निगमान्तानां विपक्षाये पक्षास्तेषां प्रतिक्षेपाय नियुक्त एवायं । यथार्हमित्यनेन वेद विपक्षपक्षप्रतिक्षेपावसरे काणादपक्षस्यापि वेदविरुद्धत्वात् तन्निरसनं योग्यमिति व्यज्यते ।

यथानियोगं शासनमनतिक्रम्येत्यर्थः ।

इह हि ।

असद्द्रव्यसृष्टिप्रभृत्यर्थक्लृप्त्या
श्रुतिप्रक्रियाणामधिक्षेपतश्च ।
उलूकोपदेशापदेशप्रवृत्तः
कथाशेषितोसौ कणादप्रणादः ॥ ७० ॥

गुरुः–(सबहुमानमीक्षते) ।

शिष्यः–(सापहासं) आकर्णयतामिदमत्यद्भुतं महाराजेन ।

राजा–किं तत् ।

शिष्यः–एते किल कणचरणमतानुवर्तिनः परमानन्दलक्षणं परमपुरुषसाम्यमपहाय पाषाणसाधर्म्यलक्षणं मोक्षमाचक्षते । तथा च कुंभकर्ण एव विजयते । शाप एव तस्यानुग्रहस्स्यात् ।

असदिति ॥ असतः कारणभूते मृत्पिण्डादौ पूर्वमसतः कार्यभूतघटादिद्रव्यस्य सृष्टिरुत्पत्तिस्तत्प्रभृत्यर्थस्य क्लृप्त्या कल्पनेन । प्रभृतिशब्देन परमाणूनां जगत्कारणत्वं गृह्यते । श्रुतीनां वेदान्तानां याः प्रक्रियाः प्रकाराः । सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयं, तदैक्षत बहुस्यां प्रजायेयेति, तत्तेजोसृजत, ब्रह्म वा इदमेक एवाग्र आसीत्, आत्मन आकाशस्संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः सन्मूलास्सोम्येमास्सदायतनास्सत्प्रतिष्ठाः, नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणादेव समुत्पद्यन्ते नारायणे प्रलीयन्ते । इत्यादिकाः । तासामधिक्षेपतश्च उलूकस्योपदेश एवापदेशः व्याजं तेन प्रवृत्तः असौ कणादस्य प्रणादः । प्रणादशब्देनास्य निरर्थकत्वं सूच्यते । कथाशेषितः कथाशेषः कृतः कणादमतमिति कथनमात्रमेवास्यशेष इति भावः ॥ ७० ॥

परमानन्दः लक्षणं असाधारणधर्मः यस्य तं परमपुरुषेण साम्यं समत्वं । सोऽश्नुते सर्वान्कामान्सह, ब्रह्मणा विपश्चितेत्युक्तं ।

तद्गुणाभेदकृत्स्नसाम्यमपहाय पाषाणसाधर्म्यं लक्षणं यस्य स तथा च मोक्षस्य पाषाणसाधर्म्यलक्षणत्वे कुम्भकर्ण एव विजयते मोक्षलाभेन सर्वातिशायी जायेत तस्य शाप एवानुग्रहस्स्यात् मोक्षहेतुत्वेन शापस्यानुग्रहत्वं ।

राजा—सत्यमेतत् ।

सेना-देव ।

अर्धवैनाशिकास्तावदार्येणविमुखीकृताः ।
अथवैनाशिकास्त्वेते विनाश्यावेदर्दूषकाः ॥ ७१ ॥

राजा-(साशङ्कं) आर्य, पर्याप्तोसि तर्केन्द्रजालकोविदानां तथागतानां निरासे ।

शिष्यः-(सामर्षमिव) राजन्, अपर्याप्तास्त्वेते त्वद्वादिष्टस्य ममैकस्यापि प्रतिक्षेपाय ।

तथाहि ।

कथयति जडोविश्वं वैभाषिकः क्षणभङ्गुरं
परमनुमितं बाह्यं सौत्रान्तिकोमतिचैत्र्यतः ।
तदिदमनृतं योगाचारस्तथा निखिलं परे
स्ववचनहतास्सर्वे गर्वन्त्यजन्ति ममाग्रतः ॥ ७२ ॥

अर्धेति-॥ अर्धवैनाशिकाः काणादाः तेह्यागमान मनुमानानुविधायित्व मङ्गीकुर्वन्तः पृथक् प्रमाणं नाङ्गीकुर्वन्ति । परमाणूनामेव जगत्कारणत्वं ब्रह्मणोनुमानाधीनसिद्धत्वं च ब्रुवते । अत एषामर्धवैनाशिकत्वं वैनाशिकगणाः सौगतादिसमूहाः तेषां ॥ ७१ ॥

तर्केन्द्र जालकुशलतया राज्ञस्साशङ्कत्वं. पर्याप्तो सीत्यत्र किं शब्द अध्याहार्यः । समर्थस्यममासामर्थ्यं शङ्कते राजेति शिष्यस्यामर्षः ।

कथयतीति-॥ वैभाषिकसौत्रान्तिक योगाचारमाध्यमिकभेदाच्चतुर्विधास्सौगताः तेषु जडमतिर्वैभाषिकः स्वयं क्षणभंगुरं कथयति क्षणभंगुरं क्षणेक्षणे विनष्टं प्रतिक्षणमुत्पाद्यमानमित्यर्थः सौत्रान्तिकः मतिचैत्र्यतः मतिवैचित्र्यात् अयं घट अयं पटः अयमश्वः अयं हस्तीति मतिवैचित्र्यात् अनु मतं बाह्यं वस्तु कथयति अनुमितं परमिति वचनात् अनुमितस्यापि वस्तुनः त्वं नास्तीति द्योत्यते । योगाचारस्तदिदमिति तत्वं अनृतं क्षणिकं। कथयति परं माध्यमिकः निखिलं तथा नृतं असत्यं वदति अत एते सर्वे स्ववचनहताः परस्परवचन व्याहतास्सन्तः ममाग्रतो गर्वं त्यजन्ति नयत्यारोपिते परस्परव्याघातादेव निरस्तगर्वा इति भावः ॥ ७२ ॥

गर्वत्यागमेव प्रतिपादयतिसथाहीति ।

तथाहि ।

दन्तादन्तिविधानलंपटधियो दिङ्नागमुख्या जडा
श्श्रुण्वन्त्वथ विपद्यते परमियं शिक्षाभवत्पक्षतः ।
बुद्ध्वा बोध्यमुदाहरन्ति विशदं बुद्धादयश्चेज्जितं
नोचेद्धन्तजितं पुनस्तदिह न स्तूर्यन्तु जोघुष्यतां ॥ ७३ ॥

सेना-(सश्लाघं) देव परिमितगंभीरमक्षोभ्यमिदं पारिषद्वहूद्वयं-गममार्यवचनमुपश्रुत्य पलायितास्सौगतापशदा दिशंदिशं प्रविशन्ति । अपि स्वयं माध्यमिको नाम बौद्धमतनासीरवीरः कथितमपि दूषणमनादृत्य वैयात्यमात्रावष्टम्भेन पाण्डित्यं प्रख्यापयति । तदयं विशेषतोऽप्युन्मूलयितव्यः । यश्चैवमुद्धोषयति ।

भाषावैभाषिकानां शुभमनुभवतु स्वस्तिसौत्रान्तिकेभ्यो
योगाचाराः प्रयोगं विजहतु किमुतत्किंकरैश्शंकराद्यैः ।

दन्तेति । दिङ्नागोनाम कश्चिद्बुद्धमताचार्यः समुख्यः प्रधानो येषां तेदिङ्नागमुख्याः दिङ्नागो दिशागजः अत एव दन्तादन्ति विधानलंपटधियः दन्तैश्चदन्तैश्च प्रवृत्तं युद्धं दन्तादन्ति तद्विधाने तत्करणे लंपटा उत्सुकाधीर्येषां ते तथा अनेन भावच्छिन्ना एव परस्परं जिघांसव इति व्यज्यते । श्रुण्वन्त्विति साधिक्षेपवचनं श्रुण्वन्तु मम-वचनमिति शेषः इयं शिक्षा बाह्यान्तरक्षणिकत्वादिबाधिका भवत्पक्षतः युष्मत्पक्षतः परं विपद्यते शिथिलीभवति कथमिति चेत् बुद्धादयः बोध्यं प्रमेयं बुद्ध्वा ज्ञात्वा परम तस्यास्तित्वनास्तित्वादिकमुदाहरन्ति चेज्जितमस्माभिरिति शेषः बोधकपोदाहरणक्षणयो र्बौद्धैरेकस्यासिद्धत्वेन क्षणिकत्वासिद्धेरितिभावः नोचेदबुद्ध्वैवोदाहरणे वस्तु याथात्म्यमबुद्ध्वैव यत् किञ्चिद्वचनाज्जास्माभिर्जितं हन्तेति हर्षे तदुभयथापिनः अस्माकं तूर्यं विजयसूचको वाद्यविशेषः जोघुष्यते अधिकं घुष्यते ॥ ७३ ॥

पार्श्वैः परिमितमर्थबाहुल्यात् गम्भीरं दुर्विदिशं नासीरः सेनामुखं तस्मिन्वीरः सेनाग्रयायी वैयात्यमात्रावष्टंभेन धाष्ट्यमात्रावलम्बनेन उन्मूलयितव्यः ।

भाषेति । वैभाषिकानां वैभाषिकमतानुसारिणां भाषाउक्तिः शुभमनुभवतु सौत्रान्तिकेभ्यः तन्मतानुवृत्तिभ्यः स्वस्ति अस्त्विति शेषः हे योगाचाराः तन्मतानुसारिणः प्रयोगं स्वमतस्थापनायानुमानादि प्रयोगं विजहतु त्यजतु तत्किंकरैः योगाचारकिङ्करैश्शङ्कराद्यैः आद्यशब्देन भास्कर यादवयोर्ग्रहणं तैः किमु किंवा साध्यं नकिञ्चित

मिथ्या तत्वव्यवस्थाविघटनघटनोद्दण्डशौण्डीर्य चण्डो
निस्तत्वाद्वैतवादी निरुपधिककथादुर्जयो निर्जिहीते ।७४। इति

राजा—आर्य, विश्वमिथ्यात्वव्यवस्थापनो वैतण्डिकपण्डितंमन्य शून्यवादी पुनश्शून्यतां प्रापयितव्यः ।

गुरुः—भद्र सावधानमभिदध्याः ।

शिष्यः—किमत्रावधातव्यं । अयं खलु जननीवन्ध्यात्वप्रतिज्ञानसंवादिभिरयथायथप्रलापैरात्मनोपि मौनमाजन्ममरणमुपपादयिष्यति ।

अपि च ।

परस्परविघट्टनत्रुटित तर्कशस्त्रच्छटा
तिरस्कृतचमत्कृतिस्स्वयमखण्डिवैतण्डिकः ।
किमत्र परिशिष्यते किमपि दूषणोद्भावनं
स्वतो निहतमुद्गरप्रहरणप्रयासायते ॥ ७५ ॥

पीत्यर्थः । एषां दूषणमुक्त्वा स्ववैभवमाह मिथ्येति । चिन्मात्रब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वमेव मिथ्यातत्वं तस्य व्यवस्थापनमेव व्यवस्था तस्य विघटनं हननं दूषणं तस्य घटनेन उद्दण्डमुच्छृङ्खलं यच्छौण्डीर्यं सामर्थ्यं तेन चण्डः क्रूरः निरुपाधिका अकपटा या कथा तया दुर्जयः निस्तत्वाद्वैतवादी शून्यैक्यवादी माध्यमिकः निर्जिहीते निर्गच्छति । ओहाङ्गताविति धातो रात्मनेपदि लट् ॥ ७४ ॥

विश्वस्यमिथ्यात्वव्यवस्थापनवैतण्डिकेषु पण्डितंमन्यः आत्मानं पण्डितं मन्यमानः ।

जनन्याः मातुः वन्ध्यात्वस्य प्रतिज्ञानं प्रतिज्ञा तत्संवादिभिस्तत्तुल्यैरित्यर्थः अयथायथैरसत्यैः प्रलापैरात्मनस्स्वस्यापि मौनमाजन्ममरणं जन्मन आरभ्यमरणपर्यन्तमुपपादयिष्यति । मौनोपपादनयोरैकाधिकरण्यासम्भवात् परस्परव्याहतं जननी वन्ध्यात्व प्रतिज्ञावदयं वदिष्यतीति भावः ।

परस्परव्याघातेन पूर्वेव पराहतस्यास्य दूषणोद्भावनं व्यर्थमित्याह अपि चेति परस्परेति—॥ परस्परं विघट्टनेनाभिघातेन दूषणेन त्रुटिताः छिन्नाः तर्का एव शस्त्राणि तेषां छटाभिस्तिरस्कृता चमत्कृति श्लाघा स्वमतप्रशंसा यस्य सतथोक्तः वैतण्डिकः सर्वशून्यवादित्वेन स्वाप्यपक्षाभाववान् माध्यमिकः स्वयमखण्डितखण्डित अतोऽत्र किं परिशिष्यते कर्तव्यतया किमपि नावशिष्यतइत्यर्थः।तदा किमपि यत्किञ्चिद्दूषणोद्भावनंदूषणप्रकाशनं स्वतःस्वयं निहतेन मुद्गरेण प्रहरणं प्रहारस्तस्मिन् प्रयासइव भवतीत्यर्थः ॥ ७५ ॥

नेपथ्ये—पिशाचाः पिशाचाः ।

सेना—मैवं दिगंबरास्त्वेते सौगतमतनिरसनसन्तोषविषादशबलिताः प्रत्यक्षं परोक्षं च प्रमाणमनुरुन्धानाः प्रतारयन्ति पामरान् ।

शिथिलोदय सप्तभङ्गिशिक्षा
विषमोपन्यसनव्यथाविलक्षाः
मलिनास्त इमे मयूरपिञ्छ
श्रमणैरेव विलोभयन्ति मन्दान् ॥ ७६ ॥

तत्प्रतिक्षेपार्थमयमनुज्ञायतामार्यः ।

राजा—प्रतिक्षिप्तं विदधतां विहितं प्रतिषेधताम् ।
कइवात्रप्रतिक्षेपः कार्यस्स्ववचनादृते ॥ ७७ ॥

(गुरुमवलोक्य) भगवन्, अमीषामादित्यस्तम्भनपाषाणस्फोटन प्रतिमाजल्पनादिविप्रलम्भोपायानां भगवत्प्रभाव एव प्रतिक्षेपकर्ता ।

अस्मिन्नवसरेप्राप्तान्दिगंबरानवलोक्य नेपथ्यस्थितावदन्ति पिशाचाः पिशाचा इति—।

सौगतनिरसन जनिताभ्यां संतोषविषादाभ्यां शबलिताः ।

पदार्थानां क्षणिकत्वनिरासेन सतोषः परमाणुकारणताप्रतिक्षेपेनविषादः, परोक्षं अनुमानं च प्रमाणमनुरुन्धाना पामरान् प्रतारयन्ति वञ्चयन्ति । प्रतारणप्रकारमेवाह

शिथिलेति—॥ शिथिल उदय उत्पत्तिर्यस्यास्सा शिथिलोदया या सप्तभंगी स्यादस्तिस्यान्नास्ति स्यादस्ति च नास्ति च नास्तिचस्यादवक्तव्यं स्यादस्ति च नास्ति च नवक्तव्यंचेत्येवं रूपा तस्या याशिक्षा अभ्यासः तदर्थं विषमेण उपन्यसनेन याव्यथापीडा तयाविलक्षाः सलज्जाः मलिनाः मलधारणाः मलीमसाः त इमे जैना मयूरपिंछश्रमणैनेव मन्दान्विलोभयन्ति ॥ ७६ ॥

प्रतिक्षिप्तमिति—॥ प्रतिक्षिप्तं स्याचास्तीतिनिषिद्ध विदधतां स्यादस्तीत्यंगीकुर्वतां विहितं स्यादस्तीत्यंगीकृतं प्रतिषेधतां स्याचास्तीति तत्सत्त्वमनंगीकुर्वतामेषांस्ववचनादृते पूर्वापरविरुद्धवचनादृतेन्यः प्रतिक्षेपः कइवनकोपीत्यर्थः । परस्परविरुद्धानितद्वचनान्येवतेषां प्रतिक्षेप इतिभावः ॥ ७७ ॥

आदित्य स्तंभनं गतिनिरोधेन निश्चलीभूयावस्थापनं पाषाणानां स्फोटनं दलनं प्रतिमानां जल्पनं एतदादयोविप्रलंभोपायाः येषां तेषां भगवतः गुरोः प्रभावएव ।

गुरुः—महाराज, तथाविधकुहकवृत्तीनां राजभिरेव दण्डो दातव्यः ।

शिष्यः—सापहासं ।

भक्ष्याभक्ष्यस्वपरसमयस्थापनादूषणादि
ष्वैकान्त्यं येजहतिविहृतिं क्वापिनैतेविदन्ति ।
देवैरेषान्निगमपदवी दूषणोदीर्णरोषै
र्दत्तो नूनं स्थिरशिरसिजोल्लुञ्चनेनैवदण्डः ॥७८॥

शेषन्तु भगवति महाराजे चायतते ।

राजा—सेनापते, आः कष्टममीषामालोकनं उत्सार्यन्तामिते दृष्टिगोचरात्

सेना—देव, भवत्प्रतापतपनप्रतिहतदृष्टयो दिवाभीता इवानार्याधिष्ठितेषु गिरिगह्वरेषु निभृतं निलीयन्ते ।

राजा—के पुनरेते क्षपणकादिवदनैगमिकलिंगधारिणः किमप्युग्रं व्रतमास्थाय तापसविडंबिनस्त्र्यन्तमुपरुन्धते प्रमथगणानुकारिणः केचित् ।

गुरुः—एतेव नैगमिकधर्मकलमोपमर्दिनः कटङ्करीया इव दूरतः परिहरणीयाः ।

कुहक वृत्तीनां कपटवृत्तीनां ।

भक्ष्येति—॥ भक्ष्याणि चाभक्ष्याणि च तेषु स्वपरसमयोः स्थापनादूषणादिषु च ऐकान्त्यं ये जहति त्यजन्ति एते क्वापि विहृतिं न विन्दन्ति न जानन्ति । निगमपदवी वेदान्तोक्तमार्गः तस्य दूषणेन उदीर्णदोषैरभिवृद्धरोषैः देवैः स्थिराणां शिरसिजानां केशानां उल्लुंचनेनैव उन्मूलनेनैव दण्डोदत्तः ॥ ७८ ॥

अनार्यैः म्लेच्छादिभिः अधिष्ठितेषु ।

अनैगमिकानि अवैदिकानि लिंगानि चिन्हानि तद्धारिणः, उपरुन्धते वारयन्ति प्रमथगणाः तदनुकारिणः तत्स्वरूपा इत्यर्थः ।

नैगमिकधर्माः वैदिकधर्माः त एव कलमाः सस्यानि तदुपमर्दिनः कटंकरीयाः यूथाभ्रष्टाः सस्यभक्षकागाव इव ।

स्वयमेव दूरीभवन्तीत्येतदेव दर्शयति—यथेति ।

शिष्यः—स्वयमेवैते दूरीभवन्ति ।

यथा ।

कपिलकणादबुद्धकपलुञ्छनतन्त्रकथा
कलकलकोविदेषु कथकेषु गलन्मतिषु ।
मुनिवरसापराधजनमोहनकौतुकिना
पशुपतिना यदुक्तमपयान्त्यथतत्प्रवणाः ॥ ७६ ॥

सेना—देव, अमी पुनरार्यवचनमसहमाना दिगम्बरादिवत् केनापि विप्रलम्भोपायेन स्वसिद्धान्तश्रद्धासंवर्द्धनाय प्रयतन्ते, अत्र तावदिमां प्रत्यायनामाचरन्ति, यदकाण्ड एव वर्षासमयमादिशन्ति ।

नेपथ्ये—पलायध्वं पलायध्वं ।

राजा—किं किं (इत्यवलोकयति) ।

कपिलेति—कपिलादीनां तन्त्रेषु कपलुञ्छनो जैनः याः कथाः प्रसंगाः तासां कलकलेषु कोलाहलेषुकोविदेषु समर्थेषु कथकेषु गलन्मतिषु भ्रश्यद्बुद्धिषुसत्सुमुनिवरे गौतमे सापराधा अपराधकारिणः येजैनाः तन्मोहने कौतुकिनाइच्छावता पशुपतिना यच्चास्त्रमुक्तं पाशुपतं तत्प्रवणाः तन्निष्ठाः अपयान्ति अपसर्पन्ति । पुराकिल कदाचित् गौतमे केचिद्ब्राह्मणाः किंचिदसत्कारं कृत्वा सापराधा बभवन् सचगौतमः ।

त्रिपुण्ड्रधारिणो यूयंभस्मोद्धूलनतत्पराः ।
भविष्यथत्रयीबाह्यामिथ्याज्ञानप्रवर्त्तका ॥ इति ।

तान् शशाप । पशुपतिश्चतान् मोहयितुकामः पाशुपतमकरोत् । तेचतदभ्यासेन गौतमशापवशात्त्रयीबाह्यास्तद्व्रतनिष्ठा अभवन्नितिपौराणिकी कथा ॥ ७६ ॥

विप्रलंभोपायेन वञ्चनोपायेन स्वसिद्धान्ते श्रद्धासंवर्धनाय प्रत्यायनां विश्वासहेतुमाचरन्ति, अकाण्डे अकाले वर्षासमयं वर्षाकालं ।

बलाहकमालामालोक्यवर्षंभविष्यतीति बुद्ध्यापलायध्वमिति वदन्ति ।

सेना—नान्यत्किञ्चित् ।

अक्ष्णोरञ्जनवर्तिकायवनिकाविद्युन्नटीनामियं
स्वर्गङ्गायमुनावियज्जलनिधेर्वेलातमालाटवी ।
वर्षाणां कबरीपुरन्दरदिशालङ्कारकस्तूरिका
कन्दर्पद्विपदर्पदानलहरी कादम्बिनीजृम्भते ॥८०॥

किञ्च ।

प्रत्यग्रप्रतिबुध्यमानकलिका नीरन्ध्रनीपाटवी
निस्साधारण निस्सरन्मधु सुधासौरभ्यसारस्पृशः ।
क्रोडादम्बुमुचाङ्कुरन्तिकतिचित्क्रोडीकृतादन्तिभि
र्धारासिक्तवसुन्धरासुरभयो जंभासमीराङ्कुराः ॥८१॥

(सर्वेससंभ्रमाद्भुतमवलोकयन्ति) ।

अक्ष्णोरिति—अक्ष्णोर्नयनयोरञ्जनवर्तिका कज्जलशलाकास्वकान्त्यानयनानाम भिनेत्वं आपादयन्तीविद्युतामेवनटीनां नर्तकीनां यवनिका तिरस्करणीयथानर्तक्यो यव-निकायामन्तर्हिताः स्वावसरे रंगमागत्यनृत्यन्ति तथा विद्युतोऽपि कालिकायामन्तर्हिता मध्येमध्येस्वात्मानं प्रकाशयन्तीति । स्वर्गंगायाः मन्दाकिन्याः यमुनानेत्याद्यमुनात्वं यथात्रभागीरथीतियमुनासंगच्छते तथाकाशगंगापि कादंबिनीपरिचुंबिनीविभातीतिभाव वियदेव जलनिधिभूतस्य वेलायां तीरेवर्तमाना तमालाटवी तमालवनं नभसोनेत्या-ज्जलधिस्वरूपयां । वर्षाणां प्रावृषः कबरीकेशपाशः पुरन्दरदिशायाःप्राच्या अलंकारार्थं मालिप्ता कस्तूरिकाकन्दर्प एवद्विपः तस्य दर्पदानलहरी मदजलोद्रेकप्रवाहः कादंबिनी मेघमालाजृम्भते ॥ ८० ॥

प्रत्यग्रेति—प्रत्यग्राः नवीनाः प्रतिबुद्ध्यमानाः विकसन्त्यः याः कलिकाः कोरकाः ताभिर्नीरन्ध्रानिबिडायानीपाटवी शिलिन्ध्रवनं तस्याःनिस्साधारणंमधु यथा-भवति तथा निस्सरत् निर्गच्छन्मधुतदेव सुधातस्याः सौरभ्यसारं स्पृशन्तीति तत्स्पृशः दन्तिभिः क्रोडीकृताः आघ्राताः तदाघ्राणे हेतुः धारासक्तया वर्षधाराभि स्सिक्तया वसुन्धरया सुरभयः आमोदवन्तः जंभासमीराणां जंभामरुतां अंकुराः अंबु-मुचां मेघानां क्रोडादुदराद्युगपदेककाले वरन्ति निर्गच्छन्तीत्यर्थः ॥ ८१ ॥

राजा—भगवन्किमस्त्येषां प्रतीकारः

गुरुः— किमस्माभिरत्रयतितव्यं ।

सकैटभतमोरविर्मधुपरागजञ्झामरु
त्हिरण्यगिरिदारणस्त्रुटितकालनेमिद्रुमः ।
किमत्रबहुना भजद्भवपयोधिमुष्टिन्धयः
कथन्नभवतिस्वयं कपटकर्मनिर्मूलनः ॥ ८२ ॥

(सर्वे सहर्षविस्मयं) प्रसन्नाः खल्वेतादिशोविदिशश्च ।

गुरुः—भक्तजनवत्सले भगवति प्रसेदुर्षि किन्नामनप्रसीदति ।

राजा—भगवन्, अमीपुनस्सात्वतं शास्त्रमधीयानास्त्रय्यन्तवादिभिरैक्यमिवापन्ना बल्वजप्रायबहुविधविद्याजल्पविमुखीकृतमानसा बहिरन्तश्च शुद्धाः श्वेतद्वीपवासिन इव शुभंयवः पुरुषास्तामिमामौपनिषदी परिषदमुपजिगमिषन्ति ।

स इति—॥ कैटभ एव तमः तस्य रविः तन्निरासक इत्यर्थः मधुः मधुनामासुरः स एव परागः रजः तस्य जंझामरुत् जंझामरुता हि परागश्शाम्यति हिरण्यः हिरण्यासुरः स एवगिरिः तस्य धारणः भेदकः त्रुटितः छिन्नः कालनेमिरेव द्रुमः येन सतया कालनेमिनामा कश्चिदसुरः अत्रभगवतः आश्रितविरोधिनिवर्तकत्वे बहुनोक्तेन किं नास्यैहिकफलविरोधिनिरासकत्वमात्रं अपितु मोक्षविरोधिनिवर्तकत्वमस्ती त्याह भजदिति—। भजतां भक्त्याप्रपत्त्या वा मामाश्रयतां भवपयोधेः संसारसागरस्यमुष्टिन्धयः मुष्टिभिः पिबतीति मुष्टिन्धयः निवर्तक इत्यर्थः एवंभूतस्सभगवान् कपटकर्माणां कृत्रिमकर्मणां निर्मूलनं कथं न भवति भवत्येवेत्यर्थः ॥ ८२ ॥

किन्नाम न प्रसीदति सर्वं प्रसदत्येवेत्यर्थः ।

पाशुपतदूषणानन्तरं पांचरात्र प्रामाण्य समर्थनाय आरभते अमीपुनरिति पुनश्शब्दः विशेषद्योतकः सात्वतं पांचरात्रं, ऐक्यमापन्ना इवस्थिताः बल्वजाः तृणविशेषाः तत्प्रायाः तत्तुल्याः बहुविधाश्चया विद्यास्ता एव जल्पः प्रलापः तस्माद्विमुखीकृतं मानसं येषांते तथा बहिरन्तश्च शुद्धाः शुद्धवेषाः शुद्धमनसश्चात एवे श्वेतद्वीप वासिन इवस्थिताः शुभंयवः शुभवन्तः औपनिषदीं उपनिषच्चिन्त्यातां परिषदं पारिषदानां उपनिषच्चिन्त्यत्वात् परिषदप्यौपनिषदी उपजिगमिषन्ति उपगन्तुमिच्छन्ति ।

अपि च ।

परमपुरुषप्रत्यासत्याविमुक्तपृथग्जना
स्तदभिगमनोपादानाद्यैरवन्ध्यमनोरथाः ।

परमेति–॥ परमः यस्मात्पर उत्कृष्टोनास्ति सपरमः सचासौ पुरुषश्च परमपुरुषः सचनारायणः तस्यैवहिपरमपुरुषत्वं श्रुति स्मृतिभ्यो अवगम्यते ।

विश्वतः परमं नित्यं विश्वन्नारायणं हरिं ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥
ऋतँ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ।
पुरुषस्सपरः पार्थभक्त्यालभ्यस्त्वनन्यया ॥
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरस्सर्वाणिभूतानि कूटस्थोक्षरमुच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
योलोकत्रयमाविश्य बिभर्त्यव्ययईश्वरः ।
यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ॥
अतोस्मिलोके वेदेच प्रथितः पुरुषोत्तमः ।

इत्यादिभ्यः । तस्मिन् प्रत्यासत्यानन्यभक्त्या विमुक्ताः विशेषेणमुक्ताः पृथक्जनाः तदितरजनायैस्ते तथा ।

अद्यप्रभृतिहेलोका यूयं यूयं वयंवयं ।
अर्थकामिपरा यूयं नारायणपरा वयं ॥
नास्तिसंगतिरस्माकं युष्माकं च परस्परं ।
वयंतु किंकराविष्णोः यूयमिन्द्रियकिंकराः ॥

इत्याद्युक्तप्रकारेण संसारिषु विमुखाः तस्याराधनरूपैः अभिगमनोपादानाद्यैः । आद्यशब्देनेज्यास्वाध्याययोगास्संगृह्यन्ते । अभिगमनादीनां भगवदाराधनत्वं चोक्तं अभियुक्तैः ।

अभिगच्छन्हरिं प्रातः पश्चाद्द्रव्याणि चार्जयन् ।
अयजंश्च ततोदेवं ततो मन्त्रान् जपन्नपि ॥
ध्यायन्नपि परंदेवंकालेष्वन्येषु पंचसु ।
वर्त्तमानस्सदाचैव पांचकालिकवर्त्मना ॥
स्वार्जितैः गन्धपुष्पाद्यैः शुभैश्शक्त्यनुरूपतः ।
आराधयन्हरिं भक्त्या गमयिष्यामि वासरान् ॥

नमतिदिविषद्वर्गेनाथप्रभावसमीक्षया
जहति तइमेमानाटोपं परस्परजीविताः ॥ ८३ ॥

किमेतन्मते प्रतिवक्तव्यमस्त्यार्यस्य ।

गुरुः–(मूर्धानमान्दोलयन् कर्णौपिधाय) न खलु न खलु ।

नबाधः प्रतिरोधोवा
वेद सात्वतयोर्मिथः ।
कुदृशान्तभ्रमोवार्य
श्श्रुत्योरिव परीक्षकैः ॥ ८४ ॥

अवन्ध्याः सफलाः मनोरथाः येषां ते तथोक्ताः नाथस्य भगवतः प्रभावस्य माहात्म्यस्य समीक्षया सम्यग्दर्शनेन ।

दुराचारोपि सर्वाशी कृतघ्नो नास्तिकः पुरा ।
समाश्रयेदादिदेवं श्रद्धया शरणं यदि ॥
निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः ।

इत्युक्तरीत्या भगवद्वैभवदृष्ट्यादिविषदां देवानां वर्गसमूहेनमति प्रणमति सति प्रणमन्तदेवता इत्युक्तः मानाटोपं अभिमान जन्यं संभ्रमं जहति त्यजन्ति पुन कीदृशाः परस्परजीवितानि तेषां ये तथा जीवितशब्दे.त्र प्राणवाची । ८३ ।

एतन्मते पांचरात्रमतेपि

अवणानर्हवचश्रवणं माभूदिति कर्णा पिधानं ।

प्रतिवक्तव्यं नास्ति खलु । वीप्सात्वरा सूचयति–नेति ॥

नेति–॥ वेदसात्वतयोः मिथः परस्परं बाधः प्रतिरोधो विरोधोवानास्ति बलवता दुर्बल स्यबाधः तुल्य बलयोः विरोधः किंतुपरीक्षकैः निरूपकैः कुदृशां कुत्सित ज्ञातानां कुदृष्टीनां इत्यर्थः भ्रमः वार्यः निवर्त्यः । कथं श्रुत्योरिव । सगुणनिर्गुण श्रुत्योः विरोधभ्रम इव ब्रह्माभेदवादिभ्या अभेदवादिन्याश्च विरोधभ्रमइव यथा ।

नित्योनित्यानां चेतनश्चेतनानामेकोबहूनां योविदधाति कामानिति काचित् जीवपरयोः भेदं वदति ।

नेहनानास्ति किंचनेति काचिदभेदमनयोर्विरोध इति केषुचित् भ्रमो जायते । जीवेश्वरयोः स्वरूपभेदपराभेद श्रुतिः प्रकारप्रकारतातिरेकेण पृथक्भूतवस्त्वान्तराभावपराचेयंभेद श्रुतिरिति परीक्षकैः सन्निवृत्तिः क्रियते सद्गुतिरितिभावः ॥ ८४ ॥

शिष्यः-तदहं वारयामि, शृण्वन्तु च परमपुरुषप्रणीते पञ्चरात्रतन्त्रे तन्त्रान्तरवत्प्रादेशिकदोषोत्प्रेक्षकाः पण्डितंमन्याः ।

आरोहन्त्वनवद्यतर्कपदवीसीमादृशां मादृशां
पश्चेकार्तयुगेनिवेशितपदाः पक्षेपतद्भ्यः परान् ।
सर्वानुश्रवसारदर्शिसशिरःकम्पद्विजिह्वाशन
क्रीडाकुण्डलमौलिरत्नघृणिभिस्साराात्रिकास्सूक्तयः॥८५॥

कुदृशां भमोवार्य इत्युक्तं गुरुणा तदेव आह शिष्यः वारयामीति-।

परमपुरुषप्रणीते भगवत्प्रोक्ते पांचरात्रे । भगवत्प्रणीतत्वं च पांचरात्रस्य महाभारते प्रसिद्धं-।

पंचरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयं । इति ॥

प्रादेशिकस्य क्वाचित्कस्य दोषस्योत्प्रेक्षकाः । शृण्वन्तु इति संबन्धः । सच दोषः परब्रह्मरूपाद्वासुदेवात्संकर्षणोनाम जीवो जायते सङ्कर्षणात्प्रद्युम्नसंज्ञमनोजायत । इत्युक्तं जीवोत्पत्तिवचनं जीवात्मनश्च उत्पत्तिवचनं चास्योभयस्यापि विदोषत्व श्रुतिविरोधात् । नजायते म्रियते वाविपश्चित् ।

एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच ।
खंवायुर्ज्योतिरापः पृथिवीविश्वस्य धारिणी ॥

इति श्रूयते । तत्किमित्यत आह आरोहन्त्विति-।

आरोहन्त्विति-॥ अनवद्या निर्दोषा या तर्काणां पदवीमार्गः तस्यास्सीमा चरमावधिः तद्द्रष्टं तत्पारदर्शिनां मादृशामस्मादृशां कार्तयुगे कृतयुगसंबन्धिनो कृतयुगानुष्ठेयेपथे निवेशितपदाः कृतपदन्यासाः । सर्वे च ते अनुश्रवाश्चसर्वानुश्रवः तेषां सारं तेषां तात्पर्यं पश्यतीति सर्वानुश्रवसारदर्शी सशिरःकंपः हर्षातिशयेन शिरः कंपसहितः सर्वानुश्रवसारदर्शिसशिरःकंपश्चयो द्विजिह्वाशनः तस्य क्रीडाकुंडलस्य क्रीडया कुण्डलायितस्य सर्पस्य मौलि रत्नानां फणामणीनां घृणिभिः किरणैः स्साराात्रिकाः सनीराजनाः सूक्तयः सात्वतसंहिताः । अनन्तस्य श्लाघयाशिरः कंपवचनं । तस्यापि संहिताविशेषकर्तृत्वात् पक्षेपतद्भ्यः पक्षपातिभ्यः परान् पक्षपातविधुरान् आरोहन्तु आक्रामन्तुवशीकुर्वन्त्वित्यर्थः ॥ ८५ ॥

निरूपितं हि सात्वतप्रामाण्यं निखिलनिगमव्यसनव्यसनिना-मतिमन्थाननिर्मथितनिगमसिन्धुसमुदितमहाभारतचन्द्रचन्द्रिकानिरवशेषमुषितभुवनभवनोदरतिमिरेण बादरायणेन भगवता नारायणेन।

तत्र च।

स्वतस्सर्वावेक्षी श्रुतिशतशिरस्त्राणचरण
स्स्वभृत्यान्स्त्रातुं यदिदमनघन्तन्त्रमकृत।
इदं श्रेयः पुण्यं हिततममितीव व्यपदिशन्
मुनिः पाराशर्यः प्रकटयति मानन्तदखिलं॥८६॥

नास्माभिरिदानीं तत्प्रामाण्यं समर्थनीयं पूर्वमेव महर्षिणासमर्थितमित्याह

निरूपितमिति–॥

निखिलानां निगमानां व्यसनं विभजनं तस्मिन् व्यसनिना अभिनिवेशवता मतिरेवमन्थः तेननिर्मथितः निगम एव सिन्धुः तत्समुदितः महाभारत एव चन्द्रः तस्य चन्द्रिकया तज्जन्यज्ञानेन निरवशेषं यथाभवति तथा मुषितमपहृतं भुवनमेव भवनंतस्योदरे अभ्यन्तरे वर्तमानं तिमिरमज्ञानरूपं यस्य तेन बादरायणेन पराशरपुत्रेण

द्वीपे बदरिकामिश्रे बादरायणमच्युतं।
पराशरात्सत्यवती पुत्रं लेभेपरंतपं॥ इति हि।

स्मर्यते। अत्र अच्युतमित्युक्ते नारायणेनेति कथितं भवति बादरायणस्य भगवदवतारविशेषत्वमन्यत्रापि स्मृतं।

कृष्णद्वैपायनं व्यासं विद्धिनारायणं प्रभुं।
कोह्यन्योभुवि मैत्रेय महाभारतकृत्भवेत्॥

स्वतेति–॥ स्वतस्सर्वावेदी सर्ववस्तुसाक्षात्कारसमर्थः स्वत इत्यनेन विज्ञानपरायत्तमिति ज्ञायते अनेन नित्यमुक्तव्यावृत्तिः तेषां हि भगवत्प्रसादायत्तं श्रुतिशतानां शिरस्त्राणमुष्णीषं चरणं यस्य स तथा अनेन सर्ववेदप्रतिपाद्यचरणत्वं सूच्यते श्रुतं ह्येतत्। **सर्वेवेदायत्पदमामनन्ति** इति। यच्छब्दः प्रसिद्धिपरः। इदमित्यनेन सात्विकजनैः परिपाठ्यमानत्वं विवक्षितं। अनघं तन्त्रान्तराणां दोषवत्वं व्यज्यते। तन्त्रं पांचरात्रशास्त्रं स्वभृत्यान्स्त्रातुं यदकृत इदं श्रेयः श्रेयस्साधनवृन्दं पापहरं हिततममतिशयेन हितमिति व्यपदिशन् पाराशर्यः। **सहोवाचव्यासः पाराशर्य** इति श्रुतेः प्रत्यभिज्ञापनार्थोयं शब्दः मुनिः भगवद्गुणमननशीलः तत्सात्वतमखिलं प्रमाणं प्रकटयति॥ ८६॥

सेना—देव अपर इवायंपाराशर्यः पञ्चरात्रतन्त्रं प्रतिष्ठापितवान् ।

राजा—भगवन्, गुरुकुमारिलमतानुसारिणः किमेतैर्निरसनीया भवद्भि-र्भ्येणा ।

गुरुः—महाराज, अमीपुनरागमाभिरक्षणप्रवृत्ता वेदान्तपरित्यागिनस्तोष-यितव्या भीषयितव्याश्च ।

शिष्यः—(सापहासं)

निरस्ताखिलदोषेषु निगमान्तेषु सत्स्वमी ।
कथं सदसिमीमांसा कबन्धमनुरुन्धते ॥८७॥

अयं खल्वखिलवैदिकसदशिखामणीनामध्यात्मविदांनिर्णयःपा-पवत्परित्यक्तकाम्यधर्मैर्नित्यनैमित्तिकानुष्ठाननिष्णातै विष्णुभक्तैर्भवितव्य-मिति । अत एवकर्मब्रह्ममीमांसयोरैकशास्त्र्यमामनन्ति सन्तः ।

गुरुः प्रभाकरः कुमारिलः भट्टः तन्मतानुसारिणः आगमाभिरक्षणप्रवृत्ततया तोषयितव्याः वेदान्तपरित्यागितया भीषयितव्याश्चेति ।

विवेकः तेषां वेदान्तवैशिष्ट्यापरिज्ञानं ज्ञात्वा अपहासः तदेव आह निरस्तेति—॥

निरस्तेति—॥ निरस्ताः प्रतिक्षिप्ताः अखिलाः दोषाः येषां तेषु निगमान्तेषु सत्सु अमी पूर्वोक्ताः सदसि विद्वत्सभायांमीमांसायाः कबन्धान् छिन्नशिरसः शरीरं अनुरुन्धते अनुसरन्ति । ब्रह्मभागस्य वेदशिरस्त्वात् तद्रहितस्य पूर्वभागमात्रस्य कब-न्धत्वं ॥ ८७ ॥

विद्वन्निर्णयविरुद्धत्वाच्चायं पक्षो नसाधीयानित्याह अयं खल्विति—॥

अखिलानां वैदिकसदसां वैदिकगोष्टीनां येशिखामणयः चूडारत्नानि तेषामध्या त्मविदां आत्मानं ।

चेतना चेतनात्मभूतं परमात्मानमधिकृत्य प्रवृत्तं शास्त्रमध्यात्मं उपनिषदः तद्विदां तत्प्रतिपाद्यब्रह्मविदां अनेन विशेषणद्वयेन भागद्वयात्मकवेदप्रतिपादिता चारनिरतत्वं प्रतीयते ।

कोसौ निर्णय इत्यत आह पापवदिति—। पापवत् ब्रह्महत्यादिपापानीव परि त्यक्ताः वासनाः याभिस्तदुत्यक्ताः काम्यधर्माः येस्ते नित्याः नैमित्तिकाश्च धर्माः

राजा—(सपरितोषं) भगवन्, यथा श्रुतं यथाहृदय मुपपाद्य स्वपक्षं रक्षता परपक्षांश्च प्रतिक्षिपता प्रशमितनिगमान्त खेदेनभवदन्ते वासिना स्थूणानिखननन्यायेन स्थिरीकृतमिदं सम्यग्ज्ञानं । तथा प्यामुक्तनिगमकञ्चुकानाममुक्तबाह्यवर्त्मनां कथंप्रतीकारः ।

गुरुः—(सान्तर्हासं) ।

नियत्यावैयात्यान्निगमपदवीमुज्झितवतां
परेषामेतेषां परिहसनगुम्भार्हवचसां ।
पुरन्ध्रीसम्भाव्यस्वमतरुचिनीरन्ध्रितधिया
महङ्कारं सोढुं प्रभवति कथं कारमवनिः ॥८८॥

तेषु निष्णातैः निष्ठावद्भिः विष्णुभक्तैः विष्णौ चेतनाचेतनवस्तु नामात्मतया व्यापके भगवति भक्तिमद्भिः भवितव्यमिति अत्राप्याद्यविशेषद्वयेन पूर्वभागोदितधर्मानुष्ठातृत्वं तृतीयेन ब्रह्मभागोदितभगवद्भक्तिनिष्ठत्वं च व्यञ्जितं । एवमाचारनिर्णयात् पूर्वोक्तभागात्मकवेदस्यैकशास्त्र्यं सिद्‍ध्यतीत्याशात एवेति–।

यतो भागद्वयात्मकवेदोदित कर्मानुष्ठानमेकस्मिन्नेवाधिकारिण्यवश्यं भावि अत एव हेतोरित्यर्थः । यत आमनन्तीत्यत्र संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेति शास्त्रैकत्वसिद्धिरितिवचनमनुसंधेयं ।

यथा श्रुतं श्रुतमनतिक्रम्य । गुरुमुखात्यथा श्रुतं मया यथा हृदयं वेदान्ततात्पर्यमनतिक्रम्येत्यर्थः उपपादयता उपपत्तिभिः समर्थयता प्रशमितः निगमान्तानां खेदो येन तेन भवता अन्तेवासिना शिष्येण सम्यक् ज्ञानं स्थिरीकृतं तथापि एवं सम्यक् ज्ञाने स्थिरी कृतेपि आमुक्तं धृतं निगम एव कंचुकं यैस्तथा अमुक्तः अत्यक्तः बाह्यानां वर्त्म। मार्गः यैस्तेषां प्रतीकारः कथमिति । अन्तर्हासः मनसिहासः तत्सहितं यथा भवति तथा सान्तर्हासं ।

नियत्या इति–॥ नियत्या दैवस्य वैयात्यात् धाष्ट्यात् निगमपदवीं वेदोक्त मार्गं उज्झितवतां परेषां प्रतिपक्षभूतानां परिहसनानां गुंभः पारंपरी तदर्हवचसां परिहासयोग्य वाचामित्यर्थः । पुरन्ध्र्यः स्त्रियः ताभिः संभाव्यं पूज्यं यत्स्वमतं तस्मिन् रुच्या नीरंध्रिता सांद्राधीः येषां तेषां अहंकारमभिमानं सोढुं अवनिः कथंकारं प्रभवति ॥ ८८ ॥

शिष्यः—महाराज, छिन्नमूलाः खल्वेते बाह्यनिरसनेन ।

तथाहि ।

गाधातााथागतानां गलतिगमनिका कापिलोका
पिलीनाक्षीणा काणादवाणी द्रुहिणहरगिर
स्सौरभन्नारभन्ते ।
क्षामाकौमारिलोक्तिर्जगति गुरुमतङ्गौरवा
द्दूरवान्तं काशङ्काशङ्करादेर्भजतियति
पतौ भद्रवेदीं त्रिवेदीं ॥ ८६ ॥

अथवा, पारिप्लवविविधपरिकल्पनाकल्लोलकलहजनितसितासित-
विकल्पविप्लवेन सिद्धिकामजनमोहनप्रवृत्तान् तानिमान् प्रतिक्षिपामि ।

(सहस्तास्फालनं, विहस्य)

बाह्यानां सांख्यादीनां निरसनेन यतोच्छिन्नमूलाः खलु तदेव उपपादयति तथाहीति—॥

गाधा इति—॥ यतिपतौ यतीन्द्रे त्रिवेदीं वेदत्रयरूपां भद्रवेदीं भद्रपीठं मंगलावहं सिंहासनं भजति अधितिष्ठति सति ताथागतानां सौगतानां गाधातत्प्रणीतं गाधारूपं शास्त्रं गलति अधः पतति कापिली कपिलसंबन्धिनी गमनिकापद्धतिः क्वापिलीना काणादवाणी कणादनिबद्धो ग्रन्थः क्षीणाक्षयंप्राप्ता द्रुहिण हरयोः वरिंचिपशुपत्योः गिरः योगपाशुपते सौरभमामोदं ना रभन्ते तासां गन्धोपि नास्तीत्यर्थः । कुमारिलस्य भट्टाचार्यस्य उक्तिः तत्प्रणीतं तन्त्रं क्षामा दिनेदिने कृशाभवति गुरोः प्रभाकरस्य मतं गौरवात् गुरुत्वात् दूरवान्तं दूर एव उद्गीर्णं तन्मतस्यापि गुरुत्वाभावात् लघुत्वमभवदिति भावः एवमेतन्मतानां पराहतौ सत्यां शंकरादेः आदिशब्देन भास्करयादवौ गृह्येते एतदादेः कुदृष्टेः शंका पुरोवस्थानशंकाऽनकापीत्यर्थः । कपिलहिरण्यगर्भ पशुपति प्रभृतीनां मतेषु विपक्षेषु तदपेक्षया अतिलघीयसः शंकरादेरेतत् पुरोवस्थानमपि नशक्यते इति भावः ॥ ८६ ॥

एवं बाह्यनिरसनेन कुदृशां च्छिन्नमूलत्वमुपपाद्यपक्षान्तरमाह अथवेति—॥

परितः प्लवन्तीति पारिप्लवाः मतु तत्स्पर्शिन्यः विविधाश्च कल्पनाः प्रथमानि तासां कल्लोलाः विततयः तासां कलहः परस्पर स्पर्धा तेन जनिताः सिताश्च असिताश्चविकल्याः सितासितत्वं नाम नानात्वं तैः विप्लुकः मतिकालुष्यं तेन सिद्धिकामाः मोक्षार्थिनः तेच ते जनाश्च तेषां मोहने प्रवृत्तानुद्युक्तान् इमान् प्रतिक्षिपामि । वक्ष्यमाणार्थविमर्शेन सहस्तास्फलन विहसनं ।

अविद्यामाहात्म्यादनहमिदमर्थं जगदिदं
गृणन्त्येते भातं गगन इव गन्धर्वनगरं ।
अवन्ध्यैर्व्याघातैरतिपतितविन्ध्यद्रढिमभि-
र्निबन्ध्यास्ते वन्ध्यासुतनृपति वैतालिकगणे ॥९०॥

अपि च ।

निध्यायन्त्वनसूयवश्शुभगुणन्निर्दोषमाराध्य
मित्यध्वाविश्वविशेषशून्यकथकैरप्यादितस्स्वीकृतः ।
यद्यर्थस्थितिरेतदेकशरणा सप्रत्यवायो भव
त्यध्यक्षादिविरुद्धनिर्गुणकथानिर्वाहगर्वाहवः ॥९१॥

अतः स्थाने खलु मेघनादवदङ्कुरितविश्वव्यामोहनेन शङ्करदत्तेन केनापि मायातन्त्रेण समानाधिकरणोऽप्रवमाचरतामाचरिततमः प्रवृत्तीनामनवरतकर्बुरप्रकृतीनाङ्कुलिब्रह्ममीमांसकानामेतेषाञ्चिरासाय लक्ष्मणाचार्य प्रादुर्भावः । हन्त परिगृहीत पौबड्रकाद्वैतानाममीषाञ्चित्यमुक्तवादेऽपि नित्यमुक्तवादतामापादयति ।

अविद्येति–॥ अनिदमहमर्थं अनिदमर्थं अनहमर्थं च ब्रह्मणि इदं जगत् अविद्यायाः माहात्म्यादतिशयेन भातं प्रकाशमानमित्येते मायिनः गृणन्ति वदन्ति कथमिव गगने गंधर्वनगरमिव अवन्ध्यैरमोघैरतिपतितः अतिक्रान्त विन्ध्यस्य द्रढिमा दार्ढ्यं यैस्तैः व्याघातैः वन्ध्यासुतो यो नृपतिः तस्य वैतालिकानां वन्दिनां गणे नबन्ध्याः निबन्धव्याः निवेशितव्या इत्यर्थः । असंभाव्यमानार्थवादिनामेषां वन्ध्यासुत वैतालिकनृपतिगणनिवेशएव युक्त इति भावः ॥ ९० ॥

अभ्युपगमविरोधमाह निध्यायन्त्विति–॥

निध्यायन्त्विति–॥ अनसूयवः असूयारहिताः इदमिति शेषः निद्ध्यायन्तु अवलोकयन्तु आदितः अग्रे प्रथमाधिकरणे विश्वविशेषैः शून्यस्य ब्रह्मणः कथकैः अशेषविशेषप्रत्यनीकं ब्रह्मेति वदद्भिः निर्दोषं दोषप्रत्यनीकं शुभाः कल्याणतम गुणाःयस्य तत्तथा आराध्यमुपास्यं ब्रह्मेति अध्वामार्गः स्वीकृतः । प्रथमसूत्रे निर्विशेषं ब्रह्मेति प्रतिपाद्यगुणोपसंहारपादे सगुणं ब्रह्मेति स्थापितमिति हृदयं । अत्रविरोधमाह यदिति–। अर्थस्थितिः एतदेकशरणा सगुणब्रह्मवादैकप्रवणा यदि अध्यक्षादीनि प्रत्यक्षादीनि प्रमाणानि तद्विरुद्धायाः निर्गुणकथायाः निर्वाहएव गर्वाहवः गर्वकृत आहवः सप्रत्यवायः सदोषो भवति ॥ ९१ ॥

अतः यत एते असंबद्धप्रलापाः अतः कारणात् लक्ष्मणाचार्य प्रादुर्भावः स्थाने खल्वित्यन्वयः । मेघनादवदिन्द्रजिदिवांकुरितमुत्पन्नं विश्वव्यामोहनं तेन इन्द्रजित्

तथा हि ।

मुक्तस्यनित्यमविशिष्टतनोरपूर्वां
मुक्तिंप्रकल्पयितुमात्तविचारयत्नः ।
स्वप्नप्रसूनमकरन्दरसस्यमन्ये
स्वादुत्वमन्यदुपपादयितुं क्षमेत ॥ ६२ ॥

आलक्ष्यतामयं रजनिचरवंशबान्धवानां राहुमीमांसकानां सुभगाभिक्षुकन्यायः यदेते निगमान्तपरित्यागिनः परानधिक्षिपन्ति प्रतिक्षिपन्तिचस्वयमेव निगमान्तान् । अतस्सभाकंपाभावप्रतिपादकखड्गपुरुषप्रयुज्यमानभसापङ्क्त्या भाववचनवदपहास्यवचसाममीषां प्रतिक्षेपेप्यपत्रपामहे । यतयस्तु त्रिभुवनसंरक्षणे प्रवृत्ताः प्रतिक्षिपन्ति । यदपि चैतेषां चिदचिदीश्वरयाथार्थ्यंतस्कराणामन्तिमयुगमस्कारिणां नित्यानित्य वस्तुविवेकादिसाधनचतुष्टयमभिदधति । तच्च । तत्वातत्वविवेकाभावः

यथाचार्यं दृष्टः उत्तरक्षणे अन्तर्हितो भवति तथेदं शंकरदत्तं व्यामोहनमपीत्यर्थः समाधेः ध्यानस्य करणमाचरणं तस्यापप्लवमाचरितां आचरिततमः प्रवृत्तिस्तमोगुण प्रवृत्तिः यैस्तेषां अनवरतं कर्बुरा शबला प्रकृत्तिस्स्वभावो येषां तेषां कलिः कलियुगं स एव ब्रह्म तत्र मीमांसकानां तदेकविचारनिरतानां निवारणाय परिगृहीतमंगीकृतं पौण्ड्रकस्याद्वैतमैक्यं यैस्तेषां पौण्ड्रको वासुदेवोऽहमिति कृष्णेनैक्यं ब्रुवन् तस्मादेव मरणमवाप तथैतेषामपि ब्रह्माद्वैतभावेनानर्थकारिणीतिभावः । नित्यः सार्वकालिक मुक्तवादः मुक्तोस्मीति वादः नित्यं मुक्तः त्यक्तःवादोवचनं यैस्तषा तत्तां मोनित्वनुपपादयति । मुक्तोस्मीति वचनं जीवतोमुक्त्यसंभवात् मुक्तवादोस्मीत्येतमेवार्थमुपपादयतीत्यर्थः । तदेवोपपादयति तथाहीत्यादिना—।

मुक्तस्येति—॥ नित्यं प्रकृति विनिर्मुक्तस्यात एव विशिष्टतनोः ब्रह्मापत्तय-विशेषविधुरस्वरूपस्यापूर्वां अभूतपूर्वां मुक्तिं प्रकल्पयितुं साधयितुं आत्तः स्वीकृत-विचारयत्नो येन सतथा य एवं विधस्सस्वप्ने यत्प्रसूनं दृष्टं तन्मकरन्दस्य अन्यत्पूर्वोप-लब्धादन्यत् स्वादुत्वं माधुर्यं उपपादयितुं क्षमेत शक्तस्स्यात् । नित्यमुक्तिः स्वप्नदृष्टप्रसून मकरन्दतुल्या मुक्त्यन्तरकल्पनं तु तस्य माधुर्यान्तरकल्पन प्रायमितिभावः ॥ ६२ ॥

रागद्वेषादि साधनसंपत् लौकिक वैदिककर्मानुष्ठानवैमुख्यं मुमुक्षुत्वं चेति यथाऽनुष्ठानं विपरिणामेन परिहसन्तिसन्तः ।

गुरुः—भद्र, किमत्रविस्तरेण ।

रजनिचरवंश बान्धवानां तत्तुल्यानां मुषाणादिनामित्यर्थः तेहि राक्षसाइव ब्रह्माहमस्मीतिगर्वातिरेकादहंगतवादिनः राहुमीमांसकानां कबन्धमीमांसकानां प्रतिशिरोनंगीकारात्तेषां कबन्धमीमांसकत्वं येषां । अयं सुभगाभिक्षुकन्याय आल. स्यतां । अयं खलु सुभगाभिक्षुकन्यायः भिक्षार्थं गृहमागते माणवके नायं भिक्षासमय इति स्नुषाया वचनादपक्रान्ते तस्मिन् श्वश्रूरागत्य पुनस्तमाहूयवटो कथं भिक्षानव· सरवादे अहं वदामि नायं भिक्षावसरः त्वं अपसरद्रुतमिति अत्रस्नुषया यदुक्तं तदेव श्वश्रुवापि उभयथाप्यस्यवटोः भिक्षा यथानास्ति तदेतैरुभैरपि निगमान्तनिरोध इति भावः । उक्तमेव न्यायं दर्शयति य एव इति–। यच्छब्दोहेतुवचनः निगमान्तपरित्या· गिनः परान् राहुमीमांसकानधिक्षिपन्तिनिन्दन्ति इत्यर्थः अत एवमसंबद्धभाषिणः सभायां विद्वत्सदसिममकम्पोनास्तीति प्रतिपादकः सभाकम्पाभावप्रतिपादकः सचा सोऽज्ञपुरुषश्च तेन प्रयुज्यमानं भयापंकाभाववचनमिव अपहास्यं वचोयेषां अमीषां प्रतिक्षेपेप्यपत्रामहे तन्मतमनूद्यकिलतत्प्रतिक्षेपः कार्यः– ।

अन्यन्तासंगतत्वात् तस्य प्रतिक्षेपार्थमपि तदनुवादोलज्जावह इति भावः । त्रिभुवनसं रक्षणे भुवनत्रयोदरवर्त्तिजनसंरक्षणेतेषां सम्यक्ज्ञानोत्पादनद्वारासंरक्षणे प्रवृत्तास्तुश्रुतयः

नित्योनित्यानां चेतनश्चेतनानां एको बहूनां योविदधातिकामान्

ज्ञाज्ञौद्वावजावीशनीशौ द्वासुपर्णा सयुजौ

सखायौ समानंवृक्षं परिषस्वजाते । तयोरन्यः ।

पिप्पलं स्वाद्वत्यन अश्नन्नन्योभिचाकशीतीति ॥

सोऽश्नुते सर्वान्कामान्सह ब्रह्मणाविपश्चिते त्यादय: ॥

प्रतिक्षिपन्ति । जीव ब्रह्मणोरैक्यमितिशेषः दूषणान्तरमाह यदपीति– । यदपि साधन चतुष्टयं केचिदभिदधतीत्यन्वयः । चिदचिदीश्वराणां याथात्म्यस्य तस्कराणाम· पहर्तृणामन्यथा वर्णयतामित्यर्थः । अन्तिमयुगं कलियुगं तस्मिन् मस्करिणां सन्यासिनां कलियुगानुगुणसन्यासिनां नित्यानित्यवस्तु विवेकशमदमादि साधनसम्पद इहचामुत्र च फलभोगविरागः मुमुक्षुत्वंचेति साधनचतुष्टयं तच्च साधनचतुष्टयं यथानुष्ठानं तेषामनुष्ठानमनतिक्रम्य विपरिणामेन विरुद्धपरिणामेन तत्त्वातत्त्वविचाराभावादिक· मिति सन्तः परिहसन्ति ॥

शिष्यः—भगवन्, पक्षान्तरमपि प्रतिक्षिपामि ।

यदि भास्करयादवप्रकाशौ
निगमान्तस्थितिनिर्णयप्रवीणौ ।
अपरैः किमिवापराद्धमार्यै
स्यथाभाषणचातुरीधुरीणैः ॥ ६३ ॥

अत एव निर्गुणब्रह्मवादिनां प्रच्छन्नबौद्धप्रसिद्धिवदनयोरपि जैनगन्धिवेदान्तिनामधेयमनुशोश्रूयामहे । इदं किल निखिलोपनिषदैकरस्यं ।

मिथो भेदन्तत्त्वेष्वभिलपति भेदश्रुतिरतो
विशिष्टैक्यादैक्यश्रुतिरपि यथार्था भगवती ।

पक्षान्तरं भास्कर यादवपक्षौ ।

यदीति—निगमान्तस्थितेः वेदान्तमर्यादायाः निर्णये प्रवीणौ समर्थौ यदि यथाभाषणे या चातुरी तस्यां धुरीणैः धुरंधरैः आर्यैः स्यादस्तिस्याचास्तीति वादिभिः जैनैः किं किमिवापराद्धं नकिमपीत्यर्थः ॥ ६३ ॥

अत एवायथाभाषणादेवनिर्गुणब्रह्मवादिनां ब्रह्मनिर्गुणमिति वदतां मायिनां प्रच्छन्नबौद्धा इति प्रसिद्धिवत् बौद्धाः कण्ठरवेण वेदाप्रामाण्यमंगीचक्रुः अमी पुनरर्थद्वारे त्येषां प्रच्छन्नबौद्धत्वं जैनास्तु सप्तभंगीं एतौ पुनर्भेदाभेदयोस्तात्त्विकत्वं अत एव तौ जैनगन्धि वेदान्तिनाविति समन्वयं अनुशोश्रूयामहे परंपरयाकर्णयामः भेदाभेदश्रुत्योर्विरोधे कथं च बोद्ध इत्यत आह इदं खल्विति । निखिलानामुपनिषदां ऐकरस्यं एकरसता एकाभिप्रायता तत् किमित्यत आह ॥

मिथ इति—॥ तत्त्वेषु चिदचिदीश्वररूपेषु मिथः परस्परं भेदं स्वरूपभेदं असौ प्रत्यक्ष सिद्धाभेदश्रुतिः नित्यो नित्यानां प्रधानक्षेत्रज्ञपतिर्गुणेशः इत्यादिका अभिलपति वक्ति भगवती पूज्या चिदचिद्विशेषणक ब्रह्मणो ऐक्यवादित्वात्पूज्यत्वं ऐक्यश्रुतिरपि ।

आत्मैवेदं सर्वं खल्विदं ब्रह्म ।

तदनुप्रविश्य सच्चत्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् । इत्यादिका ऐक्यवादिनी श्रुतिः विशिष्टैक्यात् चेतनाचेतनविशिष्टस्य ब्रह्मण एकत्वात्सार्था अर्थावती स्वमावर्थौ उक्तपूर्वावर्थौ भोक्तुं परस्पराविरोधेनरक्षितुं निखिलजगदन्तः प्रविश्य नियमयिताऽनियन्ता अन्तः प्रविष्टश्शास्ताजनानां सर्वात्मा इति हि श्रूयते ।

इमावर्थौ गोप्तुन्निखिल जगदन्तर्यमयिता
निरीशो लक्ष्मीशश्रुतिभिरपराभिः प्रणिदधे ॥९४॥

राजा—ब्रह्मन् ।

तत्त्ववृत्तोभयभ्रष्टपाषण्डगणसंकुलः ।
कृतीभवति कालोयं कृतिना सम्प्रति त्वया ॥९५॥

शिष्यः—महाराज, सर्वमेतद्भगवतः प्रसादेन ।

अद्यहि ।

कणादपरिपाटिभिः कपिलकल्पनानाटकैः
कुमारिलसुभाषितैर्गुरुनिबंधनग्रन्थिभिः ।
तथागतकथाशतैस्तदनुसारिजल्पैरपि
प्रतारितमिदञ्जगत्प्रगुणितं यतीन्द्रोक्तिभिः ॥ ९६ ॥

निरीशः नियन्त्रन्तररहितः लक्ष्मीशः अपराभिः घटकश्रुतिभिः यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन् इत्यादिभिः प्रणिदधे उक्तः ॥ ९४ ॥

तत्वेति—॥ तत्त्वं तत्त्वज्ञानं वृत्तं आचारः एतदुभयात्भ्रष्टाः ये पाषण्डगणाः तैः संकुलः अयं कालः कलिः कृती समर्थो भवति यद्वा कृतं सुकृतमस्यास्तीति कृती भाग्यवानिति यावत् ॥ ९५ ॥

भगवतः गुरोः प्रसादेन एतत्सर्वं शुद्धमितिशेषः भगवतः प्रसादेनेत्युक्तं दर्शयति कणादेति—।

कणादेति—॥ कणादस्य परिपाटिभिः प्रक्रियाभिः तदुक्तनिबन्धनैरित्यर्थः कपिलस्य कल्पनाः विरचनाः ताभिरेव नाटकैः भूमिकाभिः नाटकानां भूमिकाप्रदानत्वात् नाटकशब्देन वर्णिकालक्ष्यन्ते तद्विदतात्त्विकैः कुमारिलस्यसुभाषितैः तन्मतनिष्ठाभिः प्रायेण सुभाषितत्वं एतन्मते तु दुर्भाषितान्येव तत्प्रणीतानि गुरोः प्रभाकरस्य निबन्धन रूपैः ग्रन्थिभिः अनेन परस्पराणां अर्थानां ग्रन्थिरूपत्वं सूच्यते तथागतानां सौगतानां कथाशतैः प्रसंगशतैः तदनुसारिणां सौगतानुविधायिनां शंकरादीनां जल्पैः प्रलापैरपि प्रतारितं वंचितमिदं जगत् यतीन्द्रोक्तिभिः प्रगुणितं प्रकृष्टगुणयुक्तं समीचीनानुष्टानादिगुणकं जातं । कणादादिबाह्यकुदृष्टिमतविमोहिताः जनाः इदानीं यतीश्वर सूक्तिभिः तत्त्वज्ञानतदनुगुणानुष्ठानादिशालिनो जाता इति भावः ॥९६॥

किञ्च ।

मुकुन्दांघ्रिश्रद्धाकुमुदवनचन्द्रातपनिभा
मुमुक्षामक्षोभ्यान्दधतिमुनिबृन्दारकगिरः ।
स्वसिद्धान्तध्वान्तस्थिरकुतुकदुर्वादिपरिष
द्दिवाभीतप्रेक्षादिनकरसमुत्थानपरुषाः ॥ ९७ ॥

सेना—देव ।

वशंवदवचोवृत्तिर्वादाहवमहारथः
परिभूतविपक्षोसौ पारितोषिकमर्हति ॥ ९८ ॥

शिष्यः—सेनापते ।

दययादेशिकेन्द्रस्य हृषृयाचास्यमहीपतेः ।
परितोषेण चैवन्तेप्राप्तोहं पारितोषिकं ॥ ९९ ॥

राजा—भगवन्, प्रियहितमेवासौवदति

सेना—तत श्च ।

सभाजयितुमिच्छामि प्रत्यक्षितसभाजयं ।
एतंभगवतश्छात्रमेकभक्तयापरिष्कृतं ॥ १०० ॥

यतीन्द्रोक्तीनां मुमुक्षाजनकत्वरूपमतिशयान्तरमाह ।

मुकुन्देति—। मुकुन्दांघ्रियोः भगवच्चरणारविन्दयोः श्रद्धाभक्तिरेव कुमुदवनं तस्य चन्द्रातपनिभाः ज्योत्स्नासदृश्यः तद्विकाशहेतवइत्यर्थः स्वसिद्धान्त एव ध्वान्तः तस्मिन् स्थिरं कुतुकं कुतूहलं येषां तेषां दुर्वादिनां परिषद एव दिवाभीताः घूकाः तेषां प्रेक्षाया दृष्टेः दिनकरसमुत्थानवत्सूर्योदयवत्परुषाः क्रूराः मुनिबृन्दारकस्य यतीन्द्रस्य गिरः अक्षोभ्यामविचाल्यां मुमुक्षांदधति ॥ ९७ ॥

वशंवदेति—॥ वशंवदा स्वाधीना वचोवृत्तिः वाग्व्यापारो यस्यसतथा वादएव आहवः अस्मिन्महारथः पण्डित इत्यर्थः परिभूतः पराजितः विपक्षः प्रतिपक्षः येन सतथा अयंवादः पारितोषिकं परितोषेणदेयमर्हति ॥ ९८ ॥

दयया इति—॥ देशिकेन्द्रस्य गुरोः दयया प्रियहितं प्रियं च हितं च ततः सेनापतिवचोस्य प्रियहितत्वात् ॥ ९९ ॥

सभाजयितुमिति—॥ प्रत्यक्षितः दृष्टः सभाजयः सभायां प्रतिपक्षजयो यस्यतं एकभक्त्यासकलेतरपराङ्मुखयाभक्त्यापरिष्कृतः एकभक्तिर्विशिष्यत इति त्विगीयते एतं भगवतश्छात्रं शिष्यं सभाजयितुं पूजयितुमिच्छामि ॥ १०० ॥

शिष्यः–महाराज, भगवन्तएव संभावनामर्हन्ति ।

गुरुः–त्वमपि मन्नियोगेन ।

राजा–भगवन् ।

अत्यन्तस्थापकोयन्दृढतरममुनातत्वदृष्टिश्चदिष्टा
दिष्ट्याचादिष्टमेतद्दिशिदिशिलडहोडिण्डिमस्ताडनीयः ।
शुष्कोपन्यासशिक्षापटिमकटुरटद्वैरिविद्वत्करोटी
कुट्टाकक्रोडमष्टापदकटकमसौवामपादेबिभर्तु ॥ १०१ ॥

(इतिकटकन्ददाति)

शिष्यः–(गुरुमवलोकयति)

गुरुः–अस्त्वेवमलंघनीयाखलुराजाज्ञा ।

शिष्यः–यदाज्ञापयतिभगवान् ।

(इति कटकमादत्ते) ।

मन्नियोगेन त्वमपि संभावनां पूजा मर्हसीति योज्या

अत्यन्तेति–॥ अयं तव छात्रः अत्यन्तस्थापकः प्रतिष्ठापकः अमुना तत्व-दृष्टिः तत्वतोज्ञानं दृढतरं दृष्ट्या एतत् पारितोषिकमर्हतीति एतद्वचनं दिष्ट्या दैवादा-दिष्टं उपदिष्टंच अतः दिशिदिशि प्रतिदिशं लडहः जयसूचकः डिंडिमः वाद्यविशेषः ताडनीयः ताडयितुमर्हः । शुष्कः निरर्थकः यउपन्यासः तस्मिन् शिक्षायां पटिम्ना पाटवेन कटु यथा भवति तथा रटन्तः प्रलपन्तः येवैरिविद्वांसः तेषां करोटीषु शिरो-स्थिषु कुट्टाका कुट्टनं क्रोडायस्य तत्तथा अष्टापद कटकं स्वर्णकटकं वामपादेबिभर्तु दधातु । तदन्यमतं वाम पादे बिभर्तु इति राज्ञाप्रतिपाद्यते ॥ १०१ ॥

तदभिप्राय ज्ञानाय गुरुमवलोकयति अद्यप्रभति तेकर्तव्य मवधार्यतां निश्ची-यतां । किंतत्रे त्याह–

गुरुः—आयुष्मन्, अवधार्यतामिदमद्यप्रभृतितेकर्तव्यं ।

सत्कारकीर्तिधनलब्धिषुनिर्व्यपेक्षः
प्रश्नोचितेषु परयाकृपया प्रसीदन् ।
सत्तर्कतन्त्रपरिकर्मितमाशरीरा
च्छारीरक प्रवचनव्रतमाद्रियेथाः ॥ १०२ ॥

शिष्यः—यदादिशति भगवान्

नेपथ्ये—गम्यतां गम्यतां, आःकष्टमापतितं

रागद्वेषाभिख्ययाख्यातपूर्वौ
मूढावेतौ दानवौमोहभृत्यौ ।
निष्प्रत्यूहन्निर्जिहातेविरक्तिं
बंधीकर्तुंविष्णुभक्त्यासमेतां ॥ १०३ ॥

सत्कारेति—॥ सत्कारः पूजा कीर्त्तिं ख्यातिः धनलब्धिः धनलाभः तासुनि र्व्यपेक्षः व्यपेक्षारहितः प्रश्नोचितेषु शिष्येषु शिष्याणामेव प्रश्नोचितत्वं ।

तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिन स्तत्वदर्शिनः ॥
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्यच ।

इत्यादिषु तथादर्शनात् परया शिष्योज्जीवनैक प्रयोजनया कृपया प्रसीदन् सद्भिः प्रमाणानुग्राहकैः तर्कैः तन्त्रेण मीमांसयाच.परिकर्मितं अलंकृतं शारीरकस्य ब्रह्ममीमांसायाः प्रवचने व्याख्याने व्रतं श्रद्धां आशरीरात् यावच्छरीरं आद्रियेथाः यावद्देहं शारीरके व्याख्यान एव अत्यादरणं कुर्या इति भावः ॥ १०२ ॥

कुतइत्यत आह ॥

रागेति—॥ रागद्वेषा इत्यभिख्यया नाम्ना ख्यातपूर्वौ पूर्वं ख्यातौ प्रसिद्धौ मूढै· आगामिविपत्यज्ञानान्मोक्षं विष्णुभक्त्यासमेतां विरक्तिं बन्धीकर्तुं बलात्कारेण हर्तुं रागेण विरक्तेर्द्वेषेण विष्णुभक्तेः बन्धीकरणमिति मन्तव्यं निष्प्रत्यूहौ आरम्भसमये केवलं निष्प्रत्यूहत्वं निर्जिहाते निर्गच्छतः ॥ १०३ ॥

(सर्वे ससंभ्रममाकर्णयन्ति)

राजा—भगवन्, अद्यखलु शान्तिकर्मणिवेतालोदयस्संवृत्तः, तत्साधयन्तु भवन्तस्समीहितसमर्थनाय, वयमपि वैरिबलनिर्मूलनायसंप्रति यतामहे ।

(इतिनिष्क्रान्तास्सर्वे)

इतिकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्यवेदान्ताचार्यस्यकृतिषु ।

सङ्कल्पसूर्योदये

परपक्षप्रतिक्षेपोनाम

द्वितीयोंकः ॥

श्रीमते निगमान्तमहादेशिकायनमः । श्रीमते भगवते भाष्यकाराय महादेशिकायनमः ॥

अद्यशान्तिकर्मणि वेतालादयः संवृत्तइति वदतः अयमभिप्रायः यथा भूतप्रेताद्यभिभवजन्य दोषशान्तये कस्मिंश्चित्कर्मणि प्रवर्त्यमाने वेतालस्य पिशाचविशेषस्य उदय उत्पत्तिः तथा महामोक्ष प्रश्नयारंभे रागद्वेषयो रागमनमिति तदेतदागमनाद्धेतोः समीहितस्य समर्थनाय भवन्तः साधयन्तु गच्छन्तु वैरिणां बलस्य निर्मूलनाय यतामहे यत्नं कुर्मः ॥

इति प्रभावल्यां संकल्पसूर्योदयव्याख्यायां द्वितीयोऽङ्कः

श्रीमते रामानुजाय नमः ॥

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

सङ्कल्पसूर्योदये तृतीयोऽङ्कः ।

ततः प्रविशतो रागद्वेषौ ।

रागः—सखे, त्वत्सहायस्यमे स्वामिकार्यनिर्वर्तनं सिद्धप्रायमिति निश्चिनोमि ।

द्वेषः—वयस्य त्वद्विरुद्धविषयविवेकसंरंभनिरोधेन त्वदेककार्य एवाह-हमादिष्टोस्मि महाराजेन ।

रागः—सखे, अन्यदपि तावदवसरोचितमाज्ञप्तिगोचरमावेदयामि

विवेककुहनाबलाद्व्यतिहतेषु बाह्येष्वसौ
त्रिवर्गपदवीपरं शरणमद्य मोहश्रियः ।
विरक्तिमिह तापसीं व्यपनयामि दूरादहं
विमथ्य विनिवर्त्यतां सपदि विष्णुभक्तिस्त्वया ॥ १ ॥

अथेदानीं किंचित् ॒छ्यमर्थं सूचयितुमर्थोपक्षेपकं विष्कम्भं विरचयतिततइति—।

सिद्धप्रायं प्रायेण सिद्धं ।

त्वयाविरुद्धः त्वद्विरुद्धः विषयोमोक्षरूपो यस्य स तथा सचासौ विवेकसंरंभः तस्य निरोधने निवारणे । त्वदेककार्यः त्वयाधिकृत एवकार्ये त्वहमादिष्टो । आदिष्टे आज्ञायाः ।

गोचरं विषयं ।

विवेकेति—॥ विवेकस्य कुहनाबलात् मायाबलेन बाह्येषु बाह्यकुदृष्टिषु व्यतिहतेषु पराजितेषु सत्सुमोहश्रियः मोहलक्ष्म्याअसौ त्रिवर्गपदवीधर्मादिवर्गत्रयपद्धति शरणं रक्षित्री इह अस्मिन्कार्ये तापसीं शोच्यां विरक्तिमहं दूरादपनयामि त्वया विष्णुभक्तिस्सपदिविमथ्यबलात् विनिवर्त्यतां विनिवृत्ताकार्या ॥ १ ॥

संभवति च सर्वथा सर्वतः प्रसारिताभ्यां स्वर्गापवर्गगुणदोष जालाभ्यां तयोरुपरोधः । अहं पुनर्मायासहस्रवेदी मारीचमैथिलीन्यायेन विरक्तिन्तावत्तपस्विनीं विप्रलभे, भवतस्तु विष्णुभक्तिविमथने पौलस्त्य एव प्रमाणं ।

द्वेषः—अथ किं ।

रागः—यद्यपि, त्रय्यन्तवादिना महामोहसौवस्तिकानामग्रगण्या हिरण्यासुरपुरोहिता इव धरण्यामवतीर्णाः कबन्धमीमांसकाः प्रतिक्षिप्ताः, तथापि तन्मतमेव सोपपत्तिकमुत्तम्भयन् स्वामिकार्यं निर्वर्तयामि ।

द्वेषः—स्थाने खलु भवतस्समारम्भः, यदिहनास्तिक्यसम्वर्द्धकानां

कथं तयोर्विनिवर्त्तन मित्यत आह संभवति चेति ।

सर्वथा सर्वैः प्रकारैः । सर्वतः प्रसारिताभ्यां विस्तृताभ्यां स्वर्गापवर्गगुणदोष जालाभ्यां स्वर्गस्य गुणजालेन अपवर्गस्यदोषजालेन च तयोरुपरोधस्संभवति । मायानां सहस्रं वेत्तीति मायासहस्रवेदी । मारीचमैथिलीन्यायेन मारीचोयथामैथिलीं विप्रलब्धवान् तथेत्यर्थः । विष्णुभक्तेर्विमथने पौलस्त्यः रावणएवप्रमाणं । रावणो यथा वैदेहीम पहृतवान् तथा त्वयापि विष्णुभक्तिरपहरणीयेत्यर्थः ।

अथ किमित्यंगीकारे ।

महामोहस्य सौवस्तिकानां पुरोधसां त्रय्यन्तवादिनां निर्विशेषचिन्मात्र ब्रह्मैव सत्यमन्यत्सर्वंमिथ्येतिवदतामग्रगण्याः सेनाग्रनेतारः । मायिनां महामोहसौवस्तिकत्वं । तदतिशयापादकत्वात्बोद्धव्यं ।

धरण्यामवतीर्णाः हिरण्यासुरपुरोहिताः शुक्राचार्या इव स्थिताः तेह्येकदृष्टि विकलाः एवमेतेपि कबन्धमीमांसकाः उपनिषद्रहितत्वात् । एतेहि मायिनां अग्रण्यः । स्वयं वेदान्तानामप्रामाण्यमंगीकृत्य तद्वदेव तेषां पूर्वभागाप्रामाण्यांगीकारापादकत्वात्ते प्रतिक्षिप्ता यद्यपि इत्यवधारणे प्रतिक्षिप्ता एवेत्यर्थः । तथापि तन्मतं कबन्धमीमांसकमतमेव सोपपत्तिकं उपपत्तिसहितं यथा भवति यथा उत्तंभयन् अवलंबमानः स्वामी महामोहः तत्कार्यं ।

नाडीरे सेनामुखे वर्त्तमाना विजयसूचनी पताका विजयपताका । सोपपत्तिकमित्यत्रोक्तामुपपत्तिमाहाल्पमिति—॥

महामोहसैनिकधुरन्धराणां नासीरविजयपताका निरीश्वरमीमांसा समालम्ब्यते ।

रागः—

अल्पमस्थिरमानन्दमिच्छतो यदि रागिता ।
अनन्तस्थिरकामस्य विरक्तिः कस्यकीदृशी ॥ २ ॥
स्वस्यैवाप्तिस्सुखमिति मृषास्वेतरस्यानुभूतौ कामा
दन्यः क इव घटते मोक्षनामा पुमर्थः ।
तस्मादस्मद्बहुमतनिरध्यक्षमीमांसकोक्त्या ।
स्वेच्छानृत्यद्बहुगुणनिधिस्स्वर्ग एवापवर्गः ॥ ३ ॥

अल्पमिति—॥ अल्पं परिमितं दुःख बहुलमस्थिरं अचिरस्थायिनं चानन्दमिच्छतो जनस्य रागिता रागवत्ताभ्युपगतायदि ज्योतिष्टोमादिकर्मानुष्ठानेन स्वर्ग प्राप्तस्य योयमानन्दस्सखल्वल्पोऽस्थिरश्च तथाच श्रुति ।

"तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्रपुण्यचितोलोकः क्षीयते अन्तवदेवास्य तद्भवति" इत्यादिका श्रुतिश्च

तेतंभुक्त्वा स्वर्गलोकं विशालं ।
क्षीणेपुण्ये मर्त्यलोकं विशन्ति ॥
स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्तिनिर्वृतिः ।

इत्यादिका । एवंभूतमानन्दमिच्छन् रागितयादूष्यते यदि अनन्ते स्थिरेचानन्दे कामइच्छा यस्य तस्य विरक्तिः कीदृशीकिंभूता मुक्तानन्दस्यानन्तास्थिरत्वं च निरतिशयानन्दरूपब्रह्मानुभवतयैव ।

रसो वैसः रसँह्येवायंलब्ध्वानन्दीभवति ।

इति श्रुतेश्चाल्पास्थिरानन्दकामस्यापि वैराग्याभावांगीकारे अनन्तस्थिरानन्दकामस्य वैराग्याभावः किं पुनर्न्यायसिद्धइतिभावः ॥ २ ॥

एवं विरक्तेरसंभवउक्तः अथ

स्वर्गापवर्गयोः गुणदोषौ दर्शयति अपिचेतिप्रथमं तावन्मोक्षस्य कामत्वं प्रतिपाद्य तद्द्वारा दोषं दर्शयति

स्वस्येति—॥ मोक्षोनाम स्वस्यैवाप्तिर्वा स्वेतरानुभूतिर्वेतिद्वेधा विकल्प्यप्रथमं दूषयति स्वस्यैवाप्तिस्सुखं मोक्षसुखं इतिमतं चेत्तन्मषा स्वस्य नित्यप्राप्तत्वेन मोक्षो

द्वेषः—किमुच्यते, अयं पुनर्महामोह तन्त्रपारदृश्वभिः परमार्थोपदेशिभिस्सावधाननिपुणनिरूपितसम्प्रदाय परंपरासमधिगतोऽर्थः ।

प्रपञ्चकृतकंचुकं यदि परं महः प्राप्यते
नदुःखमपहस्तितं भवति नैकथोपप्लवात् ।
अथैकमखिलोज्झितं नखलु भोग्यतामेति त-
त्ततो निगममस्तकै र्निगदमात्रशेषैस्स्थितम् ॥ ४ ॥

रागः—सखे, साधुभाषितं, नूनमीदृशेन वचसा दवदहनदन्दह्यमान तरुशिखरकुलायकुहरनिष्क्रान्ता विहङ्गपङ्क्तिरिव विष्णुभक्तिरपसर्पति, अद्य खल्वनादिभोगवासनाजालजटिलबुद्धे रात्मनः कथंनाम निर्विवेको विवेकस्सपारजिहासां साधयिष्यति, प्रत्युत

पायोपदेशवैयर्थ्यात् द्वितीयं दूषयति स्वेति स्वस्मादितरस्यानुभूतौ मोक्षतयाङ्गीकृतायां मोक्षनामापुमर्थः कामादन्यः कथंघटते किंतु काम एव घटति । स्वर्गस्यगुणंदर्शयति तस्याविति—। तस्मात्कामस्यैवमोक्षत्वादस्माभिर्बहुमतया निरध्यक्षमीमांसकोक्त्या निरीश्वरमीमांसकोक्त्या स्वेच्छया नृत्यतां बहूनां गुणानां निधिः स्थानभूतः स्वर्ग एवअपवर्गः ॥ ३ ॥

एवं स्वर्गापवर्गयोः गुणदोषौ श्रुत्वा मोक्षप्रतिपादकश्रुतिशिरसां वैयर्थ्यंद्वेषः प्रतिपादयितुं तत्प्रतिपादनस्य संप्रदायसिद्धत्वमाह—अयमिति ।

महामोहतन्त्रस्य महामोहमतस्य पारदृश्वभिः पारदर्शिभिः परमार्थं सत्यमुपदिशन्तीति परमार्थोपदेशिनः तैस्सावधानतया निपुणं समर्थं निरूपितस्संप्रदायः उपदेष्टृपारंपरीतस्यपरंपरा अविच्छेदः ततोधिगतः अर्थः । कोसावित्यत आह—।

प्रपञ्चेति—॥ प्रपञ्चेन चिदचिदात्मकेन कृतकंचुकं कृतावरणं तद्विशिष्टं परंमहः प्राप्यते यदि दुःखमपहस्तितं निरस्तं न भवति कुतः नैकथा अनेकप्रकारेण उपप्लवात् क्लेशात् चिदचिद्गतदोषाणां तद्विशिष्टब्रह्मण्यवर्जनीयत्वेन तत्प्राप्तावपि न दुःखं निरस्तंभवति अथेति पक्षान्तरे अखिलोज्झितं अखिलविशेषविधुरमेकं प्राप्यते यदि तत् ब्रह्मभोग्यतां नैति खलु प्रस्तरतुल्यस्य तस्य भोग्यताभावात् तत तस्मात्कारणात् निगममस्तकैः वेदान्तैः निगदमात्रं पाठमात्रं शेषः येषांतैस्स्थितं नत्वर्थज्ञानपरैः ॥ ४ ॥

दवदहनेन वनवह्निना दह्यमानस्य तरोःकुलायकुहराणीडाभ्यन्तरान्निष्क्रान्ता विहङ्गपङ्क्तिरिवानादिभोगवासनया अनिदंप्रथमया भोगवासनया जटिला निबद्धा-

दिव्यभौमयुवतिगुणापह्नवकुतूहली मद्गुणैरेव निबिडं निबध्यते पश्य तावदमृतोद्भवाः अमरलोकतिलकभूताः पद्मलोचनाः ।

यासां

स्मेरेण स्तनकुट्मलेन भुजयोर्मध्यं तिरोधित्सितं
नेत्रेण श्रवणं लिलंघयिषितं नीलोत्पलश्रीमुषा ।
अङ्गं सर्वमलञ्चिकीर्षितमहोभावैस्स्मराचार्यकै
स्तन्वीनां विजिगीषितञ्च वयसा धन्येन मन्ये जगत् ॥५॥

तिष्ठतु तावदभिनवयौवनविजृम्भणं, परामृश्यतां पुनर्विभ्रमावेशः ।

अभिनयति यथार्थान्भ्रूपताकापुमर्थान्
गतिरपिगतिमन्यां मन्यते गर्हणीयां ।

बुद्धिर्यस्य तस्यात्मनस्य पुरुषस्य निर्विवेकः विवेकशून्यः संसारे जिहासां त्यागेच्छां साधयिष्यति अत्रकाकुरनुसंधेया न साधयिष्यतीत्यर्थः दिव्याश्च भौमाश्च युवतयः तासां येगुणाः सौन्दर्यशीलादयः तेषां अपह्नवे तिरस्कारे कुतूहली प्रत्युतवैपरीत्यात् तद्‌गुणैरेव निबिडं निबध्यते केते गुणा इत्यत आह पश्येति । अमृतोद्भवाः अमृतेन सहोत्पन्नाः अमरलोकस्य स्वर्गस्य तिलकभूताः अलंकारभूताः यासां ॥

स्मेरेणेति—॥ तन्वीनां स्मेरेण विकसितेन स्तनकुट्मलेन कुट्मलेनेव स्थितेन स्तनेन ईषदुदयतेत्यर्थः भुजयोर्मध्यं तिरोधित्सितं तिरोधितं कर्तुमिष्टं नीलोत्पलस्य कुवलयस्यश्रियं मुष्णातीति मुट् तेन नेत्रेण श्रवणं लिलङ्घयिषितं लङ्घयितुमिष्टं स्मराचार्यकैः स्मरः आचार्यो येषांते तथा तैः भावैः विलासैः सर्वमङ्गमलञ्चिकीर्षितं अलंकर्तुमिष्टं धन्येन श्लाघ्येन वयसा यौवनेन जगत् विजिगीषितं विजेतुमिष्टं । अनेन यौवनारंभवर्णनेनाप्सरसां सैवावस्थेति व्यज्यते ॥ ५ ॥

तदेवोच्यते तिष्ठत्वित्यादिना—।

अभिनवस्य यौवनस्य विजृंभणमिदं तिष्ठतु । विभ्रमाणामावेशः विकारः परामृश्यतां निरूप्यतां । कोसावीत्यत आह

अभिनयतीति—॥ भ्रूपताका पताकेवस्थिताभ्रूःयथार्थान् सत्यान् पुमर्थान् कामपुरुषार्थानभिनयति प्रत्यक्षंदर्शयति गतिरपि अन्यांगतिंकरिवरहंसादिगतिंगर्हणीयां

मदकलुषितमन्तर्मन्मथाद्वैतगर्भा

मुपनिषदमधीते लोचनं लोलतारं ॥ ६ ॥

द्वेषः—सहर्षामर्षं । सखे विश्वपुरुषार्थविशेषविद्भिस्त्वन्मतप्रतिष्ठापकैः कामकामैरेभिः कक्षीकृतं महानन्द लक्षणं मोक्षतया महर्षिविशेषभाषितं पुरन्दरपुरीभुजिष्याभोगमवधूय विपश्चितामपि कथमयं विप्रतिषिद्धवादः ।

सर्वाधारः कथं भूयात्सर्वदोषविवर्जितः ।

तथैव सर्वकामार्थी निरपेक्षः कथं प्रभुः ॥ ७ ॥

रागः—सखे, न चैतावदेव ।

मधुभरित हेम कुंभी

मधुरिमधुर्यौ पयोधरौ सुदृशां ।

निन्दनीयां मन्यते नैषामयातुल्येति मनुते लोलातारायस्मिन् तत्तथालोचनमन्तर्मदकलुषितं मदेनाविलं सत् मन्मथाद्वैतं मन्मथः एक एव दैवतं नान्यदिति तदैक्यं गर्भं यस्यास्तामुपनिषदमधीते ॥ ६ ॥

अप्सरस्संभोगस्मरणाद्धर्षः तदवधूननेनामर्षःताभ्यां सहितं यथा भवति तथा । सखे इति रागस्य संबोधनं । विश्वेषां पुरुषार्थानां विशेषविद्भिः तारतम्यविद्भिः कामकामैः कामेषु काम्येषु भोग्येषु वस्तुषु काम इच्छा येषां तैः कक्षीकृतमङ्गीकृतं महानन्दं लक्षणं स्वरूपनिरूपधर्मं यस्य तन्मोक्षतया महर्षिविशेषभाषितं । महर्षिविशेषश्चात्रे वात्स्यायनपरः । नौवो मोक्षो मोक्ष इतिह्वितेनभाणितं । पुरंधरपुरी अमरावती तस्यां भुजिष्याः वेश्याः तासां भोगं विपश्चितामपि विविधं पश्येच्छित्वं हि विपश्चित्वं तेषामपि विप्रतिषिद्धवादः विरुद्धवादः ॥

तमेवाह

सर्वेति—॥ सर्वेषां चिदचितामाधारः शरीरितया धारकः परमात्मा सर्वदोषविवर्जितः तद्गतदोषास्पृष्टः कथं भूयात् शरीरगतैरपि रोगादिभि रात्मनोपि दुःखादिदर्शनात् सर्वकामार्थी सर्वैः कामैः अर्थी प्रभुः कथं निरपेक्षः तस्य सर्वकामार्थित्वं तस्मिन्कामास्समाहिता इत्यादिश्रुतिसिद्धं नानवाप्तमवाप्तव्यमित्यादिभिर्निरपेक्षत्वं च प्रतिपाद्यते । अतोयंवादः विप्रतिसिद्धः ॥ ७ ॥

एतावद्विप्रतिसिद्धभाषणमात्रं न अन्यदप्यस्तीत्यर्थः । तत्किमित्यत आह—

मध्विति—॥ मधुना भरितयोः पूर्णयोः हेमकुंभयोः मधुरिमर्था प्रियत्वे धुर्यौ

पिशितमिति भावयन्तः
पिशाचकल्पाः प्रलोभयन्ति जडान् ॥ ८ ॥

[आकाशे] किं ब्रूथ, किंच तथेति, अहह अन्धानां कथमभिलप्यते पयसो नैर्मल्यं ।

द्वेषः—अहो महानयमध्यात्माभिनिवेशो विवेकपरतन्त्राणां वैतालानां अथवा, युक्तमेवैतत्, न खलु बधिराणां कुतूहलमातनोति कोकिलालापः, तिष्ठन्त्वेते विवेक एव तावज्जेतव्यः, यतः

विवेक विजयादेव विद्वत्परिषदो जयः ।
उपघ्नतरुविच्छेदे न किमुच्छिद्यते लता ॥ ९ ॥

रागः—साधु विचिन्तितं ।

द्वेषः—[सोच्चैर्हासं]

अनघगुणौघमेकमवधूत समाभ्यधिकं
स्ववितरणोदय सर्वपुरुषार्थ मुपास्ति पदं ।

पूर्वतो सुदृशां पयोधरौ पिशितं मेद इति भावयन्तः ध्यायन्तः अतएवपिशाचकल्पः सदसद्विवेकशून्याः जडान् मन्दान् प्रलोभयन्ति वञ्चयन्ति ॥ ८ ॥

तथापि पिशितं न किमिति ब्रूथ । किमित्यनुवादः । अहहेति खेदे । पयसो जलस्य नैर्मल्यं अन्धानां कथमभिलप्यते ।

अध्यात्मशास्त्राभिनिवेशो विवेकपरतन्त्राणां वैतालानां पिशाचविशेषाणां अध्यात्माभिनिवेशात्किलेयमुक्तिरितिभावः ।

पक्षान्तरमाह अथवेति—।

विवेकेति—॥ विद्वत्परिषदः तदुपजीवि शमदमादीनां विदुषां परिषदः समूहस्य जयोभवतीति शेषः उपघ्नभूतस्य तरोर्विच्छेदे तदाश्रयालता नोच्छिद्यते किं उच्छिद्यत एवेत्यर्थः ॥ ९ ॥

विवेक सामर्थ्यज्ञानेनोच्चैर्हासः ।

अनघेति—॥ अनघः हेयगुणरहितः गुणानां सत्यकामत्वादीनामोघः समवायो यस्य तमेकमद्वितीयं अवधूतौ समाभ्यधिकौ येनतं स्ववितरणोयाः स्वेन वितरणोयाः प्रदेयाःसर्वे पुरुषार्थाः धर्मादयः यस्य तं उपास्तिपदं उपास्तेः उपासनस्यपदं स्थानं

उपनिषदूषरान्तरुपवर्तनधूसरधी
र्नखलु विवेकएषमयि तिष्ठति साधयिता ॥ १० ॥

[नेपथ्ये] कः कोऽत्रभोः ।

उभौ-(कर्णन्दत्वा), (सभयसंभ्रमं), आः कष्टमापतितं । नरपति-
नियोग निर्वाहकौ कथमावां भविष्यावः, हन्त विपरिवृत्तमिवा-
स्माकं भागधेयं ।

अत्रहि

अतिक्रम्यदुरुच्छेदामास्माकीङ्गुणवागुरां ।
विरक्तिर्विष्णुभक्तिश्च विवेक स्थानमृच्छतः ॥ ११ ॥

स चैष नूनं विरक्तिविष्णुभक्तिभ्यां प्रोत्साहितो देव्यासुमत्या दत्त-हस्त इतोभिसमेति, जितकाशिनश्चामुष्यसन्निधाने मन्दभाग्यैर्वास्माभिस्थातव्यं, जीवन्तोहि भद्राणि पश्यन्ति । अस्मदवरजाभ्यामपि कामक्रोधाभ्यामविलंबितकारिभ्यां विलंबनीयं, कालेहिसर्वं संपद्यते न चानेन व्यवसायसहायेन दुर्जयः कश्चित् एवञ्च नूनमापत्स्यते राजकृत्यं ।

उपास्यमित्यर्थः उपनिषद एव ऊषरं सस्यानर्हं लवणप्रायं क्षेत्रं तदन्ते तत्प्रान्तरे परिवर्त्तनेन भ्रमणेनधूसराः रजस्वलाधीर्यस्य सतथा एषविवेकः मयितिष्ठति पुरतोवर्त्तमाने सति साधयिता । न खलु द्वेषे जाग्रति वेदान्तवेद्यं ब्रह्मोपास्यमिति विवेको न घटत इतिभावः ॥ १० ॥

इदमाकर्ण्य नेपथ्ये स्थितो विवेकः कोपादाह्वकः कइति ।

तद्वचस्समाकर्णनाय कर्णं दत्त्वा ।

आपतितः अतिक्रान्तः नरपतिः राजा महामोहः तन्नियोगस्य तत्प्रेरणस्य निर्वाहः निर्वहणं याभ्यांतो आवां कथं भविष्यावः राज्ञनियोगमति लंघितवतोरावयोर्जीवितंधिगितिभावः । परिवृत्तं पराङ्मुखं ॥

अतिक्रम्येति-॥ दुरुच्छेदां दुःखसाध्योच्छेदां गुणवागुरां स्वर्गादिगुणवर्णनामयीं वागुरां मृगबन्धिनीं विवेकस्थानं ऋच्छतः गच्छतः ॥ ११ ॥

जितकाशिनो जयशीलस्य मन्दं भाग्यं येषां तैरविलंबितं यथाभवतितथाकुर्वत इत्यविलंबितकारिणौ ताभ्यां विलंबे कार्यहानिस्स्यादित्यत आशु कार्यं अनेनविवेकेन दुर्जयः कश्चिदपिनास्तीत्यर्थः । आपत्स्यते आपन्नं भविष्यति ।

धिग्धिग्वासवशम्भलीनयनयोरालोलमालोकित
न्धिग्धिङ्मान्मथकार्मुकंयुधिसदाटङ्कारसाडंबरं ।
धिग्धिक्पञ्चमपाठकान्परभृता धिग्धिक्किमन्यैर्जडै
श्शृङ्गारागमरङ्गमण्टप नर्टोमोहेन्द्रवीरश्रियं ॥१२॥

अपिहि ।

निर्जित्यमोहमसुरेन्द्रमिवामरेन्द्रो
बद्धस्य मंक्षुपुरुषस्य पुरुषस्यविमोक्षणेन ।
अश्रूण्यकृत्रिमगिरामभिषङ्गजाता
न्यानन्दजैर्विपरिवर्तयिताविवेकः ॥ १३ ॥

इति वदन्तौ निष्क्रान्तौ ।

॥ शुद्धविष्कंभः ॥

ततः प्रविशति विवेकस्सुमतिश्च ।

विवेकः—देवि समाश्वसिहि समाश्वसिहि परप्रयुक्त पाटच्चरभयापाने दनेन विरक्तिविष्णुभक्ती त्वत्सकाशंप्रापिते ।

धिगिति-॥ वासवस्य शंभल्याः कुट्टिन्याः सुरवेश्यायाः इत्यर्थः नयनयोरालोलं चंचलमालोकितं कटाक्षं धिक् ट्ठिकत्किरनादरादतिशयं सूचयति सदाटंकारेण साडंबरं गर्वं मन्मथकार्मुकं मदनचापं पंचमस्य पंचमस्वरस्य पाठकान् पठनपरान् परभृतान् पिकान् शृंगारागमः कामशास्त्रमेवरंगमण्टपः नृत्तशाला तत्र नर्टो मोहेन्द्रस्य महामोहराजः वीरश्रियं वीर्यार्जितां श्रियं धिक्परैः महामोहमतप्रधानैरन्यैः किंसाध्यं-किमित्यर्थः ॥ १२ ॥

अत्रचायमर्थो निश्चय इत्याह-

निर्जित्येति-॥ विवेकः अमरेन्द्र इव मोहं असुरेन्द्रं व्यस्तरूपकमिदं निर्जित्य बद्धस्य संसारपाशेन नियन्त्रितस्य पुरुषस्य विमोक्षणेन विमोचनेन अकृत्रिमगिरां श्रुतीनां अभिषंगेन परिभवेन जातान्यश्रूणि आनन्दजैरश्रुभिः विपरिवर्तयिता विनिवर्तयिता शोकाश्रूणां आनन्दाश्रुत्व हेतुर्भविष्यतीत्यर्थः ॥ १३ ॥

॥ शुद्धविष्कंभः ॥

सुमत्या दत्तहस्त इत एवाभिसमेतीति सूचितस्य विवेकस्य प्रवेशमाह तत इति-।

सुमतिः-(दीर्घंनिश्वस्य) * णाह तहवि अज्जवि किंहोज्जत्ति तरलहि-
अआ किंभणामि पच्चअणा आरिणोखु राअद्दोसाओ ओसरं
पेक्खदि

विवेकः-भीरु मातेभूदिह मनोदौर्बल्यं किमस्माकमपिसंनिधौरागद्वेष
[illegible]रवकाशः ।

अपिच,

अनुचितपदवीभिश्चिन्तयित्वाप्रयाता
न्यलमलमतिमात्रैरथबाले विषादैः ।
उपनिषदमुदारामुद्वमन् क्वापिलक्ष्ये
शरणमुपगतान्नस्त्रायतेशार्ङ्गधन्वा ॥ १४ ॥

सुमतिः-(सविषादं संस्कृतमाश्रित्य) आर्यपुत्र,

सर्गेषु प्रतिसंचरेषु बहुशस्वर्गेतथादुर्गतौ
जाग्रत्स्वप्नसुषुप्ति मुग्धि मरणावस्थासुदुस्थासु च ।

---

* नाथ, तथापि अद्यापि किं भवेदिति तरल हृदया किं भणामि पच्चअचा रिणौ खलुराग द्वेषावसरं प्रेक्षेते ।

समाश्वासः कुत इत्यत आह परीति-।

परप्रयुक्तयोः परेणशत्रुणा महामोहेन प्रेषितयोः पाटच्चरयोः तस्करयोः राग द्वेषयोः अपनोदनेन निरसनेन मनोदौर्बल्यं माभूत्कुत इत्यत आह किमस्माकमिति-।

हेत्वन्तरमाह-

अनुचितेति-॥ हे बाले अनुचितपदवीभिः स्वर्गनरकादिमार्गैः निरतिशया-नन्दलक्षणपरमपुरुषचरणसरोजपरिचर्योचितस्य पुरुषस्य स्वर्गादि पदव्योनुचिता एव ताभिः प्रयातानि यातायातानि चिन्तयित्वा अतिमात्रैरधिकैः विषादैरलं विषादो न कार्य इत्यर्थः क्वापि लक्ष्ये अर्जुनरूपे क्वचिद्विषये उदारां निरतिशय पुरुषार्थरूपमोक्ष-प्रदामुपनिषद्वं गीतोपनिषदमुद्वमनुपदिशन् शार्ङ्गधन्वा शार्ङ्गं धनुर्यस्यस शरणमुपगतान् शरणागतानः अस्मान् त्रायते रक्षति । अतस्ते मनोदौर्बल्यं माभूदितिभावः ॥ १४ ॥

विषादातिशयेन स्वस्वभावं विस्मृत्य संस्कृतभाषया सुमतिर्वदति आर्यपुत्रेति ।

सर्गेष्विति-॥ सर्गेषु सृष्टिषु प्रतिसञ्चरेषु प्रलयेषु स्वर्गे दुर्गतौ नरके दुस्थासुदुःखरूपासुजाग्रदाद्यवस्थासु च दुःखन्दुःखमनुभवन् पञ्चरबद्धबन् शुकादि-

दुःख्यन् प्रस्तरवद्भवन् बहुपशुःसुःख्यन्नसौदेहभृद्
दग्धादग्धसजीवितद्रुमदशादीनोदरीदृश्यते ॥१५॥

अपिच,

विचित्रजवविश्वकृद्विहृतिमारुतप्रेरणा
विभक्त भवितव्यताविपिनसिन्धुविष्फूर्तिभिः।
जटालवृजिनाविलेजवनयौवनास्वादने
जरामरणभीषणेजगतिजन्तुरावर्त्यते ॥ १६ ॥

विवेकः-(सानुशयं) देवि सत्यमिदमितः पूर्वं, अद्य खलु अपुनरावर्त्तनीमारुरुक्षतः पुरुषस्य चिरकालसंचितपुण्यसंचयविशेषमाकर्णय-

पातत्रासनिरीक्षणप्रशमितस्वर्वासदुर्वासना
पुंसस्संप्रतिशेमुषीनिरवधिंपुष्णातितृष्णांपरे।

नुभवाभावात् पाषाणकल्पोभवन् बहुपशुः हिताहितविवेकापायात् पशुसमः सुख्यन्सुखमनुभवन्नसौ देहभृत् दग्धश्चादग्धश्च सजीवितो यो द्रुमः तस्य दशया दीनः शोच्यः दरीदृश्यते क्वचित्प्रदेशे दग्धः प्रदेशान्तरे पत्रपल्लवाद्युपेतः अतएव अन्तरार्द्रं तरुर्यथा शोच्योभवति तथायमपि पुरुषोतिशोच्यो दृश्यतइति हृदयं ॥ १५ ॥

पुनरपि तदवस्थामेवाह अपिचेति-॥

विचित्रेति-॥ विचित्रः जवो यस्यास्सा तथा साचासौ विश्वकृद्विहृतिश्च भगवल्लीलासैव मारुतस्तस्यप्रेरणया विभक्तायाः भवितव्यतायाः विपिनजालं तदेव सिन्धोः समुद्रस्य विष्फूर्त्तिभिः जटालानि परस्परानुबद्धानि वृजिनानिपापानि तैराविले संक्षुब्धे जवनं वेगवत् अस्थिरं यौवनस्यास्वादनं यस्मिन् तस्मिन् जरामरणाभ्यां भीषणे एतद्द्वयोपादान मन्येषां रोगादीनामप्युपलक्षणं जगति आवर्त्यते पुनः पुनः आवर्त्यमानाः क्रियते ॥ १६ ॥

अपुनरावृत्ति पुनरावृत्तिर्नविद्यते यस्यां तां वर्तनीं पदवीमारुरुक्षतः आरोढुमिच्छतो मुमुक्षोरित्यर्थः चिरकालसंचितेन पुण्यसंचयेन परिणतां तमेवाह-

पातेति-॥ पातः पतनं तस्मा त्त्रासः भयं तस्य निरीक्षणेन स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः इत्युक्तेः स्वर्गे वसतोऽपि पातभयमस्तीत्यवगम्यते तदवलोकनेन प्रशमिता स्वर्वासदुर्वासना स्वर्गवास दुर्वासना यस्यास्सा तथा पुंसःशेमुषी बुद्धिर्निरवधिं तृष्णां परे सर्वाधिके पुंसि पुष्णाति वर्धयति मतिकमले बुद्धि

अर्थित्वे मतिकश्मलप्रचलितेप्येवंप्रतिष्ठापिते
सामर्थ्यंचसमाधिसीम्निनियतावस्थंव्यवस्थाप्यते १७

अपिच,

प्रतिक्षिप्तावद्यप्रवरगुणनिर्धारणभुवा
परप्रेम्णाजुष्टोभवभिदधुना भाग्यवशतः ।
अभिन्नास्वादानाममृतलहरीणामिवधियां
विकल्पंविज्ञाताविधिपवनवैषम्यजनितम् ॥ १८ ॥

अयंचपरमपुरुषचरणारविन्दमकरन्दमधुकरो वृन्दारकनगरमपिन र-
कमिव परं निश्चेष्यति ।

अत्रच,

भवपथकथारागेभग्नेगतागतचिन्तया
परमपुरुषप्रेप्सालाभेतदद्भुतबोधनात् ।

चाञ्चल्यं अक्षय्यंहवै चातुर्मास्ययाजिनस्सुकृतंभवति इत्यादिश्रवजनितमतिक्षोभप्रचलितेऽप्यर्थित्वे एवं स्वर्गपातत्रासनरीक्षणेन प्रतिष्ठापिते सति समाधिसीम्नि सामर्थ्यं च नियतावस्थं नियता निश्चला अवस्था अवस्थानं यस्य तत्तथा व्यवस्थाप्यते अनेनास्य मुमुक्षा समाधौ सामर्थ्यं च सिद्धमिति द्योत्यते ॥ १७ ॥

उपायानुष्ठानं च भविष्यतीत्याह प्रतिक्षिप्तेति–॥

प्रतिक्षिप्तेति–॥ प्रतिक्षिप्तानिनिरस्तानि अवद्यानि दोषा येषां ते प्रतिक्षिप्तावद्याः हेयप्रतिभटा इत्यर्थः तेचते प्रवरगुणाश्चेति कर्मधारयः प्रवरगुणाः कल्याणगुणाः तेषां निर्धारणेन निश्चयेन भवतीति निर्धारणभूः तेन परप्रेम्णा परस्मिन् ब्रह्मणि प्रेम्णा भक्तिरूपेन भाग्यवशतः अधुना जुष्टो भवभिदभिन्नः एकरूपः आस्वादः भोगरसः यासांतासां अमृतलहरीणां अमृतप्रवाहानामिव भोग्यभूतानां धियां ज्ञानानां विधिः ध्यायीत उपासीतेत्यादिरूपः स एव पवनः तस्य वैषम्येण भेदेन जनितं विकल्पं भेदं विज्ञाता ज्ञास्यति नानाशब्दादिभेदादिति सूत्रकारेणोक्तं विद्यानां नानात्वं ज्ञास्यतीतिभावः ॥ १८ ॥

इतः परमस्य स्वर्गाभिलाषो न भविष्यतीत्याह अयंचेति–। उक्तं ह्येतत्

एते वै निरयास्तात स्थानस्य परमात्मनः । इति

अथमिदानीं सिद्धां साध्यां सम्पत्स्वंवेत्याह अत्रचेति–॥

गुणगणभिदासंभेदाभ्यामुपस्कृतविग्रहे
क्षममिहपरंविद्यावर्गेविमोहनिवर्तनम् ॥ १९ ॥

इह च मोहप्रशमनंदिङ्मात्रेणोदाहरामि

समानामुक्तिश्चेन्नखलुघटतेसाधनभिदा
नचेत्स्वर्गन्यायस्तरतमतयान्याभिमतया ।
प्रमाणप्रागल्भ्यप्रणिधिमवधूयप्रलपता
मतिक्षीबः क्षोभस्स्वमतिविहतेरेवनिहतः ॥ २० ॥

एवमपि ये मुह्यन्तितेमुह्यन्त्येव नखलुसहस्रैरपि सलिलकुम्भैर्बलिभुजः प्रक्षाल्यमानाधवलतांप्रतिपद्यन्ते दुर्वादिगर्वसर्वस्वनिर्वापकैस्सर्वज्ञबुद्धिवेदिभिर्वर्णितं निर्विशङ्कमखिलमधिगम्यसर्वेश्वरंनिर्विशन्तिसन्तः—

भवेति—॥ गतागतचिन्तया ज्ञापस्त्वमियस्यगतागतं कामकामालभन्ते इत्यादि प्रमाण बलादस्य पुरुषस्य गतागत चिन्तया भवपथः संसारमार्गः तस्य कथाप्रसंगः तद्विषये रागे भग्ने सति तस्य परमपुरुषस्याद्भुतमाश्चर्यरूपं यद्गुणशीलादिकं तस्य बोधनात् ज्ञानात् परमपुरुषप्रेप्सायाः परमात्मप्राप्तीच्छायाः लाभेसति गुणानामानन्दादीनां गणस्य भिदासंभेदाभ्यां भिदाभेदः अनुपसंहारः संभेदः उपसंहारः ताभ्यामुपस्कृत विग्रहे उपस्कृत स्वरूपे विद्यावर्गे विमोहनिवर्तनं परं क्षमं युक्तं विमोहः भ्रमः तन्निवर्तनमेव कर्तुं युक्तमितिभावः ॥ १९ ॥

अत्रपूर्वपक्षिणोयमभिप्रायः मुक्तिस्तावदेका वा उतानेका आद्ये कल्पे साधन बहुत्वं नस्यात् एकेनैव साध्यसिद्धौ साधनान्तराणां वैयर्थ्यं स्यात् द्वितीये स्वर्गस्येव मुक्तेरपि तारतम्यं स्यादिति एतद्दूषयितुमनुवदति—

समानेति—॥ मुक्तिः तत्तद्विद्याभिः साध्यामुक्तिः समाना एकाचेत् साधन भिदा साधनानामुपकोसलविद्या सद्विद्या दहरविद्यादीनां भेदः नघटते खलु वैयर्थ्यात् इत्यर्थः एका नचेत् अन्याभिमतयामीमांसकाभिमतयातरतमतया स्वर्गन्यायः प्रसज्जेतेति शेषः परिहरति प्रमाणेति—। प्रमाणानां प्रागल्भ्यं धार्ष्ट्यं तद्विषयं प्रणिधिं चिन्तामवधूयापहाय प्रलपतामिति उक्तप्रकारेण क्षीबैरज्ञैः कृतः क्षोभः स्वमतिविहतेः मुक्तेरेकत्वे साधन बहुत्वस्य वैयर्थ्यात् साधन बाहुल्येन स्वर्गस्येवास्यामुक्तेरपि बहुत्वमंगीकरणीयमिति या स्वमतिः तस्याः निरञ्जनः परमं साम्यमुपैतीत्यादि प्रमाण बलात् विहतेरेवहेतोः निहतः प्रतिक्षिप्तः ॥ २० ॥

सुमतिः-(सश्लाघं) * णाह, पइट्ठाविअह्मि दाणिंपमाणप्पणअपेसलेन तुह्म भासिएण, पडिबुद्धजण संभावणिज्जेपमाण उत्तन्तणिरिक्खणंमिसमब्भहिअदरिद्दं खुतुह माहप्पं, दाणिं किल ।

कप्पारम्भपअण्डतण्डवकला कीलन्तकालान्तअ
क्खोहुव्वेल्लकवन्द सिन्धुलहरी धूअन्तचन्दप्पहं ।
एक्कक्खरणिअणिब्भरसुहासन्दोहसन्तोसिआ
आमेल्लन्दि भुअङ्गिआतुह जसम्वेलन्तसेलन्दरे ॥ २१ ॥

* नाथ प्रतिष्ठापितास्मि इदानीं प्रमाणप्रणयपेशलेन युष्मत् भाषितेन प्रतिबुद्धजनसम्भावनीये प्रमाणवृत्तान्तनिरीक्षणे समाधिकदरिद्रं खलु तवमाहात्म्यं ।

इदानीं किल ।

कल्पारम्भ प्रचण्डताण्डवकला क्रीडमानकालान्तक
क्षोभोद्वेलकपर्दसिन्धुलहरी धूयमानचन्द्रप्रभं ।
एकैकाक्षर निर्यन्निर्भरसुधासन्दोहसन्तोषिता
आम्रेडन्ति भुजङ्गिकास्तवयशोवेलान्तशैलान्तरे ॥

अतीन्द्रियेष्वर्थेषु श्रुतमेव प्रामाण्याद्यथाश्रुतमेव कल्पनीयमिति मुह्यन्त्येवेति-।

किमुक्तं मोक्षोनिवार्यतामित्यत्राह न खल्विति-।

अतएव चर्थस्थितिरित्याह दुर्वादीति-।

दुर्वादिनां गर्वसर्वस्व निर्वापकैः निवर्तकैः सर्वं जानातीति सर्वज्ञाबुद्धिर्येषां तैः निर्वर्णितं निष्कृष्यवर्णितं सर्वेश्वरं निर्विशङ्कमधिगम्यनिर्विशन्ति ।

नाथप्रतिष्ठापितास्मीत्यादि-प्रतिबुद्धाः ज्ञानिनः तेच तेजनाश्च तैस्संभावनीये प्रमाणानां वृत्तान्तः प्रवृत्तिस्तस्य निरीक्षणे समाधिकाभ्यां दरिद्रं रहितं ।

कप्पारंभेति-॥ कल्पस्य प्रलयस्यारंभेप्रचण्डमुद्धतं यत्ताण्डवं तस्य कलया विद्यया क्रीडन् यः कालान्तकः रुद्रः तस्य क्षोभेण उद्वेला उत्कूलाकपर्दे; तस्य जटाजूटे या सिन्धुर्गंगा तस्यालहरीभिः धूयमानस्य चन्द्रस्य प्रभेव प्रभा यस्य तत्तव यशः एकैकाक्षरेभ्य निर्यान्ति निर्भराणिबिडा च या सुधा तस्यास्सन्दोहैः निष्यन्दैः सन्तोषिताः आनन्दिता भुजङ्गिकाः वेलान्तेषु समुद्रतीरान्तेषु येशैलाः तेषामन्तरे आम्रेडन्ति पुनः पुनः गायन्तीत्यर्थः ॥ २१ ॥

(विद्यामाहात्म्यमनुचिन्त्यसहर्षरोमाञ्चं) ।

*जम्भाअन्त दइच्चमद्दणदआ सग्गो असोतस्सिणी
वी ईसीअलसाहुसुद्धसुहआसोहन्तिविज्जा इमा ।
जाणक्किं विभवग्गिदाविअ जणो घेत्तूणचिन्ताणिअं
मुत्तिंपेक्खइहत्थमज्झणिहिअं मोहंमिसन्तेविअ॥२२॥

विवेकः—किमुच्यते, अवरोपितप्रायः खलु पुरुषस्य चिन्ताभारः अपि चास्यसंसारदोषदर्शनसातत्यसमुत्थितादपि परब्रह्मविद्वत्संरम्भजृम्भितं परमवैराग्यमुपधानीभवति ।

तथाहि ।

निषिद्धं विद्यार्थादधिकमपि काम्यञ्चविजहत्
परप्रीत्यैकर्मप्रतिनियतमादायमुदितः ।

---

* जृम्भमाणदैत्यमर्दनदयास्वर्लोकस्रोतस्विनी
वीचीशीतलसाधुशुद्ध सुभगाशोभन्तेविद्याइमाः ।
यासां किमपि भवाग्नितापितजनोगृहीत्वा चिन्तानीतां
मुक्तिं प्रेक्षतेहस्तमध्यनिहितां मोहेसत्येव ॥

जृंभमाणेति—॥ जृंभमाणदैत्यमर्दनदयैव स्वर्लोकस्रोतस्विनी तस्यावीचय इव शीतलाः साधुसम्यक्शुद्धाः पावन्यः सुभगाः सुखावहाः विद्याः शोभन्ते यासां मध्ये कामपि विद्यां भवाग्निना संसाररूपवह्निना तापितो जनः गृहीत्वा स्वीकृत्य चिन्तानीतां चिन्तया समाधिना आनीतां मुक्तिं मोहे भ्रान्ते सत्येव हस्तमध्यनिहितां प्रेक्षते करतलगतां मन्यत इत्यर्थः ॥ २२ ॥

अवरोपितप्रायः प्रायेणावरोपितः खलु संसारस्य दोषाणामल्पत्वास्थिरत्वानर्थावहत्वादीनां दर्शनानि ज्ञानानि तेषां सातत्यमविच्छेदः तस्मिन् समुत्थितादपि वैराग्यात् परब्रह्मविद्वत्तायां संरंभेण जृंभितं वैराग्यमस्योपधानी भवति उपकरणंभवति । उत्कृष्टरम्याद्वयमतिशयः सिद्ध इत्याह—।

निषिद्धमिति—॥ निषिद्धं शास्त्रैरिति शेषः विद्यार्थात् विद्यानिष्पत्तिरेवार्थो प्रयोजनं यस्य तस्मादधिकं कर्म काम्यंकर्मच विजहत्त्यजन् परस्यभगवतः प्रीत्यै प्रतिनियतं कर्म नित्यनैमित्तिकरूपमादायानुष्ठीयात इव मुदितः शुभे शुभाश्रयभूते ब्रह्मणि अद्वैव

शुभश्रद्धा दुग्धोदधि नवसुधोल्लासललिते
समाधावाधातु स्वरयतिमुनिरसम्प्रतिमनः ॥ २३ ॥

अपिच ।

विलक्षोपक्षिप्तं विषयरसगन्धर्वनगर
प्रशंसायाथार्थ्यं प्रणिदधतिचित्तेपितनुभृत् ।
मयादत्तेहस्तेमतिकलुषमुल्लंघ्यतरसा
परब्रह्मैकान्तीभवजलनिधिं गोष्पदयति ॥ २४ ॥

सुमतिः—(सविमर्शं) * तहवि पिआमहप्पमुहे महाजोइजणे वासणादाविअविसअरसवलिसमोहिए णिसाअरगहणकोदूहलप्पसाहिअकरस्सबालिसस्सविअ अहं उण कस्सविमोक्खोहोज्जन्ति विअलिआसंसवीलिअं विअ मह माणसं ।

---

* तथापि पितामहप्रमुखे महायोगिजने वासनादापित विषयरसबलिशमोहिते निशाकरग्रहणकौतूहलप्रसारितकरस्यबालिशस्येव कथं पुनः कस्यापिमोक्षो भवेदिति विगलिताशंसंव्रीलितमिवममेमानसं ।

दुग्धोदधिः तस्य नवायाः सुधायाः उल्लास उद्भव इवललिते समाधौ मन आधातु त्वरयति ॥ २३ ॥

विलक्षेति—॥ विलक्षेण लज्जया उपक्षिप्तमन्वितं यथा भवति तथा विषयेषु शब्दादिषु रसः प्रीतिः स एव गन्धर्वं नगरं तस्य प्रशंसायाः याथार्थ्यं सत्यत्वं चित्ते प्रणिदधत्यपि तनुभृत् जीवः मया हस्ते दत्तेसति तरसा झटिति मतिकलुषं चित्तकालुष्यमुल्लङ्घ्य परब्रह्मणि एकान्तोऽनन्भवजलनिधिं संसाराब्धिं गोष्पदयति गोष्पदवत्करोत इत्यर्थः ॥ २४ ॥

वासनयादर्शितः विषयरस एव बलिशंमत्स्यबन्धनं तेन मोहिते सति निशाकरग्रहणकुतूहलेन प्रसारितकरस्य बालिशस्येव विगलित आशंसः आश्वासो यस्यतथा । यथा चन्द्रग्रहणायबेयाप्रसारित करस्य बालस्य तत्प्राप्तिर्नभवति तथैवास्य मोक्षलाभोपि न स्यादिति मानसाश्वासो मम नास्तीतिभाव: ॥

विवेकः—अयि भीरु अवधारितपरमार्थापि किंपचानमानसेव किं पुनरप्यतिशङ्कसे शृणुष्वैतत् ।

विषमधु बहिष्कुर्वन्धीरो बहिर्विषयात्मकं
परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः ।
निरवधिमहानन्दब्रह्मानुभूतिकुतूहली
जगति भविता दैवात्कश्चिज्जिहासितसंसृतिः ॥२५॥

निस्संशयः खलु पटुभिरपि विटपमारोहद्भिरप्राप्तानां पचेलिमानां फलानामयतमानस्यापि सुकृतपरिपाकेन पान्थजनस्य पुरतः परिपातः ।

अपि च ।

विवित्सति यदि स्वयं किमपि सूरिसेव्यं पदं
कृतस्य यदि निष्कृतिर्यदि करिष्यते नाहितं ।

किंपचानं क्षुद्रं मानसं यस्याः सा तथा एतद्वक्ष्यमाणं शृणु । किंतदित्यत आह विषेति—॥ बहिर्विषयाश्शब्दादयः तदात्मकं तत्स्वरूपं विषमधु विषसंसृष्टमधु अत्यल्पसुखमनर्थावहं चेति ज्ञात्वा बहिष्कुर्वन् असेवमानः अनेन पशुपुत्रादिकमै हिकमामुष्मिकं स्वर्गादिकं च त्याज्यमिति प्रत्यपादि परिमितरसस्य भगवदपेक्षया शेषत्वपारतन्त्र्याद्यनुभवमहानन्दरसविधुरस्य स्वात्मनः प्राप्तौ प्रयासाद्यत्नात्पराङ्मुखः परावृत्तः निरवधिः अवधिरहितः महानन्दो यस्यां तस्यां ब्रह्मानुभूतौ कुतूहली इच्छावान् जिहासितत्यक्तुमिष्टा संसृतिः संसारो येन स तथा कश्चित्पुरुषः दैवाज्जगति भविता ॥ २५ ॥

दैवादित्युक्तमेव सदृष्टान्तमाह निस्संशयइति । दृष्टान्तबलेनास्य सामर्थ्यं यज्ञादिकमकिंचित्करं भगवत्कृपैव तत्प्राप्तिहेतुरिति व्यक्तं विवित्सादिसंभवे मुक्तिस्स्यतीत्याह अपिचेति ।

विवित्सतीति—॥ किमप्यवाङ्मनसगोचरं सूरिसेव्यं नित्यमुक्तानुभाव्यं

यत्र पूर्वे साध्यास्सन्ति देवाः ।
सदापश्यन्ति सूरयः ॥

इत्यादि श्रुतेः पदं स्थानं स्वयं यदि विवित्सति लब्धुं वाञ्छति कृतस्य पापस्येति शेषः निष्कृतिः प्रायश्चित्तं यदि क्रियते यदि अहितं प्रातिकूल्यं करिष्यते नयदि विषयं·

निसर्गसुहृदीश्वरो यदिहलक्ष्यमन्वीक्षते
किमत्रपरमुच्यते किमितिनात्मविन्मुच्यते॥ २६ ॥

सुमतिः—

* णाह जंएव्वं तुए दिण्णहत्थो संसारसाअरं अदूलङ्घेइ पुरिसो मे ताकहं दवदहणपज्जलिअपस्सजुअलदारुअरगअव्व कीडो सारमेअगण परिगओव्व सारंगो समीरणांदोलणडोलाअन्तपोओदरगओव्व संजत्तिअसत्थो महप्पवाहमज्झणिरोहसंभंतणअणोव्व जंबुओ विसहरपरिगहिअ घरघुं-तहिअओव्व कुडुम्बिअणो वियडअरभङ्गसंभमसंखुहिअगंगाअडवेपंतसंहणणोव्व साहिमण्डलो राहवसरणिअरक्खोहिअरअणाअरमज्झट्ठिओव्व मच्छसंघाओ सज्झसगहिओ होइ ।

---

* नाथ यद्येवं त्वया दत्तहस्तः संसारसागरमतिलंघते पुरुषः तत्कथं दवदहन प्रज्वलितपार्श्वयुगलदारूदरगत इव कीटः सारमेयगण परिगत इव सारङ्गः समीरणान्दोलनडोलायमान पोतोदरगत इव सांयात्रिकसार्थः महाप्रवाहमध्यनिरोधसंभ्रान्तनयन इव जम्बुकः विषधरपरिगृहीतगृह घूर्णमानहृदय इव विकटतरभङ्गसंभ्रमसंक्षुभितगङ्गातटवेपमानसंहनन इव शाखिमण्डलः राघवशरनिकरक्षोभित रत्नाकरमध्यस्थित इव मत्स्यसंघातः साध्वसगृहीतो भवति ।

सुहृत्स्वभावसुहृत् सुहृदं सर्वभूतानामिति स्मृतेः ईश्वरः भगवान् लक्ष्यं व्याजमन्वीक्षते यदि आत्मवित् परावरतत्त्वयाथात्म्यवेदी किमिति न मुच्यते कुतो हेतोर्न मुच्यते मुच्यत एवेत्यर्थः । अत्रास्मिन्नर्थे परमन्यत्किं किंवोच्यते न किंचिदुक्तव्यमिति भावः ॥ २६ ॥

दव दहनेन वन वह्निना प्रज्वलिते पार्श्वयुगले यस्य तस्य दारुणः उदरमभ्यन्तरं गतः कीटः कृमिविशेष इव सारमेयाणां शुनां गणेन परिवृत्तः सारंगः हरिणः समीरणेनान्दोलनं चालनं तेन डोलायमानस्य पोतस्योदरगतः सांयात्रिकाणां पोतवणिजां सार्थसमूहः महतः प्रवाहस्य मध्ये निरोधेन संभ्रान्ते नयने यस्य स तथा जंबुकः फेरुः विषधरेण सर्पेण परिगृहीते गृहे घूर्णमानं हृदयं यस्य स तथा कुटुंबि पुत्रपौत्रादि समेतो जनः विकटतरमतिशयेन विशालं यस्यतटं तस्यभंगे पातने यः संभ्रमस्तेन संक्षु

निसर्गसुहृदीश्वरो यदिह लक्ष्यमन्वीक्ष्यते
किमत्र परमुच्यते किमिति नात्मविन्मुच्यते॥ २६ ॥

सुमतिः—

• णाह जं एव्वं तुए दिण्णहत्थो संसारसाअरं अइलङ्घेइ पुरुसो मे ता कहं दवदहणपज्जलिअपस्सजुअलदारुअरगअव्व कीडो सारमेअगणपरिगओव्व सारंगो समीरणांदोलणडोलाअन्तपोओदरगओव्व संजत्तिअसत्थो महप्पवाहमज्झणिरोहसंभंतणअणोव्व जंबुओ विसहरपरिग्गहिअ घुम्मंतहिअओव्व कुडुम्बिअणो विअडअरभङ्गसंभमसंखुहिअगंगाअडवेपंतसंहणणोव्व साहिमण्डलो राहवसरणिअरखोहिअरअणाअरमज्झट्ठिओव्व मच्छसंघाओ सज्झसगहिओ होइ ।

• नाथ यद्येवं त्वया दत्तहस्तः संसारसागरमतिलंघते पुरुषः तत्कथं दवदहनप्रज्वलितपार्श्वयुगलदारूदरगत इव कीटः सारमेयगणपरिगत इव सारङ्गः समीरणान्दोलनडोलायमानपोतोदरगत इव सांयात्रिकसार्थः महाप्रवाहमध्यनिरोधसंभ्रान्तनयन इव जम्बुकः विषधरपरिगृहीतघूर्णमानहृदय इव विकटतरभङ्गसंभ्रमसंक्षुभितगङ्गातटक्षेपमानसंहनन इव शाखिमण्डलः राघवशरनिकरक्षोभितरत्नाकरमध्यस्थित इव मत्स्यसंघातः साध्वसगृहीतो भवति ।

सुहृत्स्वभावसुहृत् सुहृदं सर्वभूतानामिति स्मृतेः ईश्वरः भगवान् लक्ष्यं ध्यानमन्वीक्ष्यते यदि आत्मवित् परावरतत्त्वयाथात्म्यवेदी किमिति न मुच्यते कुतो हेतोर्न मुच्यते मुच्यत एवेत्यर्थः । अत्रास्मिन्नर्थे परमन्यत्किं किं वोच्यते न किंचिद्वक्तव्यमिति भावः ॥ २६ ॥

दव दहनेन वन वह्निना प्रज्वलिते पार्श्वयुगलं यस्य तस्य दारुणः उदरमभ्यन्तरं गतः कीटः कृमिविशेष इव सारमेयाणां शुनां गणेन परिवृत्तः सारंगः हरिणः समीरणेनान्दोलनं चालनं तेन डोलायमानस्य पोतस्योदरगतः सांयात्रिकाणां पोतवणिजां सार्थस्समूहः महतः प्रवाहस्य मध्ये निरोधेन संभ्रान्ते नयने यस्य स तथा जंबुकः फेरुः विषधरेण सर्पेण परिगृहीते गृहे घूर्णमानं हृदयं यस्य स तथा कुटुंबि पुत्रपौत्रादिसमेतो जनः विकटतरमतिशयेन विशालं यस्यतटं तस्यभंगे पातने यस्संभ्रमस्तेन संक्षु

आमोक्षाच्च विदुषोपि निरनुबन्धाभीतिरिति नभःप्रसूनसौरभा स्वादः ।

दिग्देशकाल करणाकरणादिरूपे
देहादिके च हितसाधनभावयोग्ये ।
दुष्कर्मपङ्क्तिमनुचिन्तयतोविचित्रां
किन्तद्यदस्यपुरुषस्यनभीतिहेतुः ॥ २६ ॥

सुमतिः—* एव्वं किल सव्वंवि जइ भअट्ठाणं ताकहं णिब्भअ णि· व्वाणिज्जं पणिहाणंसंपज्जइ ।

विवेकः-भद्रे संयगनुयुक्तं भवत्या, अस्ति खलु सूक्ष्मं किंचित् तदपि प्रतिपन्नामेवत्वां बोधयामि प्रतिसन्धीयतामिदं तावत् ।

---

* एवं किल सर्वमपि यदि भयस्थानं तत्कथं निर्भयनिर्व्याकर्णीयं प्रणिधानं संपद्यते ।

अत्र केचिन्नबिभेति कुतश्चनेति श्रुतेः ब्रह्मवेदनानन्तरं विदुषोभयं न भव तीति वदन्ति तदनूद्य दूषयति आमोक्षादिति—॥

विदुषा ब्रह्मज्ञानवतः आमोक्षादाशरीरवियोगान्निरनुबन्धनिर्हेतुका भीतिर्न भविष्यति इति वचनं नभःप्रसूनसौरभास्वादः अत्यन्तासंभावितइत्यर्थः कुत एवमुच्यत इत्यत आह

दिग्देशेति—॥ दिशः प्राच्यादयः देशाः कुरुक्षेत्रचोलादयः कालाः वसन्तादयः करणं नित्यनैमित्तिक कर्मणामकरणं काम्यकर्मणां आदिशब्देन समयाचारो गृह्यते एवंरूपे देहादिके च अत्र आदिशब्द इन्द्रिय वाची हितसाधनभावस्य मोक्षसाधन त्वस्य योग्ये विचित्रां दुष्कर्मपंक्तिं अनुचिन्तयतः अस्य पुरुषस्य यद्भीतिहेतुर्नभवति तस्किं न किमपीत्यर्थः । मोक्षसाधनतया प्रतीतेषु दिगादिषु दुष्कर्मवशात्कदा किं भविष्यतीति सर्वभय जनकं भवतीति भावः ॥

कालेष्वपि च सर्वेषु दिक्षुसर्वासुचाच्युत ।
शरीरे च गतौचापि वर्ततेमे महद्भयं ॥ इत्युक्तेः ॥ २६ ॥

प्रतिपन्नं ज्ञातमेवप्रतिसन्धीयतां अनुस्मर्यताम् ।

सुमतिः—* आणावेदु अय्यउत्तो ।

विवेकः—

प्रवृद्धमतिकश्मलप्रलयपावकप्रक्रियां
विमुच्य भगवत्कृपां वृजिनसिन्धुकुक्षिंभरीं ।
कदध्वपरिवर्त्तिभिर्यदिहकर्मनिर्मीयते
तदस्तुलवणाकरे लवणसेतुराधित्सितः ॥ ३० ॥

यः पुनरनन्यभावेन भगवदनुकम्पामालम्बते तस्य तु तादृशीं सिद्धिमवधारय ।

विविक्तनिखिलस्थितिर्विषयवृत्तिनिर्वेदवान्
विरक्तिपरिरम्भणग्लपितसर्वदुर्वासनः ।
निवृत्तिपथजाङ्घिको निभृतचित्तवृत्तिः परं
प्रपद्यमुरभित्पदं भवमतीत्यसंसिध्यति ॥ ३१ ॥

---

* आज्ञापयत्वार्यपुत्रः ।

प्रवृद्धेति—॥ प्रवृद्धं अधिकं यन्मतिकश्मलं मतिकालुष्यंतस्य प्रलयपावकस्य कालानलस्यप्रक्रियां प्रकारं तथात्मकरीमित्यर्थः वृजिनानि पापानि एव सिन्धुस्समुद्रः तेनकुक्षिंभरीं उदरभरणं कुर्वाणां पापापहन्त्रीमितियावत् भगवत्कृपां विमुच्यकदध्वसु दुर्मार्गेषु स्वर्गादि साधनेषु प्रवृत्तिभिर्यत्कर्मनिर्मीयतेतत् लवणाकरे आधित्सितः आधातुमिष्टः लवणसेतुः लवणैः कृतस्सेतुरस्तु समुद्रे चिकीर्षितलवण सेतुरिव स्वयं नश्यतीति भावः ॥ ३० ॥

एवं भगवत्कृपावैधुर्य्येप्रणिधानाभावं प्रतिपाद्य तदालम्बने भगवत्प्राप्ति पर्य्यन्तां सिद्धिं सिध्यतीत्याह यःपुनरिति—॥

अनन्यपरात्मनोऽन्यो न विद्यते यस्मिन् सोऽनन्यः

तेन भावेन तत्तादृशीं इत्यत्र तच्छब्द स्वरूपपरः तादृक्शब्दः स्वभावपरः तां तादृशीं च सिद्धिमवधारय विविक्तदेश सेवित्वादिभिः समाधिसिद्धिः फलसिद्धिश्च भविष्यतीत्याह—

विविक्तेति—॥ विविक्ते एकान्ते निखिलास्थितिः स्थितिशब्दः गमन शयना- दीनामप्युपलक्षकः अनेन विविक्तदेशसेवित्वं सूच्यते विषयेषु शब्दादिषु यावृत्तिः वर्त्तनं तदनुभवः तस्यां निर्वेदवान् विरक्तेः वैराग्यस्य परिरंभणेन संश्लेषेण ग्लपिता श्रान्ता सर्वा दुर्वासना यस्य सतथा निवृत्ति पथे निवृत्तिधर्मे जाङ्घिकः अध्वगः सर्वेन्द्रियव्यापारे

सुमतिः—*जुत्तं एदं तहवि पच्चाख्खिअपरमत्थं तुमं एव्वपरिपुच्छं-मणिम्मलगुरुसआसणिध्धारिअणिअमंतहिअआणं णिट्ठाविअणिखिल-पडिपक्खाणं णिस्सेसपसमिअणिज्जरघरवासरसवासणाणं अणाल-ख्खिअदोसगन्धमङ्गलैकताणा महुमहणचलणसेवामहाणंदलाहलंपडाणं अप्पमाअपरिगहिअ णिउत्ति धम्माणं असम्भाविअपच्चूहाणं वि महा-पुरुसाणं केण उण विणिवाएण मोख्खोव्वाओ सिग्घंणसंपज्जइ ।

विवेकः—प्रिये इदमपि ते महामतिभिरवधारणीयमतिगहनमभि-दधामि यत्सनकसनन्दनसनत्कुमारनारदशाण्डिल्यप्रभृतयः परमैकां-तिनः प्रतिपादयन्तिआकर्ण्यताम् एतदवहितया भवत्या—

तिमिङ्गिल तिमिङ्गिलो गिलतितङ्गिलस्तन्तथा
तमप्यथ च तद्गिलस्तदिहपश्यकर्मक्रमे ।

---

*युक्तमेतत् तथापि प्रत्यक्षित परमार्थं त्वामेव परिपृच्छामिनिर्मलगुरुसकाशनि-र्धारितनिगमान्तहृदयानां निष्ठापितनिखिलप्रतिपक्षाणां निश्शेषप्रशमितनिर्भरगृह-वासरसवासनानामनालक्षितदोषगन्धमङ्गलैकतानमधुमथनचरणसेवामहानन्दलाभलं-पटानां अप्रमादपरिगृहीत निवृत्तिधर्माणां असम्भावित प्रत्यूहानामपिमहापुरुषाणां केन पुनर्विनिपातेन मोक्षोपायः शीघ्रं न सम्पद्यते ।

निभता निश्चला चित्तवृत्तिः मनोव्यापारो यस्यसतथा परं सर्वोत्तरं मुरभित्पदं भगव-त्स्थानं प्राप्य भयमस्मात्य न बिभेति कुतश्चनेति श्रुतेः संसिध्यति संसिद्धो भवति सिद्धभगवत्साम्यः भविष्यतीत्यर्थः ॥ ३१ ॥

निष्टापिताः प्रणाशिताः निखिलाः प्रतिपक्षा । यैस्तेषां निश्शेषं यथाभवति तथा प्रशमिता निर्भरगृहे स्वर्गे वासरसेवासना येषां ते तथा अनालक्षितः दोषगन्धो ययोस्तौ तथा मंगलानामेकताने मधुमथन चरणौ तयोस्सेवायां यो महानन्दरसः तस्य लंपटानामुत्सुकानामप्रमादेनावधानेन परिगृहीतो निवृत्तिधर्मो यैस्तेषां विनिपातेन विघातेन मोक्षोपायभक्तिः प्रपत्तिर्वा शीघ्रं न संपद्यते फलप्रदो न भवति ।

अतिगहनमति रहस्यं। प्रभृति शब्देन शुक शौनकादयो गृह्यन्ते ।

तिमिमिति—॥ तिमिङ्गिलः शतयोजनायतमत्स्यग्रसनक्षमश्चामत्स्यः तिमिं शत-योजनायतं मत्स्यं गिलति ग्रसति किल तथा तद्गिलस्तद्भक्षकः तं गिलति तद्गिलः ति-

समस्तवृजिनोदधिग्रसनकुम्भकुंभोद्भवे
निवृत्तिमपि धर्ममस्यनघतत्त्वविन्निग्रहः ॥ ३२ ॥
अन्यदप्येतादृशमवधारयेथाः ।
प्रथितंपातकिवर्गंकृतघ्नएकोहिकृत्स्नमतिशेते ।
तमिमंक्रियमाणघ्नस्तमपिदुरात्माकरिष्यमाणघ्नः ॥ ३३ ॥

सुमतिः-(विचिन्त्य,) * इदुणाम णिस्समभ्भहिअमाहप्पस्स पडि-बुद्धअणणिग्गहस्स पहावो दस्सिओ अस्स उण णाह किं णस्थि परिहारो ।

विवेकः-अस्तितु कश्चिदेकः यदिह पुनस्तत्प्रसादनं ।

तथा हि ।

तोयोद्गमनेन परितापमुपेत्य जन्तु
स्तोयेन जीवति पुनः क्रमयोजितेन ।

---

* इतिनाम निस्समाभ्यधिकमाहात्म्यस्य प्रतिबुद्धजननिग्रहस्य प्रभावो दर्शित अस्य पुनर्नाथ किन्नास्ति परिहारः ।

मिङ्गिलगिलगिलः तं तिमिङ्गिलगिलं गिलति इह लोके कर्मक्रमे कर्मपरंपरायां तत्ति मिगिरणादिकं पश्य एवमनघस्य तत्त्वविदः ब्रह्मविद इत्यर्थः निग्रहः कोपः तद्रूपय पचारजन्मा तद्दोषः समस्तानि च तानि वृजिनानि च तान्येवोदधिः तस्यग्रसने हिंभकुंभोद्भवं बालागस्त्यं समस्तपापहरमपि निवृत्तिधर्मम् अपि नाशयति ब्रह्मविद पचारेण प्रतिबद्धफला विद्या भवतीति भावः ॥ ३२ ॥

उक्तं निवृत्तिधर्मादपि ब्रह्मविदपचारस्य प्राबल्यं दृष्टान्तेन दृढयितुमाह अन्यदपीत्यादिना— ॥

दृष्टान्तान्दर्शयति-

प्रथितमिति—॥ अत्र यथा पातकिवर्गात्कृतघ्नस्य कृतघ्नात् क्रियमाणघ्नस्य तस्मात्करिष्यमाणघ्नस्य प्राबल्यं तथा सकलपातक निवर्तकादपि निवृत्तिधर्मात् ब्रह्म-विदपचारस्य प्राबल्यमिति भावः ॥ ३३ ॥

इति नाम निस्समाभ्यधिकमाहात्म्यस्य प्रतिबुद्धजन निग्रहस्य प्रभावोदर्शितः तत्प्रसादनं तस्य ब्रह्मविदप्रसादनं ।

तत्प्रसादनस्यपरिहारत्वं दृष्टान्तेन उपपादयति-।

तोयोद्गमनेनेति—॥ जन्तुः मत्स्यः तोयोद्गमनेन तोयस्य उद्गमनेन त्यागेन

तद्वन्महत्त्वजनतस्तमसिप्रविष्टः

स्तत्संश्रयेण भजतेपरमार्थदृष्टिम् ॥ २४ ॥

अपि च ।

बहुजन्मसुकृतसिद्धं ब्रह्मविदपचारदूरगंपुरुषं ।

अभिसरतिनित्यरक्ता सत्वरमपवर्गसाधिनी विद्या॥२५॥

सा च ।

परभक्तिरप्रकम्प्यानिवृत्तिधर्मानुबन्धिगुणबन्धैः ।

भवजलधि पोतपात्री जातावृद्धिं दिनेदिनेभजते ॥२६॥

सुमतिः-(सविमर्शम्) *जुत्तं एदं जइ दुण्णिवारणिव्वट्टिदबलणिम्मि-आअपक्कणिस्सेसकसाअस्स मोक्खपक्खणिक्खेव जोग्गा अणिमग्गहिम-

---

* युक्तमेतत् यदि दुर्निवारनिर्वर्तित बल निर्मिता अपक्वनिःशेषकषायस्य मोक्ष-

---

परितापमुपेत्य क्रमेण योजितेन तोयेन पुनर्जीवति तद्वत्महत्त्वजनतः तमसि अज्ञाने प्रविष्टः जनः तत्संश्रयेण तस्य ब्रह्मविदः संश्रयणेन परमार्थदृष्टिं यथार्थज्ञानं भजते यथा मत्स्यः तोयत्यागेन तप्तः पुनरपि जलेनैव जीवति एवं तत्वविदो नियमात् अज्ञानमासाद्य मोमुह्यमानो जनः तत्प्रसादेनैव प्रतिबुद्धोभवतीति भावः ॥ २४ ॥

तस्य समाधिसिद्धिश्चभवतीत्याह अपिचेति—।

बह्विति—॥ बहुषु जन्मसु कृतैस्सुकृतैस्सिद्धं निर्मलचित्तब्रह्मविद्विषयापचारस्य दूरगं दूरेवर्तमानं अपवर्गसाधिनीविद्या नित्यरक्ता नित्यमनुरक्तासती सत्वरमभिसरति यत्र ।

जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः ।

नराणां क्षीणपापानां कृष्णेभक्तिः प्रजायते ॥

इत्यादिक्रममनुसन्धेयं ॥ २५ ॥

निष्पन्नायाविद्याया दिने दिने वृद्धिश्चभवतीत्याह साचेति—॥

परभक्तिरिति—॥निवृत्तिधर्मानुबन्धिनः ये गुणाश्शमदमादयः तएवबन्धाः तैस्सम्बन्धैः अप्रकम्प्या तयेव भवजलधेः संसारसागरस्य पोतपात्री पोतरूपपात्री जाताविद्या परभक्तिरूपा सती दिने दिने वृद्धिं भजते ॥ २६ ॥

गरिमलहिमवसित्तणीसित्तणपत्तिपाअम्मपमुहापरमपुरुसत्तसिद्धिसा-
हणजोअन्तराआणहोन्ति ।

विवेकः—सत्यं देवि दुर्जया एते दुरन्तवैरिणो योगान्तरायाः न तेषां संभवे परिहरणादपि सम्भवस्यैव परिहरणेन निष्प्रत्यूहा भवति नैःश्रेयसीसिद्धिः—

ततः प्रविशति भूर्जपत्रभूषितोत्तमांगो दूतः—

दूतः—साञ्जलिबन्धं—

राजन् अयमहमस्मि देवस्य महाराजस्य महामोहस्य दृष्टिपथमनुक्रान् सर्वत्राप्रतिहतगतिः संवृतिसत्यो नाम दूतः तदभिवादये सावरोधं भवन्तं।

विवेकः—(स्वगतं) किंनिमित्तमयमुपागतः ।

(प्रकाशं) अस्थानवृत्तिमपहायापरिमितायुर्भूयाः

दूतः—उत्तमाङ्गादवतारितं दरविकसिताञ्जलिकोशनिहितं भूर्जपत्रमुपदर्शयन्, इदं किल महाराजचतुर्दशभुवनचक्रवर्तिनो द्वापरमन्त्रिनिर्धारितं निखिलकार्यस्य दुर्मतिमतप्रतिष्ठितस्य देवस्य महामो

पक्षनिक्षेपयोग्या अणिममहिमगरिमलघिमवशित्वेशित्वप्राप्तिप्राकाम्यप्रमुखाः परम-पुरुषार्थसिद्धिसाधनयोगान्तराया न भवन्ति ।

अपक्वाः अदग्धाः निःशेषाः कषायाः मनोमलानि यस्य तस्य पुरुषस्येति शेषः । मोक्षपक्षविक्षेपस्य योग्याः परमपुरुषार्थस्य भगवत्प्राप्तिरूपस्य सिद्धेः साधनभूतस्य योगस्यान्तराया न भवन्ति ।

यदि एतेषां संभवेऽसति परिहरणादपि संभवस्यैव ।

परिहरणेन यथा संभवो नस्यात्तथा प्रयत्नेन ॥

संवृतिसत्यः अपरमार्थसत्यः असत्येषु वस्तुषु सत्यत्व बुद्धेरभिमानिदेवताविशेषः । एष एव योगाचारेण संवृतिसत्य इति व्यपदिश्यते । प्रच्छन्नबौद्धास्तु व्यावहारिकसत्य इति वदन्ति । सावरोधं सस्त्रीकं ।

अस्थानेष्वपरमार्थवृत्तिषु वृत्तिं वर्तनमपहाय दरविकसिते अञ्जलिकोशे पद्मकोशाकारे अञ्जलौ महितं चतुर्दशभुवनानां । चक्रवर्तिनः सार्वभौमस्य । द्वापरयुगाभिमानी स एव मन्त्री सचिव कलेरासन्नत्वात् महामोहस्य मन्त्री तेन निर्धारितं निश्चितं अखिलं कार्यं यस्य तस्य ।

हस्य लोभनाम्नागणिकेन लिखित्वास्त्वदर्थं प्रेषितमन्तरङ्गणमया उपह्वरे तमलंघनीयंशासनं ।

विवेकः—सानादरावहित्थं, भद्रा अस्माकमप्यभिमतः खल्वसि-तदिह उपह्वरे त्वमेववाचय ।

दूतः—यदादिशति महाराज इति विनयनिभृतं वाचयति ।

एतत्कामादिमान्यस्य महामोहस्यशासनं ।
संसारत्रासभीतानां स्वर्गिणामपिसंमतं ॥ ३७ ॥

विवेकः—(अपवार्य) (सान्तर्हासं) देवि किं वयमपि शासनीयास्तु-रात्मनो महामोहस्य परचित्तवेदनार्थमिहवाचिकन्तावच्छ्रोतव्यं भद्र ततस्ततः—

दूतः—परोपास्तिश्रद्धावधिकमतिवृत्तंयदिहते ।
तदैश्वर्यप्राप्त्यै भवतु बहुमन्येमहितदा ॥

विवेकः—(अवज्ञां नाटयन्) प्रिये आकर्णितः किलायं भिक्षुपाद-प्रसरणन्यायः अथवा स्वाभाव्यमेव शवमुष्टिवद्गृहीतयाहिता महामोहस्य ।

सुमतिः—* एव्वं एदं ।

---

* एवमेतत् ।

दुर्मतिमते प्रतिष्ठितस्यानादरावहित्थाभ्यां सहितं यथा भवति तथा तस्याभिमतस्त्वं सत्यत्वेन । उपह्वरे एकान्ते ।

एतदिति—एतत्कामादि मान्यस्य आदि शब्देन क्रोधलोभादयो गृह्यन्ते संसारस्य त्रासात् भयात् भीतानामैहिकभोग प्रवणानां स्वर्गिणामपि ॥ ३७ ॥

परेषां मोहादीनां चित्तवेदनार्थमभिप्राय ज्ञापनार्थं ।

परेति—परस्य भ्रमणा उपासये उपासने याश्रद्धा आदरः सा अवधिः काष्ठा यस्य ततथा ते यदतिवृत्तं अतिलंघ्य वर्त्तनं अनुचिताचरण मिति यावत् तत् ऐश्वर्य प्राप्त्यै भवतु । परोपास्तिः ऐश्वर्य प्राप्तये च भवति ।

विवेकः-ततः ।

दूतः-अतिक्रान्तावस्मद्भ्रुकुटिनटनारम्भसमय ।
प्रदीप्तक्रोधादिप्रतिभटनिरुद्धो न भवसि ॥ ३८ ॥

विवेकः-प्रिये स्वधर्मनिरतानस्मान् प्रति सोयमाशीर्वादः अयि मोहदूत किमस्ति शेषं वाचकस्य ।

दूतः-अस्ति किञ्चिदात्मीयबलाध्यक्षकामक्रोधवैभवविषयम् ।

विवेकः-अस्तु को दोषः शृणुमस्तावत् ।

दूतः-विश्वाधिको विलयमेष्यति कस्य भूम्ना
वीरः प्रसिद्धमहिमा विबुधेषु कामः ।
क्रोधोदितं यदनुभाववशेन शम्भोः
शृङ्गारशीतलमभून्नयनं तृतीयम् ॥ ३९ ॥

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

इत्यत्र तथा दर्शनात् । तदा बहुमन्येमहि ॥ ३८ ॥

अयं भिक्षुपादप्रसरण न्यायः आकर्णितः । अनुपहतः भिक्षुर्हि कुटुंबिनां गृहेषु पादमेकं किंचित्प्रसार्यते: कवाटेन द्वारपिधाने क्रियमाणे पादेन निष्पीडित इत्याकृष्य पुनः कवाटे अपावृते अन्यमपि चरणं तत्र निधायान्तः प्रविष्ट इति तद्वदत्रापि किंचिदवकाशेदत्ते सर्वाक्रमणसंरंभः । पश्चान्तरं अथवेति स्वाभाव्य स्वाभाव्य एवमवमुष्टेः तवस्य मुष्टिरिव गृहीतपाहिता गृहीतस्य वस्तुनो ग्राहकत्वमेतत् ।

अतिक्रान्तेति—अतिक्रान्तौ मद्दासनातिलंघने सत्यां अस्माकं भ्रुकुटिनटनारंभ समये प्रदीप्ताः तेजिष्ठाः ये क्रोधादयः तएव प्रतिभटाः तैर्निरुद्धस्त्वमभवसि भवसि ॥ ३८ ॥

इतमेवार्थमन्यथा योजयन्ति स्वधर्मेति स्वधर्मः पुरुषमोक्षरूपः तस्मिन्निरतानस्मान् प्रत्याशीर्वादः निरुद्धो न भवसि जीवितो न भवसीति ।

आत्मीयस्य बलस्याध्यक्षा ये क्रोधादयः ते विषयाः यस्य तद्विषयं ।

विश्वेति—विश्वस्मात् जगतो अधिका विबुधेषु देवेषु प्रसिद्धमहिमा कामः कस्य भूम्ना महिम्ना विलयमेष्यति न कस्यापीत्यर्थः शंभोः क्रोधोदितं क्रोधेन विकसितं तृतीयं नयनं यदनुभाववशेन यद्वैभववशेन शृंगारेण शृंगाररसेन शीतलं सुभगं अर्धनारीश्वरस्य ललाटनेत्रे अर्धस्य गौरीमयतया तृतीय नयनस्य शृंगारशीतलत्वं ॥ ३९ ॥

अपि च ।

कामोसौसमवर्ततााग्र इतिहि ब्रूते समीचीश्रुतिः
कामादेवजगज्जनिस्थितिलयैराद्यः पुमान्क्रीडति ।
निष्कामोपि सकाम एवलभते निश्रेयसंदुर्लभं
कामः कस्य वशेकएषभुवने कामस्यनस्याद्वशे ॥ ४० ॥

सुमतिः—*महाराज किं तुम्हेहिं विदुज्जयो मअरलञ्छणो ।

विवेकः—देवि मिथ्यादृष्टिप्रियस्यमोहस्य प्रलपिते किं प्रत्युच्यते अवशिष्टमपि निशामयामः—

दूतः—यदि कुप्यतिकोपाय न कोपमतिवर्त्तते ।
अकोपविषयं कोपं कथं कश्चिद्विजेष्यते ॥ ४१ ॥

सर्वदमुभयतः पाशारज्जुः ।

सुमतिः—†णाह णं कामादो विकोवो दुज्जयो जेणकामजअम्मि विसअं कालणं होइ ।

---

* महाराज किं युष्माभिरपि दुर्जेयोमकरलाञ्छनः ।

† नाथ ननु कामतोपि कोपो दुर्जयो येन कामजयेपि स्वयं कारणं भवति ।

पुनरपि कामवैभवमाह अपिचेति—

कामइति—असौ कामः अग्रे समवर्त्ततेति समीची समीचीन श्रुतिर्ब्रूते हीति प्रसिद्धौ । अत कामस्तदग्रे समवर्तताधीति श्रुतिरभिप्रेत आद्यः सर्वकारणभूतः पुमान् नारायणः कामादिच्छयैव जगज्जनिस्थितिलयैः क्रीडति । अत सोऽकामयत बहुस्यां प्रजायायेति इत्यादि का श्रुतयोनुसंधेयाः निष्कामोपि पुरुषः दुर्लभं निश्रेयसंतस्मिन् सकाम एव लभते मोक्षेच्छाया अभावे तत्प्राप्त्यसंभवात् एवं भूतः कामः कस्यवशे न कस्यापि भुवने कामस्यवशे यो नस्याद्देवकः न कोपीत्यर्थः ॥ ४० ॥

मिथ्यादृष्टेः मिथ्याज्ञानस्य प्रिय इष्टः तस्य प्रत्युच्यते प्रत्युत्तरं दीयते ।

यदिति—॥ कोपाय कुप्यति यदि अकोपं नातिवर्त्तते अकोपः कोपाभावः विषयो यस्य तं कोपं ममकोपोमाभूदित्यकोपं इत्यर्थः कश्चित् कथं विजेष्यते न कश्चित्केनापि प्रकारेण विजेष्यत इत्यर्थः ॥ ४१ ॥

विवेकः—प्रिये स्थानक्रोधो न खलु दोषाय योऽसौ कामादिनिरसनार्थतया परमार्थवेदिभिः प्रशंस्यते (दूतमवलोक्य) दूतश्रुतमिह-भोतव्यं ब्रूहिमद्वचनाद्युष्मत्स्वामिनं ।

अप्राणितमहामोहमनङ्गीकृतमन्मथं ।
विधूतप्रतिघं लोको विवेकं बहुमंस्यते ॥ ४२ ॥

दूतः—साधयाम्यहमिति द्वित्रिपदमतिक्रम्य स्वगतं ।

सुप्तप्रबोधनसमुत्सुकया सुमत्या
पत्न्या सहाचरित विश्वहितं विवेकं ।
जेतुं क एव जगति प्रभवेत्तथापि
स्वामीनियोजयतिमोह इति स्वयन्नः ॥ ४३ ॥

(प्रकाशं) महाराज 'त्यजेदेकं कुलस्यार्थे' इति ।
नीतिंनातिवर्तेथाः इति निष्क्रान्तः ।

सुमतिः—* अय्यउत्त जइ मुत्तिसाहणसज्जो पुरुसो मोहपउत्तेहिं

---

*आर्यपुत्र यदि मुक्तिसाधनसज्जः पुरुषो मोहप्रयुक्तैः कामक्रोधलोभ मदमत्सरप्रभृतिभिरभिभूयते यतावान् तवपरिश्रमोविफलो भविष्यति ।

उभयतः पार्श्वद्वयेपि पाशः बन्धनरज्जूः कोपेमाभूदिति कोपजयेपि कोपवशत्वं तदभावेपि तद्वशत्वं स्यादेवेति भावः ।

स्थाने कामादिजये तदेव विशदयति यासाविति ॥

अप्राणतेति—॥ अप्राणितः प्राणविहीनः संहृतइत्यर्थः महामोहो येन तं अनंगीकृतः मन्मथः येन तं विधूतः निरस्ता प्रतिघः क्रोधो येन तं विवेकं लोको बहुमंस्यते । महामोहादिप्रतिपक्षध्वंसिनं मां लोको बहुमन्यते तदेववरं नतुबहुमन्येमहि तदेति स्वत्कृतं बहुमानमिति भावः ॥ ४२ ॥

सुप्तेति—॥ सुप्तस्य प्रकृतिसंसर्गवशात् संकुचितज्ञानस्य प्रबोधनसमुत्सुकया आर्यै स्वपत्न्या सहाचरित मनुष्ठितं विश्वस्यहितं येन तं विवेकं जेतुं जगति क एव प्रभवेत् कोपिनप्रभवेदेव । एवं सति 'तुष्णीं स्थातव्यमित्यत आह—स्वामीति—। नः अस्मान् ॥ ४३ ॥

त्यजेदेकमित्यादेः अयं आशयः । पुरुषस्य एकस्य मोक्षणे कुलद्वयं नश्यति अस्य वधे कुलद्वयं जीवति अतः कुलद्वयजीवनाय एकं पुरुषं त्यजेदिति ।

कामक्कोहलोहमअमच्चरप्पहुदीहिं अहिहूअइ एआवंदो तुह्म परिस्समो विअलोहोदु—

विवेकः- देवि मैवं मन्वीथाः आशंसेथाः पुनश्शोभनमेव ।

अय्यन्तैरवधारिते भगवति क्षिप्ते विरोधभ्रमे
सांगोपाय विभागसंभृतमतिः संप्रत्यसौ साधकः ।
कामक्रोधनिशातकण्टकमिलत्कालुष्यपङ्कच्छटा
निर्मुक्तेन सुशीतलेनच पथा निश्रेयसं प्राप्स्यति ॥४४॥

(नेपथ्ये) दिव्यवैतालिकौ विजयतां देवः—

प्रथमः—

रम्या यामवती पदार्पणपटी रागाब्धिवेलोद्गति
श्वेताजन्मकदम्बधूलिविततिश्शृङ्गार चूडाजपा ।

शोभनाशंसनप्रकारमाह अय्यन्तैरिति ॥

अय्यन्तैरिति ॥ भगवति नारायणे अय्यन्तैः वेदान्तैः अवधारिते सर्वकारण तया निश्चिते सति अनेनकारणाध्याया उक्तः । विरोधभ्रमेप्रधानपरमाणवादि कारण त्ववादिनीभिः कपिलादिस्मृतिभिः ब्रह्मैककारणत्ववादिवेदान्तानां विरोधस्स्यादिति यो विरोधभ्रमः तस्मिन् क्षिप्ते सति विरोधज्ञानस्य भ्रमत्वं कपिलादि स्मृतीनां पुरुष-प्रणीतानां दोष संभावनया पौरुषेय त्वे वे ान्तानां नित्यनिर्दोषतया च अनेनाविरो-धाध्यायार्थसूचितः । असौ साधकः पुरुष) सांगानां साधन सप्तक सहितानामुपायानां विद्यानां विभागे भेदे संभृतमतिः परिपूर्णमतिस्सन् अनेन साधनाध्यायार्थ स्संगृहीतः । कामक्रोधावेव निशातकण्टकौ ताभ्यां मिलत्प्रत्कालुष्यं मतिभ्रमः तदेव पंकच्छटा ताभ्यां निर्मुक्तेन परित्यक्तेन शीतलेन च पथा अर्चिरादिमार्गेण निश्श्रेयसं अपवर्गं प्राप्स्यति । अनेन फलाध्यायार्थस्संक्षिप्तः ॥ ४४ ॥

एवं मुक्त्युपायायारंभमुक्त्वाप्रतिपक्षस्य सौप्तिकसंनाह समय सूचनं निशामुखवर्णन व्याजेन वैतालिकाभ्यां विशदयति नेपथ्ये इत्यादिना ॥

देवो विजयतामिति वैतालिकौ वन्दिमागधावहतुरिति शेषः । अथ तयोः कश्चि-दुद्गति । स एव प्रथमः ।

रम्येति—॥ रम्या मनोज्ञा यामवत्याः रात्रेः पदार्पणपटी वरण्या व्यासेविता

संमोहद्विपशोणबिन्दुपटलीसंध्याजरीजृम्भते
प्रत्यग्दिग्वनितापयोधरतटीकाश्मीरपङ्क्तद्युतिः ॥४५॥

द्वितीय:—

दिनाधिपविनाकृतिव्यसनखिन्नसंध्यावधू
विधूतकबरीभरप्रसरकौतुकापादकम् ।
विशृङ्खलकलिन्दजाजलतरङ्गभङ्गावली
मलीमसमिदन्तमोजगदशेषमाचूषति ॥ ४६ ॥

विवेकः—(कर्णं दत्वा) देवि दिवाभीतप्रायस्य स्मत्प्रतिपक्षस्य सौप्तिक सन्नाह समयं सूचयतः प्रायेणास्वतोऽवियातवादिनौ वैतालिकौ संपश्यतां भवती

प्रकाशस्सङ्कोचं भजतिजगतस्सीदतिरवौ
तमिस्राविष्फूर्तिस्स्थगयतिमुखं शक्रहरितः ।

कौसुम्भपटीराग एव श्रीष्टिः तस्या वेलाया लक्ष्म्या उद्गतिः उद्गमनमनुरागस्य रक्तवर्णा कविसमय सिद्धं चेतो जन्मनः कामस्यकदंबधूलीनां कदंबपुष्परजसां विततिः मन्मथेन वकीर्यमाणा कदम्बधूलिविततिरित्यर्थः श्रृंगारस्य श्रृंगाररसस्य चूडाजपाकुसुम जात संमोह एव द्विपः तस्य शोणबिन्दूनां सिन्दूरबिन्दूनां पटलीपंक्तिः प्रत्यग्दिगेव वनिता तस्याः पयोधर तटयोः यत् काश्मीरं कुंकुमं तस्य द्युतिः प्रभा सन्ध्या सन्ध्यारागः जरीजृम्भते ॥ ४५ ॥

दिनेति—॥ दिनाधिपस्य सूर्यस्य विनाकृतेः वियोगात् व्यसनं क्लेशः तेन खिन्नायाः सन्ध्याया एव वध्वाः विधूतस्य बन्धान्मुक्तस्य कबरीभरस्य केशपक्षस्य प्रसटः वण्कूसिंरिति यत् कौतुकं तस्यापादकं निष्पादकं विशृङ्खलस्य निर्निरोधस्य कलिन्दजा जलस्य यमुना जलस्य तरंग भंगानां वीचीभेदानां आवलीव मलीमसं नीलं इदं दृश्य- मानं तमः अशेषं जगत् आचूषति आवृणोतीत्यर्थः ॥ ४६ ॥

दिवाभीताः उलूकाः तत्प्रायस्य तत्तुल्यस्य सौप्तिकं सुप्तिसमयसंहारः तस्मिन् संनाहस्य समुचितं सर्वं सूचयतः स्वतः स्वभावादेवावियातवादिनौ धृष्टतयावदतो ॥

प्रकाशेति—॥ रवौसीदति अस्तंपतेसति जगतः प्रकाशः संकोचं भजति त मिस्रायाः अन्धकारस्य विस्फूर्त्तिः शक्रहरितः प्राच्याः स्थगयति विधत्ते विश्वमवस्कन्द-

अवस्कन्दन्विश्वंसुमुखिमधुनासाकमधुना
विधत्तेदुर्दान्तोविविधमपनीतं रतिपतिः ॥ ४७ ॥

अपि च ।

अश्रान्तसन्ततिभिराभरणप्रकाशै
राश्चेडयन्त्यइव मङ्गलदीपभासः ।
अन्तःपुरंतिलकयन्तिसमंसमन्ता
दारात्रिकं मृगदृशोनियमंविधातुं ॥ ४८ ॥

तदहमिहसान्ध्यम् नियममनुपाल्य परब्रह्मप्रवणमानसं पुरुषमभिरक्षामि, भवत्यपि शान्तिशान्त्यादि परिजनसेविता मङ्गलाचरण सौधमधिरुह्य मत्प्रत्यागमन प्रतीक्षावर्तिष्ठथाः ।

इति सुमत्या सहनिष्क्रान्तः—

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
संकल्पसूर्योदये भक्त्युपायारम्भोनामतृतीयोंकः ॥
श्रीमते भगवते भाष्यकाराय नमः श्रीमदेशिकायनमः ।
श्रीमते निगमान्त महादेशिकायनमः ॥

ज्योदयन् रतिपतिरधुनामधुनासाकं विविधमपनीतमन्याय्यं विधत्ते भक्तत्व कारणादिकं कारयति ॥ ४७ ॥

अश्रान्तेति–॥ अश्रान्ता अविरता सन्ततिः परंपरा यासां ताभिः आभरणप्रभाभिः मंगल दीपानां मंगलार्थमारोपितानां दीपानां भासः किरणाः आम्रेडयन्त्य इव वर्धयन्त्य इव स्थिताः आरात्रिं नीराजनरूपं नियमं विधातुं मगदृशः समं युगपदन्तःपुरं समन्तात्तिलकयन्ति अलंकुर्वन्ति सायन्तन समये दीपा नारोप्य तत्तद्देवतानीराजनविधानाय संचरन्त्यस्स्त्रियः अन्तःपुरस्य अलंकारभूताभवन्तीतिभावः ॥ ४८ ॥

अनुपाल्य अनुष्ठायेत्यर्थः । मंगलाचरणसमुचितं सौधमधिरुह्यमत्प्रत्यागमने प्रतीक्षादृष्टिवत्यास्स्व तथोक्ता ।

॥ इति प्रभावल्यां तृतीयोङ्कः ॥

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्तमहागुरवे नमः ।

सङ्कल्पसूर्योदये चतुर्थोऽङ्कः ।

ततः प्रविशति कामो वसन्तश्च

कामः—सखे वसन्त

इक्षुः पेशलमीदृशं मम धनुः पुष्पाण्यमी सायका
स्तंत्रीमंजुलनिस्वना मधुकरश्रेणी शुभा शिंजिनी ।
भीरुस्सन्नबला जनो मम बलं तथ्यं परं कथ्यते
सोहं निर्जितशूलभृत्प्रभृतिकस्संकल्पसिद्धोदयः ॥ १ ॥

अथेदानीं अङ्कास्येन अर्थोपक्षेपकेन अङ्कमवतारयति तत इत्यादि–।

अङ्कान्तपात्रै रङ्कास्यं छिन्नाङ्कार्थस्य सूचनं

इत्यङ्कास्य लक्षणं अत्र पूर्वाङ्कान्ते ।

अवस्कन्दन् विश्वं सुमुखिमधुना साकमधुना ।
विधत्ते दुर्दान्तो विविधमपनीतं रतिपतिः ॥

इत्युक्ताभ्यां मदनवसन्ताभ्यां तत्रास्मत्प्रतिपक्षस्य सौप्तिकसदाहसमयं सूचयत इति । विवेकेनोक्तस्य सौप्तिकस्य सूचनात्कामस्सावस्त्वविभवमाह ।

इक्षुरिति–पेशलं सुन्दरं तन्त्र्या इव मञ्जुलः मनोज्ञः निस्वनो यस्यास्सतथोक्ता शिञ्जिनी ज्या उक्तं सर्वं तथ्यं कथ्यते निर्जिताः शूलभृत् प्रभृतयो येन स तथा सङ्कल्पमात्रादेव सिद्ध उदयोऽभ्युदयो यस्य स तथा ॥ १ ॥

अपि च,

त्वयि संभृतशस्त्रास्त्रे सहाये मम संस्थिते ।
महता पञ्चमोहेन विश्वमेकातपत्रितं ॥ २ ॥

वसन्तः—किमुच्यते कामः खल्वसि,

कामं कामं काममपि सिद्धिं करणैः स्वैः
कारं कारं कर्म निषिद्धं विहितं वा ।
न्यस्यन्तीत्वय्यद्भुतसीम्नि प्रतिबुद्धाः
कामोकार्षीन्मन्युरकार्षीदितिनाम ॥ ३ ॥

अपि च,

विषमनयनमुख्यैर्विक्रमक्रीडितन्ते
सुरपतिभवनानि स्वैरसञ्चारभूमिः ।
उदधिवलयितेयं क्षोणिरुद्यानसीमा
कथमिव मदन त्वं वर्ण्यसे कान्तिसिन्धुः ॥ ४ ॥

कामः—सखे, सर्वलोकविदितमात्मनोऽपि वैभवमनुचिन्त्य, यदेतत्

प्रख्यातस्त्वयि संभवस्सुमनसां विश्वं त्वयानन्द्यते
मुख्यस्त्वं किल षड्विधेषु क्रतुषु ज्योतिस्त्वदेवाश्रयं ।

त्वयि इति—संभृतानि शस्त्रास्त्राणि येन तस्मिन् त्वयि मयि सहाये सम्यक् स्थिते सति महतामोहेन विश्वं जगदेकातपत्रितं एकातपत्रं कृतं ॥ २ ॥

वीक्ष्यमाणातिशयाभिप्रायेण कामो सख्यल्वीति—। कोऽसावतिशय इत्यत आह—

कामंकाममिति—॥ काममपि यां काञ्चित् सिद्धिं कामंकाममभिलष्याभिलष्य स्वैः करणैरिन्द्रियैः निषिद्धं विहितं वा कर्म कारङ्कारं कृत्वा कृत्वा अद्भुतसीम्नि त्वयि कामोकार्षीन्मन्युरकार्षीदितिन्यस्यन्ति नाम प्रसिद्धो ह्येतदिति भावः ॥ ३ ॥

अन्यदप्याह अपि चेति—।

विषमेति—॥ विषमनयनमुख्यैः त्रिलोचनप्रधानैः ते तव विक्रमक्रीडितं पराक्रम लीला सुरपतीनां ब्रह्मादीनां भवनानि स्थानानि स्वैरसञ्चारस्य स्वच्छन्द सञ्चारस्य भूमिः कान्तीनां सिन्धुः अपारं निधानमत एव मदनमदहेतोस्त्वं कथमिव वर्ण्यसे तव महि म्नोऽपारत्वादयमेवंविध इति परिच्छिद्य वर्णयितुमशक्यस्त्वमिति भावः ॥ ४ ॥

प्रख्यात इति—॥ सुमनसां पुष्पाणां शोभनमनसां च सम्भवस्त्वयि प्रख्यात

यत्रश्रीर्धूतपंकजा सचपरस्त्वत्संश्रयोमाधवः
कामस्तत्सचिवः कएव भविताकालोत्तमस्त्वत्समः ॥५॥

अपि च,

वसंतस्त्वं वह्निर्मलयपवनस्सारथिरसा
वशोकादिर्ज्वालामधुकरगणो धूमपटलो ।
सुधासूतिस्नेहस्तदिहजितनिर्वाणवचसो
विरक्तिस्तेदाह्यंद्रुहिणगिरिशादेरपिसतः ॥ ६ ॥

वसन्तः—महावीरमकरकेतन मादृशामतिशयस्त्वदर्थएव, यथा

ऋतवोहिमत्प्रधानास्तवैवनानास्त्रशिल्पिनस्स्रष्टाः ।
विजयसमयं शशांको विश्रमकालं व्यनक्तिदिवसेशः ॥७॥

विश्वं जगत् त्वयानन्द्यते तुष्यति षड्विधाः प्रकाराः येषां तेषु षड्विधेषु ऋतुषु त्वंमु-ख्यः ऋतूनां कुसुमाकर इतिगीतत्वात् ज्योतिः ज्योतिष्टोमः त्वदेकाश्रयं त्वमेव मुख्यः आश्रयो यस्यतत्तथा ।

वसन्तेवसन्ते ज्योतिषा यजेतेति श्रुतेः यत्रधूतानि पंकजानि ययासा श्रीर्लक्ष्मीः शोभा च परः उत्कृष्टः माधवः विष्णुः वैशाखश्च त्वत्संश्रयो यस्य स तथा अतएव कालोत्तमः त्वत्समः कएव भविता नकोपि त्वत्समो भविष्यतीतिभावः ॥ ५ ॥

तमेव अग्नित्वेन रूपयति अपिचेति ॥

वसन्तः इति—॥ हे वसन्त त्वं वह्निः असौमलयपवनः सारथिः तद्धेतु प्रापकः अशोकः कंकेलिरादिर्यस्य स तथा आदिशब्देन आम्रादिर्गृह्यते ज्वाला शोणिम्ना ज्वालात्वं मधुकरगणस्य धूमपटलीत्वं नीलिम्ना सुधासूतिः चन्द्र सस्नेहस्तैलादिः तस्मात्कारणादिह जगतिजितमपास्तं निर्वाणवचनशान्तव्यवहारः यस्य तस्य ते द्रुहिणगिरिशादेरपि सतः सज्जनस्य विरक्तिर्दाह्य वसन्तेन सतां वैराग्यमुन्मूलितं भवतीति भावः ॥ ६ ॥

मादृशानां मत्समानां । उक्तमेवार्थं विशदयति—।

ऋतव इति—॥ नानास्त्राणां विविधास्त्राणां शिल्पिनः स्रष्टारः सृष्टाविधि मेतिशेषः शशांकः विजयसमयं व्यनक्तिदिवसेशः विश्रामकालं व्यनक्ति ॥ ७ ॥

कामः—आस्तामयमन्योन्यप्रशंसनविस्तरः अवधातव्यं राजकृत्ये

वसन्तः—यदुच्यते वयस्येन, तदिह समानभावयोस्समाधिप्रवण पुरुषचेतःक्षोभणे शृंगारोद्दीपनविभावकृत्यंमय्यायत्त भवता पुनरालम्बन विभावसंपत्तिरुपपादनीया,

कामः—सुहृत्संमतमहमिदानीमाचरामि, अयं खल्वपरिचितशुभाश्रयधारणाभिलाषी पुरुषश्चिरपरिचितसुखालम्बने सुखेनसंमुखयितुंशक्यते अस्तिहिदेवासुरसिद्धगन्धर्वविद्याधरकिन्नरकिंपुरुषमानुषादिसर्वपुरुषचक्षुः प्रत्यक्षं स्वतः पुरुषार्थभूतंसुरतोधनाभिधानं ब्रह्मनचैतदनुपपन्नं

परमानन्ददायिन्यः प्रजानांसृष्टिहेतवः ।
ब्रह्मलक्षणशालिन्योनकथं ब्रह्मयोषितः ॥ ८ ॥

वसन्तः—सखे, अत्यन्तसमतरस्त्वदभिमतोयमर्थः स्त्रियोब्रह्मेति प्रथममामनन्ति उतवापुमानितितुवैभवादुक्तिः ।

अन्योन्य प्रशंसायाः विस्तारः अवधातव्यं सावधानतया स्थातव्यं ।

समाधौ प्रवणस्यपुरुषस्य चेतःक्षोभणे शृंगाररसस्योद्दीपनविभावे यत्कृत्यमस्ति मिय्यायत्त आलंबनविभावसंपत्तिः आलंबनविभावस्य संपत्तिः समृद्धिमुपपादयितुंयोग्या अत्रविभावः कथ्यते तत्र रसोद्दीपनकारणमालंबनोद्दीपनात्मा सद्विधा परिकीर्तितः ।

आलंबन विभावश्च द्विधैव परिगीयते ।
नायिकाविषयश्चैकस्तथान्यो नायकाश्रयः
आलम्बनगुणश्चैव तच्चेष्टा तदलंकृतिः ।
तटस्थाचेति विज्ञेयाश्चतुर्थोद्दीपनक्रमाः ॥

इत्यादिकमनुसन्धेयं ।

अपरिचिते एतावन्तं कालमनभ्यस्ते शुभाश्रये धारणाचित्तस्यधारणं तदभिलाषिणः शुभालंबनमित्यत्राह—अस्तिहीति—।

सुरते धनाभिधानं ब्रह्मास्त्येतच्च नानुपपन्नं ॥ परमेति ॥ मोक्षपदस्य जगत्कारणत्वे किमब्रह्मलक्षणे तदुभयसंपन्ना योषितः कथं न ब्रह्म वेत्यर्थः । अयमर्थो न केवलमनुमानात्सिद्धिः ॥ ८ ॥

अपि च,

अलसललितमन्दं स्पन्दनं लोचनानां
अकृतकरमणीयावृत्तयो विभ्रमाणां ।
अपि तरुणवधूनामाहरेयुर्मुनीन्द्रान्
शतमपि च विधूय ब्रह्मणां शाश्वतानाम् ॥ ९ ॥

कामः—(सहर्षं) सखे वसन्त अवितथमेवैतदभिलप्यते ततश्च

अयमप्सरसां गणः प्रनृत्यन्
विशिखाधारविकल्प्यमानदृष्टिः ।
अभिगच्छतु मंक्षु मत्प्रयुक्तः
पुरुषं कांक्षितपुण्यहीनयोगम् ॥ १० ॥

वसन्तः—वयस्य पुष्पधन्वन् त्वदादेशवर्तिनीषु मत्तकाशिनीषु सिद्धं नः समीहितं ब्रूहि

स्वादुगीतमधुमोहितश्रुतेः
चारुनृत्तवशवर्त्तिचक्षुषः ।

अपितु वेदान्तादपीत्याह अय्यश्चेति । त्वदभिमते एवार्थो यस्यास्तथोक्तः कोऽसौ अय्यन्त इत्यत्राह स्त्रियो ब्रह्मेति—।

स्त्रीणां ब्रह्मत्वस्य प्रथमोपात्तत्वात् अत्रैवास्य तात्पर्यमिति वदन्ति । प्रथमं मामनन्ति वेदान्ता इति दोषः । वैभवोक्तिः अर्थवादः । अन्यदप्याह—

अलसेति—॥ अलसं क्रीडाध्वश्रमादिना सायासं ललितं प्रेमार्द्रमन्तर्विवक्षतारं ललितमित्युक्तलक्षणं मन्दमल्पप्रचारं नयनानां स्पन्दनं चलनं अकृतकरमणीया स्वभावरमणीया विभ्रमाणां वृत्तयश्च शाश्वतानां ब्रह्मणां शतमपि विधूय मुनीन्द्रा नाहरेयुः मुनीन्द्राणामपि मनांसि स्त्रीणां विभ्रमा आहरेयुरित्यर्थः ॥ ९ ॥

अयमिति ॥ प्रनृत्यन् विशिखानां बाणानामाधारेण धारासंपातेन विकल्प्यमानादृष्टिर्यस्य स तथा मत्प्रयुक्तः अयमप्सरसां गणः कांक्षितः इष्टः पुण्यहीन पुण्यविधुरो योगो यस्य तं पुरुषमभिगच्छति ॥ १० ॥

त्वदादेशवर्तन्त इति त्वदादेशवर्तिन्यः तासु मत्तकाशिनीषु स्त्रीषु समीहित सिद्धिमुपपादयति ।

भावभेदभृतकीकृतात्मनो
योगिनस्त्यजति यौवतं नधीः ॥ ११ ॥

कामः—विचिन्त्य सरोषहासं

यदि मामवमत्य संयतेत
व्यवसायान्वयदर्पितो विवेकः ।
वनिताशतवञ्चितस्य पुंसः
स्वयमाधास्यति सौभरेरवस्थाम् ॥ १२ ॥

वसन्तः—किमत्राद्भुतं विश्वविदितं हि भवतो वीरायितं

विकस्वरसुरद्रुमप्रसवशस्त्रमाध्वीमद
भ्रमद्भ्रमरसुन्दरीनिकरसंभृतज्याभृतः ।
प्रहृष्टपरभृत्प्रियापणववेणुवीणादिभिः
क्वणद्भिरुपघुष्यते कुसुमधन्वनो विक्रमः ॥ १३ ॥

स्वाद्विति—॥ स्वादु मनोज्ञं यत् गीतं गानं तदेव मधु तेन मोहिता मुग्ध श्रुतिः श्रोत्रं यस्य तस्य चारणः सुन्दरस्य नृत्तस्य वशवर्ती अधीनं चक्षुर्यस्य तस्य भावभेदानां रसभेदानां भृतकीकृतात्मनः भृत्यायितचित्तस्य योगिनः धीः यौवतं युवतिसमूहं न त्यजति ॥ ११ ॥

तत्प्रातिकूल्यस्मरणात्रोषः । तद्दौर्बल्यस्मरणजनितावज्ञया हासः ॥

यदिति—॥ व्यवसायस्य अन्वयेन संपर्केण दर्पितः गर्वितः विवेकः मामवमत्य संयतेत यदि वनिताशतेन वञ्चितस्य पुंसः सौभरेरवस्थां स्त्रीसंभोगैकपरवशतां स्वयमेव आधास्यति संपादयिष्यति ॥ १२ ॥

विश्वविदितं विश्वप्रसिद्धं वीरायितमेव विशदयति— ।

विकस्वरेति ॥ विकस्वराणि विकसितानि सुरद्रुमप्रसवान्येव शस्त्राणि बाणास्तेषां माध्व्या मधुना यो मदः तेन भ्रमन्तीनां भ्रमरसुन्दरीणां मधुपाङ्गनानां निकरेण समूहेन संभृतां संपादितां ज्यां मौर्वीं बिभर्तीति ज्याभृत तस्य ते विक्रम प्रहृष्टाः परभृत्प्रियाः कोकिलवध्वः पणवः वेणुः वंशनालः वीणादिभिः ध्वनिभेदैरुप घुष्यते आदिशब्देन तालादयो गृह्यन्ते ॥ १३ ॥

तदिह लघुव्यापारलभ्ये वस्तुनि नत्वया त्वरितेन प्रयतितव्यं

मा भूदमोघविशिखं नमितं धनुस्ते
मौर्वी च मा भवतु पुङ्खितचित्रपुङ्खा ।
मद्दर्शितैरपि सखे विषभियाद्विवेकः
शाखानिषङ्गनिहितैश्शतशस्त्वदस्त्रैः ॥ १४ ॥

कामः—महत्यपि तपस्येवमन्दोत्साहेन च भवितव्यं दृश्यते हि

मितप्रद्योतनिष्पाद्ये तमसामपसारणे ।
सहस्रेण करैस्सार्धमुदेति दिवसेश्वरः ॥ १५ ॥

अपि च

तिष्ठतु संग्रामकथा द्यूते-
पुरुषस्य वादमात्रे वा ।
भवति परिभूतिलेशे कति कति-
विपदो निदर्शिताः कविभिः ॥ १६ ॥

लघुना व्यापारेण लभ्ये वस्तुनि प्रतिपक्ष जयरूपे त्वरितेन त्वया प्रयतितव्यं लघुव्यापारलभ्यत्वमेव दर्शयति- ।

माभूदिति ॥ अमोघाः विशिखाः बाणाः यस्य तत्तथा ते धनुर्नमितं नतं माभूत मौर्वी च पुङ्खिता समद्धाश्चित्राः नानावर्णाः पुङ्खाः शरा यस्यां सामाभुवन्तु शाखा एव निषङ्गा तूणीराः तेषु निहितैः शतशः असंख्यैः त्वदस्त्रैः पुष्पैरपि विवेकः बिभीयात ॥ १४ ॥

प्रतिपक्षे महति सति एवं मन्दोत्साहेन मा भवितव्यं किंतु महोत्साहेनैव भवितव्यं लघुव्यापारलभ्येपि वस्तुनि महता गुरुव्यापारसाहित्य दृश्यते होत्यर्थः । तदेवाह- ।

मितेति -॥ मितप्रद्योतेन निष्पाद्य तमोपसारणे दिवसेश्वरः सहस्रेण करैः सार्धमुदेति ॥ १५ ॥

महोत्साहेन भवितव्यमित्यत्र हेत्वन्तरमाह- ।

तिष्ठत्विति—॥ पुरुषस्य संग्रामकथा युद्धप्रसंगः तिष्ठतु द्यूते वादमात्रे वा परिभूतेः परिभवस्य लेशमपवर्ति सति कविभिः कतिकति विपदः नदर्शिताः अनेक विपदो निदर्शिता इत्यर्थः ॥ १६ ॥

वसन्तः—किमित्येवमात्मप्रभावमवमत्य परावरविश्वपरिभाविनस्ते कुतश्चित्परिभूतिलेशमाशंकसे नखलु शलभास्सहस्रमपि सहस्रकिरणमभिभवन्ति

अथ च

विपुलसुषमापत्तौनृत्यद्विहारतुरंगमे
मधुमदसमारम्भस्तम्बेरमस्थगितान्तरे ।
रतिरसरथोत्सेधे कश्चिद्विधित्सितसंयमः
क्वचनभवतस्कन्धावारेनजीवति जीवति ॥१७॥

नचेदानीं पुरुषस्समाधिसौधमधिरूढः यतस्तेतस्मिन्मनोरथप्रतिहतिशंका दृश्यते हि ।

स्मरतिमहतामातङ्कानां मनस्कुरुतेग्रहान्
प्रसजति परब्रह्मप्राप्तौप्रसक्तिमपेक्षते ।

अवरे अपकृष्टाःपरे उत्कृष्टाः तद्रूपविश्वभाविनः उक्तमर्थं दृढयति न खल्विति—

न केवलं परिभूत्यभाव एव अपितु त्वदग्रे प्रतिपक्षो न भवतीत्याह—

विपुलेति—॥ विपुला अधिका सुषुमा कान्तिरेव पत्तिः पदातिर्यस्मिन् तस्मिन् नृत्यन्तो विहारतुरङ्गमाः विहाराः विभ्रमा एव तुरङ्गमाः यस्मिन्तस्मिन् मधुना आसवेन मदः तस्यारम्भः सएव स्तंबेरमः गजः एकवचनं जात्यभिप्रायः तेस्थगितं तिरोहितमन्तरमवकाशः यस्मिन्तस्मिन् । रतौ क्रीडायां रसाः प्रीतयस्त एव रथाः तेषां उत्सेधः उच्छ्रायो यस्मिन्तस्मिन् भगवतः स्कन्धावारे सेनानिवेशे जीवति सति विधित्सितः विधातुमिष्टः संयमः प्रणिधिर्यस्य स तथा कश्चिदपि क्वचन न जीवति ॥ १७ ॥

समाधिरेव सौधं तदिदानीं नाधिरूढश्च यतः समाधिसौधारोहणात् तस्मिन्पुरुषे मन एव रथः तस्य प्रतिहतिशङ्का रथस्य सौधारोहण संभवात् दृश्यते हीत्येतत्-

प्रणिधिरित्यनेन संबध्यते ।

स्मरतीति—॥ महतामातङ्कानां स्मरति कर्मणि षष्ठि ग्रहान्मनस्कुरुते ग्रहादिकं मनसि धत्ते परब्रह्मप्राप्तौ प्रसजति प्रसक्तोभवति प्रसक्तिं भगवत्प्रसादमपेक्षते भगवत्प्राप्तिः तत्प्रसादादृते नसेत्स्यतीति बुध्या भोगा एव उदन्वान् तस्मिन्र्भिनिवि

अभिनिविशते भोगोदन्वत्यपत्रपते पुनः
प्रणिधिरधुना सिद्धापायः सितासितपद्धतिः ॥ १८

तथाहि

सोऽयमसमग्रयोगे पुरुषे सर्वाश्रमोक्षसमयो मे ।
रथवैगुण्यविलक्षे राधेये फल्गुनस्येव ॥ १९ ॥

वसन्तः–भवतु नामैवं भगवतस्समीचीनसमीहितसिद्धिः

विरक्तिकपटक्रमाद् वृजिनकोटिभिर्दुर्दमे
परप्रणिधिकर्दमे पतितुमेकतानः पुमान् ।
त्वदस्त्रगणताडनत्रुटितगर्वनिर्वेदवान्
भवप्रणिधिसेवितं भजतु भोगवर्गं पुनः ॥ २० ॥

अपि च

मलयपवनज्योत्स्नामल्लीमधुव्रतकूजित
प्रभृतिविजयस्कन्धावारप्रधानपताकया ।

सक्ते अभिनिविष्टो भवति पुनः अपत्रपते लज्जते अतः अधुना प्रणिधिः सितासित पद्धतिः व्यक्ताव्यक्तमार्गः तत एव सिद्धापायः ॥ १८ ॥

प्रियसखेन वसन्तेन । सौत्तिकस्यावसरः सन्दर्शितः । तदेवाह ।

स इति–॥ पुरुषे असमग्रः असंपूर्णो योगः समाधिर्यस्य तस्मिन् मे सर्वाश्रमः मोक्षसमयः सोऽयं राधेयस्यासमग्रयोगत्वमसंपूर्णसाधनत्वं रथस्य वैगुण्यमधःपातः तेन विलक्षे व्रीडिते राधेये कर्णे फल्गुनस्यार्जुनस्येव ॥ १९ ॥

भगवतः समीहितसिद्धिः इष्टसिद्धिः समीचीना भवतु । उक्तमेव विघटयति ।

विरक्तीति–॥ विरक्तेः वैराग्यस्य कपटानां वञ्चनानां क्रमात् पारंपर्येण वृजिनकोटिभिः पापसमूहैः दुर्दमे अविनाश्ये परप्रणिधिः परमात्मविषयप्रणिधिः स एव कर्दमः तस्मिन् पतितुमेकतानः एकाग्र इत्यर्थः पुमान् त्वदस्त्रगणैः ताडनेन त्रुटितः विच्छिन्नः गर्वः यस्य स तथा स एव निर्वेदवान् भवप्रणिधिना कामविषय समाधिना सेवितं भोगवर्गं पुनर्भजतु ॥ २० ॥

अन्यदप्याह अपि चेति–॥

हसितलपितक्रीडाचित्रैरनुभ्रमदभिख्यया
युवतिकथया योगी सन्नप्यसङ्गमुपैति कः ॥ २१ ॥

कामः—सखे सर्वथा नूनमविचक्षणो विवेकः यत्सागरतरणगगनातिलङ्घनमरीचिकाचर्वणमहीतलमज्जनादिवदशक्यमेव समाधिलाभमाधिव्याधिशालिनः पुरुषस्य बालिश इव साधयितुमीहते

अपि च

पुरुषमजहद्भोगश्रद्धापुरस्कृतसंभ्रमं
विषयमदिरास्वादक्षीबं विमोचयितुं स्थितः ।
अमृतमिलितद्राक्षावल्लीफलद्रवसंपदा
ममरतरुणीबिंबोकानामवैति न वैभवम् ॥ २२ ॥

दृश्यतां पुनरियमुभयतः पाशरज्जुः

मलयपवनेति—॥ मलयपवनः मलयानिलः ज्योत्स्ना चन्द्रातपः मल्ली मल्लिकाकुसुमानि मधुव्रतानां कूजितं झंकारः एतत्प्रभृतिकस्य विजयस्कन्धावारस्य विजयार्थसेनायाः प्रधानपताकया मुख्यध्वजभूतया हसितं हासः लपितम् भाषणं क्रीडा विभ्रमाः एतान्येव चित्राणि तैरनुभ्रमदभिख्यया अत्युज्ज्वलकान्त्या युवतिकथया कः कोवा योगी अप्यसङ्गं वैराग्यमुपैति ॥ २१ ॥

कथमविचक्षणत्वमित्यत आह यदिति—॥ मरीचिकायाः मृगतृष्णायाः चर्वणं भक्षणं महीतले मज्जनं अवगाहनं आदिशब्देन ज्वालापानादिग्रहणं आधिः मनःपीडा व्याधिः शरीरपीडा ।

अविचक्षणत्वे हेत्वन्तरमाह अपिचेति—॥

पुरुषमिति—॥ अजहद्भोगश्रद्धया अत्यजता भोगादरेण पुरस्कृतः संभ्रम उद्योगो यस्य तं युवतिरेव मदिरा तस्यास्वादः पानं तेन क्षीबं मत्तं पुरुषं मोचयितुं स्थितः कलकंकल्पः विवेकः अमृतेन सुधया मिलितं मिश्रं यद्द्राक्षावल्लीफलं तद्द्रवस्य तद्रसस्य संपद इव संपदो येषां तेषां ममरतरुणीबिंबोकानां देवस्त्रीविभ्रमाणां वैभवं नावैति न जानाति ॥ २२ ॥

उभयतः पाशरज्जुरियं दृश्यताम् । उक्तार्थमेव विवृणोति—

विवेकावष्टम्भादुपजनितवैराग्यविभवो
यदि क्रुद्ध्येन्मह्यं भवति स कथं क्रोधविजितः ।
अथ त्यक्तक्रोधो यदि कथमपक्रामयतु मां
मुधा कामक्रोधप्रशमनकथा मूढमनसां ॥ २३ ॥

ततः प्रविशति विकृतवेषः क्रोधः–

क्रोधः–ससंभ्रममुपसृत्य स्वस्ति सुहृदे स्वैरसंचारविजितविवेकविभवाय कुसुमधन्वने कः खल्वसौ विवेकवशवर्ती कामक्रोधप्रशमनकथा वृथा जल्पमुपपादयति (विकटं परिक्रम्य, साट्टहासं)

अयमहमुद्भटप्रथनचारभटारभटी
नटपतिरुत्थितः कथमुदेतु विवेककथा ।
यदनुविधायिदैत्यभयसंज्वरितासु मुधा
सुरसुभटीपयोधरतटीषु पटीररसः ॥ २४ ॥

विवेकेति–॥ विवेकावष्टम्भात् आश्रयेण उपजनितः वैराग्यस्य विभवो यस्य सतथा मह्यं यदि क्रुद्ध्येत् क्रोधविजितः क्रोधेन विजितः कथं न भवति क्रोधविजितो भवत्येवेत्यर्थः । अथ शब्दः पक्षान्तरं द्योतयति त्यक्तक्रोधो यदि मां कथमपक्रामयतु मद्विषयकोपाभावे मां कथमतिक्रामेत अतः मूढमनसां कामक्रोध प्रशमनकथा कामक्रोधयोः प्रशमनप्रसंगः मुधा वृथा प्रसंगमात्रमेव नतु तत्संभव इति भावः ॥ २३ ॥

एवं प्रसक्तस्य क्रोधस्य प्रवेशमाह तत इति–॥ विकृतवेष इति रौद्राधिक्यद्योतनं ।
स्वैरसंचारेण विजितं विवेकवैभवं यस्य तस्मै विवेकस्य वशेवर्तत इति वशवर्ती कामक्रोधप्रशमनकथायाः वृथाजल्पं व्यर्थजल्पं उपपादयति असौ कः खलु कीदृश इत्यर्थः । विकटं विस्तृतं यथाभवति तथा परिक्रम्य दर्पेण अट्टहासं स्वाभिप्रायं वर्णयति ।

अयमिति–॥ उद्भटे क्रूरे प्रथने युद्धे चारः संचारो यस्य भटस्य तस्यारभट्यां वृत्तसमन्ते नटपतिः नर्तकः अयमहमुत्थितः अत्र विवेककथा कथं समुदेतु मम सन्निधौ नोदेति इतिभावः यस्यमम अनुविधायिभ्यः अनुवर्तिभ्यः दैत्येभ्यो यद्भयं तेन संज्वरितासु संजात तापासु सुरसुभटीनां देववीरपत्नीनां पयोधराणां कुचानां तटीषु प्रदेशेषु पटीररसः चंदनपंकः मुधाव्यर्थो भवति । मदनुवर्तिदैत्यनिमित्तभीतितप्तासु सुराङ्गनाकुचतटीषु निक्षिप्त चन्दनपङ्कः क्षणेन पांशुर्भवति नतु तापशान्त्यै इति भावः ॥ २४ ॥

कामः—(स्वागतं प्रियसुहृदे मत्प्रतिपक्षनियतमन्यवे मन्यवे महार्थाय समागतोसि च स्वामिकार्यनिर्वहणसमयमनुचिन्त्य मत्साहाय्यकमनोरथेन वर्तयसि च स्ववशे वशिनो महेश्वरादीन् अहो जितं महाराजेन ।

किं च

मुधारम्भेऽदम्भे मयि च मदने मुक्तकदने
मितोत्साहे मोहे वृजिनगहने व्याप्तदहने ।
अवज्ञालेशाद्यैरपि खलु भवानिन्धनशतैः
प्रदीप्तः प्रत्यञ्चं प्रणिधिमुपरोद्धुं प्रभवति ॥ २५ ॥

वसन्तः—नन्वसौ पवनपावकसमागमः यदुत कामस्य तव च संगतं तदिह किमिति सामग्रीसंभवे साध्यसंपत्तावुदास्यते, अनुसरति खलूत्साहमभिलषितसिद्धिः एतदेव चेदानीमात्मसंभवेन प्रियसुहृदा पुनः पुनरभिलषितमभिमतप्रतिलम्भनमनुपश्यामि ।

मत्प्रतिपक्षे नियतः स्थिरो मन्युः कोपो यस्य तस्मै मन्यवे क्रोधाय स्वागः शोभनं आगतमागमनं किमिति शेषः । मत्साहाय्यकमनोरथे मत्साहाय्यके साहाय्यकं साहायककृत्यं तस्मिन्मनोरथेन आशया वशिनः जितेन्द्रियानपि महेश्वरादीन् आदिशब्देन दुर्वासप्रभृतयो गृह्यन्ते स्ववशे त्वदधीनतायां वर्तयसि । महाराजेन महामोहेन । तत्कथमित्यपेक्षायां त्वमेवं विधः खल्वित्याह—।

मुधारम्भेति ॥ दम्भे मुधारम्भे व्यर्थारम्भे मदने मुक्तकदने त्यक्तपीडे मोहे मितोत्साहे अल्पोत्साहे वृजिनमेव गहनं वनं तस्मिन्व्याप्तदहने व्याप्तः सर्वत्र प्रसृतः दहनः यस्मिन्तथा सति पापाटव्यां दग्धायामपीत्यर्थः अवज्ञायाः अवमत्याः लेशः स्वल्पांशः तदाद्यैरपीन्धनशतैः प्रदीप्तः प्रज्वलितः प्रत्यञ्चमन्तर्मुखं प्रणिधिमुपरोद्धुं प्रभवति शक्नोति । अतो महाराजेन जितमिति भावः ॥ २५ ॥

कामक्रोधयोः सङ्गमः पवनपावकयोः समागम इव दुःसह इति भावः । सामग्रीभेदानां साधनभेदानां सम्भवे सति साध्यसम्पत्तौ किमित्युदास्यते उदासीनतया स्थीयते । उत्साह एव कार्यं इत्याह अनुसरतीति—।

एतदुच्यमानं प्रियस्याशो सुहृत्तेनात्मसम्भवेन कामेन पुनः पुनरभिलषितं अभिमतस्य प्रतिलम्भनं प्रापकं । तत्किमित्यत आह यदुतेति—॥

यदुत

रतिपतिवारयोषिदनुपालितरत्नलता
स्तबकविलोभनीयललितस्तनभारनताः ।
अमरमृगेक्षणाः परिचरन्तु विरक्तिधनं
मदनधनुर्गुणभ्रमरमन्थरतारदृशः ॥ २६ ॥

कामः—सखे कालोचितकार्यप्रतिसंधायकः खलु कालतल्लजो वसन्त तदेनमेव विबुधपतिनगरवेशनारीपुरस्सरं नासीरयोधमहमधिज्यधनुरनुव्रजामि त्वमपि परितः परिवृत्तदृष्टिः पार्ष्णिमभिरक्षन् सावधानमन्वीयेथा

सर्वे तेतथानुसर्पन्ति

वसन्तः—श्रूयतामयमिह महामोहसमरसैनिकधुरंधराभ्यां मन्मथप्रतिघाभ्यां मामकोव्याहारः अयमेवावसरस्संयमारम्भं सौप्तिकेन संस्थापयितुं यत्र समुत्थितं चतुरुदधिब्रह्मणं चान्द्रमसं महः अत्र खलु पुरतस्सरन्त्यमी मुग्धयुवतिमुखचन्द्रकिंकरस्य कुमुदिनीपतेरुदयवार्ताहराः कतिचन 'करणाङ्कुराः—

रतिपतिवारयोषिदिति—॥ रतिपतेः वारयोषिद्भिः वेश्याभिः अनुपालितायाः वर्धितायाः रत्नलतायाः रत्नमयालतायाः स्तबक इव लोभनीयललितश्चयस्स्तनभारः तेन नताः अमरमृगेक्षणाः अप्सरसः मदनधनुषोगुणभौर्व्यः तेवते भ्रमराश्च तैव मन्थराः सुन्दराः तारादीर्घाश्चदृशः यासां ताः तथोक्ता विरक्तिः धनं यस्य तंपुरुषं परिचरन्तु ॥ २६ ।

सखे क्रोध कालोचितस्य कार्यस्य प्रतिसन्धायकः स्मारकः कालतल्लजः काल श्रेष्ठः विबुधपतिनगरवेशनार्यः अप्सरसः पुरस्सरा अग्रेसरा यस्य तं नासीरयोधं सेनामुखसुभटमेनं वसन्तं अधिज्यमारोपितमौर्वीकं धनुर्यस्य स तथा पार्ष्णिं पृष्टभागमभिरक्षन् अन्वीयेथाः अनुगच्छेत्यर्थः ।

महामोहस्य समरे धुरन्धराभ्यां धूर्वहाभ्यां मदनप्रतिघाभ्यां कामक्रोधाभ्यां व्यावहारः उक्तिः । संयमस्य समाधेरारम्भं सौप्तिकेन संस्थापयितुं नाशयितुमयमेवावसर यत्रावसरे चतुरुदधिब्रह्मणं चतुर्णां उदधीनां वर्धकं चान्द्रमसं महः ज्योत्स्ना समुत्थितं मुग्धानां युवतीनां मुखान्येव चन्द्राः तत्किंकरस्य उदयवार्तां आहरन्तीति उदयवार्ताहराः ।

अमी च

तिमिमुखपीतमुक्तसितसागर पूरनिभा
रजनिविलासहासललिताहरिणाङ्ककराः ।
शुभघनसारमिश्रहरिचन्दनपङ्करुचः
स्फुटमनुलेपयन्तिपुरुहूतदिशामुदशं ॥ २७ ॥

अपि च

प्रथमस्य कान्तिमद्रेः
पश्यतमेतेनभाविता शशिना ।
मदजलकलङ्कभाजा
करटिनइवकर्णशंखेन ॥ २८ ॥

क्रोधः—सखेशम्बरासुरसूदन सूनृतवादी सोयं सुरभिः

अत्रहि

हरेरिह दिगन्तरे हसितदुग्धसिन्धुद्युतिः
श्रियंकुमुदवासिनीं प्रजनयत्यसौचन्द्रिका ।

तिमीति—॥ तिमीनां मत्स्यविशेषाणां मुखैः पीतः पुनर्मुक्तश्च यस्सित सागरः तस्य पूराणां प्रवाहाणां निभाः तुल्याः रजनि रात्र्याः विलासेन भासइवललिताः सुन्दराः शुभेन घनसारेण मिश्रः यश्च हरिचन्दनपङ्कः तस्य रुच इव रुचाः येषां ते तथा हरिणाङ्कस्य चन्द्रस्य कराः पुरुहूतदिशैवमुदृक् तामनुलेपयन्ति स्फुटम् ॥ २७ ॥

अन्यदाप्याह अपिचेति—॥

प्रथमस्येति— प्रथमस्य प्राचीनस्याद्रेः शशिना भावितां कान्तिं मदजलकलङ्क मदजलेन जातं कलङ्कं मालिन्यम्भजतीति तत्भाक् तेन कर्णशङ्खेन भावितां करटिनः गजस्य कान्तिमिव पश्यतं अवलोकयतं ॥ २८ ॥

सूनृतं सत्यंहितं तद्वक्तुंशीलमस्यास्तीति सूनृतवादी । तदेव विशदयति—

हरेरिति—॥ हरेहरेः इन्द्रस्य दिगन्तरे प्राच्यांदिशीत्यर्थः हसितस्यसंजात हासस्य दुग्धसिन्धोः द्युतिरिव द्युतिः यस्यास्साऽसौ चन्द्रिका कुमुदवासिनीं कुमुदस्याम श्रियं प्रजनयति कुमुदशोभामुत्पादयति । मधुराणां तारकाणां नक्षत्राणां उन्मीलन_

मनागिव विवर्तितं मधुरतारकोन्मीलने
निशामय निशामुखे तिमिरकन्दलं कुन्तलं ॥२९॥

कामः—सम्भावनीयः खल्वसौ बहुलतरतमःपटलपाटनपटीयस्तर-
किरणस्समाक्रान्तपशुपतिजटामण्डलस्सखा मे तारकेश्वरः

अथ च

कुर्वन्कामपि कौमुदीं कुमुदिनीसंमोददानव्रती
सान्द्रानन्दरथाङ्गनामतरुणीसन्तापचिन्तामणिः ।
शृङ्गारागमदेशिकस्त्रिजगतामानन्दनाडिन्धमो
रुन्धे सर्वदिशां निरन्तरतमस्तन्द्रालुतां चन्द्रमाः ॥३०॥

अपि च

पदे विष्णोरेषा प्रभवमधिगम्य प्रसृमरा
स्फुरत्ताराफेनस्तबकपरिपाटीपरिगता ।
त्वरन्ती पूर्वाद्रेरमरतटिनीसंप्लवमखी
तमिस्राकालिन्दीं शबलयति चन्द्रांशुपटली ॥३१॥

मुद्गमो यस्मिन्तस्मिन् निशामुखे सन्ध्यायां च मनागल्पं विवर्तितं कुन्तलमिव स्थितं तिमिरकन्दलं तमोबृन्दं निशामय पश्य ॥ २९ ॥

बहुलं सान्द्रं यत्तमःपटलं तमस्समूहस्य पाटने पटीयस्तरः अतिशयेन पटीयान् किरणो यस्य स तथा समाक्रान्तः पशुपतेर्जटामण्डलो येन स तथा तारकाणां नक्षत्राणां ईश्वरः ।

कुर्वन्निति—॥ कुमुदिनीनां संमोदस्य दाने व्रतं नियमो यस्यास्तीति व्रती सान्द्रातङ्कानां रथाङ्गनाम्नां तरुणीनां चक्रवाकस्त्रीणां सन्तापस्य चिन्तामणिः प्रदाता शृंगारागमस्य कामशास्त्रस्य देशिक उपदेष्टा त्रिजगतां आनन्दनाडिन्धमः आनन्दजनकनाडीधमनपरः आनन्दहेतुरिति यावत् चन्द्रमाः सर्वासां दिशां निरन्तरां तमसां तन्द्रालुतां जडतां रुन्धे ॥ ३० ।

पदेति—॥ विष्णोः पदे वियति चरणे च प्रभव मुत्पत्तिमधिगम्य प्रसृमरा प्रथमाना: स्फुरन्त्यः तारा एव फेनस्तबक डिण्डीरमण्डलानि तेषां परिपाटीभिः पङ्क्तियाभिः परिगता पूर्वाद्रेः पूर्वाचलस्य त्वरन्ती प्रसरन्ती अतएव अमरतटिनो संप्लवस्य सखा समाना चन्द्रांशुपटली तमिस्रा तमः स एव कालिन्दी तां शबलयति ॥ ३१ ॥

सखे क्रोधपश्यमे सहायसंपत्तिं

ताराकान्तः प्रियसुहृदयं चन्द्रकेयं वयस्या
बाणारम्भाद्बहुमतिपदं बान्धवो मे वसन्तः ।
त्वं च त्राता विपदुपगमे क्रोध दुर्वारवेगः
को वा मह्यं कुसुमधनुषे तिष्ठते जीवितार्थी ॥ ३२ ॥

क्रोधः—सखे अनुकूलो हि विधिः किं वा मनानुकूलयति

अपि च

विजेतुकामः कामं त्वां निष्कामइति का कथा ।
त्वन्निवर्तननिष्कामस्सकामस्त्वय्यनुज्जिते ॥ ३३ ॥

कामः—अलमनेन विलम्बहेतुनाव्याक्षेपेणाउपक्रान्तसमाधिरस्माभिरुप सर्पणीयः पुरुषः (सर्वे तथा कुर्वन्ति)

वसन्तः—पश्यतमेनं परमपुरुषचरणयुगलनिगलिताशयं परिहृत बहिर्विषयरागं प्रतिपक्षकारिणा विवेकेन प्रचोदितं प्रक्रान्त योगं पुरुषं—

सहायसम्पत्तिं सहायसम्पदं तामेवाह—

ताराकान्त इति—॥ ताराकान्तः चन्द्रः बाणानामारम्भात् सृष्टेः बहुमतिपदं बहुमतेः बहुमानस्य पदं स्थानं हे क्रोध दुर्वारः वारयितुमशक्यः वेगो यस्य स तथा त्वञ्च विपदुपगमे प्राप्तौ त्राता अतः कुसुमधनुषे मह्यं जीवितार्थी को वा तिष्ठते आत्मानं प्रकाशयंस्तिष्ठति न कोऽप्यग्रे तिष्ठतीत्यर्थः ॥ ३२ ॥

किं वा म नानुकूलयति सर्वमनुकूलमेव करोति । अन्यदप्याह अपिचेति—॥

विजेतुकामः इति—॥ हे काम त्वां विजेतुं कामइच्छा यस्य स तथा त्वन्निवर्तने तव निवर्तने निष्काम आशारहितः त्वय्यनुज्झित अत्यक्त सकाम एव भवति ॥ ३३ ॥

व्याक्षेपः प्रसङ्गान्तरमुपक्रान्तः आरब्धा समाधिर्येन स तथा ।

परमपुरुषस्य भगवतः चरणयुगले निगलितं मानसं यस्य तं परिहृतः बहिर्विषयेषु शब्दादिषु राग इच्छा यस्य तं प्रतिपक्षं युक्ततया ज्ञानं करोतीति तत्कारी तेन पुरुषं पश्यत ।

अयं हि

भयस्थानग्रन्थान्परिपठति निद्राति च मुहुः
स्वमात्मानं पश्यत्युपचरति देहञ्च विधिना ।
निवृत्सिन्दुःखाब्धेरभिलषति रज्यत्यपि सुखे
द्विधावृत्त्या दुःख्यन् पुरुष इह डोलायित इव ॥३४॥

कामः—सखे क्रोध अद्य खलु संक्षोभणीयदशामनतिक्रान्त इति समर्थितं वसन्तेन दूरावधूतबाह्याभ्यन्तरवैरिभिरपि दुर्जया अस्मत्सहायिनी अनादिसन्ततिर्विचित्रप्ररोहा वैषयिकी वासना ।

भवत्वतिपतिष्यतो भवपयोधिमेकान्ततो
रतिस्सह मुमुक्षया ललितभाषितं योगिभिः ।
तदप्यवसरे क्वचित्स पदि पार्ष्णिमालम्बते
ममत्वशतवासनारचितवारबाणं मनः ॥ ३५ ॥

भयेति—॥ भयस्थानानि भयजनकान् ग्रन्थान् आध्यात्मिकादितापत्रयप्रतिपादनद्वारा भयहेतून् ग्रन्थान् परिपठति अनेन सत्त्वगुणोन्मेषो दर्शितः मुहुर्निद्राति च अनेन तमोगुणोन्मेषः स्वमात्मानं स्वस्वरूपं पश्यति देहं चोपचरति दुःखान्येव अब्धि तस्य निवृत्तिमभिलषति सुखे रज्यति रागवान्भवति एवं द्विविधया वृत्त्या द्विप्रकारवर्तनेन दुःख्यन् पुरुषः डोलायित इव ॥ ३४ ॥

संक्षोभणीयां दशां अनतिक्रान्तः पुरुष इति समर्थितं वसन्तेन दूरे अवधूत बाह्या आन्तराश्च वैरिणो यैस्तैः बाह्या मलयमरुतादयः आन्तराः कामक्रोधादयः पुरुषैरिति शेषः अनादिसन्तत्या सिद्धः विचित्रः प्ररोहो अङ्कुरो यस्यास्सा तथा वैषयिकी शब्दादिगोचरा वासना ।

तदेव उपपादयति तथाहीति—॥

भवत्विति—॥ भवपयोधिं संसारसमुद्रं अतिपतिष्यतः पुरुषस्य मुमुक्षया सह रतिरेकान्ततः भवतु मुमुक्षयासाकं भगवति प्रीतिर्निश्चयेनास्तु तदपि तथापि योगिभिः ललितया मधुरत्वेन भाषितं उक्तं ममत्वशते वासनयारचितं वारबाणं कञ्चुकं यस्य तत्तथा मनः क्वचिदवसरे पार्ष्णिमालम्बते आकर्षति पुरुषस्य मुमुक्षया सह भगवत्प्रीतौ वर्तमानायामपि चञ्चलं मनः ममकारशतवासनावृतं सत् तदभावं नीतिभावः ॥३५॥ ।

वसन्तः—इदमप्यपरमवधारणीयमरातिजनभयंकराभ्यां भवद्भ्यां सर्वसङ्गनिवृत्तस्यापि संमानागतिस्समाधिपरिपन्थिनी अतएवखलु अनुचिन्तितहिरण्यगर्भवचसस्संवर्त्तभरतविदुरादयो दुरितोच्छेदकारणं जनावमानमिच्छन्तउन्मत्तचर्यामभ्यनैषुः तदिदानीं यावदयमवमानापेक्षामादीत ततः पूर्वमेवसंमानभङ्गादिकं द्वारीकृत्यप्रसभं चेतश्चेप्रवेष्टव्यं क्रोधेन—

अथवा

शृणोतिकथयत्यसौ परिचिनोतिसंपृच्छते
समर्चयतिगायति स्पृशतिपश्यतिस्तौति च ।
इतीर्वनियतादरो मुरभिदंघ्रिसेवारसे
नभेत्तुमिहशक्यते स्थिरविवेकदुर्गस्थितः ॥ ३६ ॥

अपि च

वितथपरिग्रहत्यजननिर्वृतबुद्धिरसौ
तदितरसंग्रहेपि विधिनैवपरन्नियतः ।

अरातिजनस्य वैरिजनस्य भयंकराभ्यां संमाननायाः आगतिः प्राप्तिः अनुचिन्तितं अनुसंहितं हिरण्यगर्भस्य वचो यैस्ते तथा

संमानना परां हानिं योगर्द्धेः कुरुते यतः ।
जनेनावमतो योगी योगसिद्धिंचविन्दति ॥
तस्माच्चरेत वै योगी सतां वर्त्म नदूषयन् ।
जना यथावमन्येरन् गच्छेरन् नैवसंगतिं ॥

इत्यादिकं हिरण्यगर्भवचः अभ्यनैषुः अभिनयन्तिस्म । अयंयावत् अवमानापेक्षां आददीत इदानीं तावदिदानीमेव ततः पूर्वमेव संमानभंगादिकं द्वारीकृत्यप्रवेष्टव्यं

शृणोतीति—॥ असौ हरिगुणान्परेभ्यः शृणोति श्रोतृभ्यः कथयति स्वयं परिचिनोति ज्ञानिनः संपृच्छते हरिंसमर्चयति तद्गुणान् गायति तत्पादौ स्पृशति तद्वपुः पश्यति तमेव स्तौति च स्थिरे विवेकाख्य दुर्गे स्थितस्सन् मुरभिदः अंघ्र्योः सेवाया से प्रीतौ इत्थमुक्तप्रकारेण नियतादरो भवति अतएव भेत्तुंन शक्यते ॥ ३६ ॥

वितथेति —॥ वितथाः व्यर्थाः परि गृह्यन्तइति परिग्रहाः गृहक्षेत्रादयः तेषां त्यजनेननिर्वृता तुष्टा बुद्धिर्यस्य सतथा तेभ्य इतरे तदितरेषां परिग्रहाणां संग्रहेपि

उपनतमपिधर्म्यमुपभोगमपोह्य भज
त्यजगरवृत्तिमाश्रमवधीरितभूतहतिः ॥ ३७ ॥

कामः—(सविलज्जस्मितं) सखे नूनमप्रगल्भ इव संग्रामसमये साध्वस-मवलम्बसे कालोपपन्नं कार्यं न प्रतिसन्धत्से

ऋतुश्रेष्ठस्त्वं नः सुहृदमितभोगार्हविभवः
स्वयं कामस्सोऽहं सुरनरतिरश्चस्स्ववशयन् ।
अयं क्रोधः क्रूरप्रकृतिरसहन्नस्मदहितं
त्रिभिः कार्यं द्रौणिप्रभृतिविहितं सौप्तिकमिह ॥ ३८ ॥

वसन्तः—सखे प्रतिसंहितकार्य एवाहमस्मि अवस्कन्दसमयमतिक्रामति पुरुषे कथमस्माभिरमोघवृत्तिभिर्भवितव्यमिति तु विमृशामि पाटच्चर-लुण्ठितेषु भवनेषु जाग्रतोऽपि यामिकाः किमुपकरिष्यन्ति ।

विधिना शास्त्रेणैव परं नियतः नियतं निर्धूतः उपनतं प्राप्तं धर्म्यं धर्मादनपेतमुपभोगं विषयानुभवं अपोह्य अवधीरिता निरस्ता भूतहतिः भूतहिंसा येन स तथा अजगरवृत्तिमाश्रमं भजन्ति ॥ ३७ ॥

एवमस्य दुर्धर्षत्वात् स्वमनीषितं न सिद्ध्यतीति लज्जा परोत्कर्षवत्तया स्मितं ताभ्यां सहितं यथा भवति तथा । साध्वसं भयं न प्रतिसंधत्से न स्मरसीत्यर्थः ॥

किं तत्कार्यमित्यत आह ।

ऋत्विति—॥ ऋतूनां श्रेष्ठः अमितानां भोगानामर्हो योग्यो विभवः संपत् यस्य तथा त्वं नः अस्माकं सुहृत् मित्रं सुरनरतिरश्चः स्ववशयन् स्ववशान् स्वाधीनान् कुर्वन् अस्मदहितं पुरुषमसहन् अस्माभिस्त्रिभिः द्रौणिरश्वत्थामा तत्प्रभृतिभिर्विहितं सौप्तिकं कार्यम् ॥ ३८ ॥

प्रतिसंहितं अनुस्मृतं कार्यं येन स तथा अवस्कन्दनं पीडनं तत्समयं पुरुषे अतिक्रामति । अमोघा सफला वृत्तिर्व्यापारो येषां तैः अस्माभिः कथं भवितव्यमिति तु विमृशामि । सौप्तिकसमयातिक्रमे अस्मद्व्यापारो व्यर्थस्स्यादिति विमृशामीति भावः । उक्तेऽर्थे दृष्टान्तमाह पाटच्चरेति—। पाटच्चरैः चौरैः लुण्ठितेषु सत्सु यामिकाः जाग्रतः अनिद्राणा अपि किमुपकरिष्यन्ति न किञ्चिदपीत्यर्थः ।

अयं हि

प्रचेतुमनघांवृत्तिमपचेतुमपक्रियां ।
भजतेविश्वकर्त्तारं भिषज्यन्तमिवातुरः ॥ ३९ ॥

क्रोधः—(ससंरम्भं) श्रोतव्यमेतत्सुरभिणासुहृदा च कामेनमामकं-मनीषितनिष्पादनकौशलं यदुत

जमदग्निमुखान् परित्यजन्
परिगृह्णन्दशकन्धरादिकाम् ।
विनिपातितवानुपायतः
पुरुषानद्भुतपौरुषानहम् ॥ ४० ॥

वसन्तः—प्रख्यातमिदमित्थम्भवतश्चातुर्यं तथाप्यत्यन्तवीतरागेकइव तवावकाशः ।

कुत इत्यत आह अयंहि—इति ।

प्रचेतुमिति—॥ अनघांनिर्दोषां वृत्तिं प्रचेतुं संपादयितुं अपक्रियां विपरीत वृत्तिं अपचेतुं त्यक्तुं भिषज्यन्तमातुर इव विश्वकर्तारं भजते निवृत्तिधर्मं सिद्ध्यर्थं प्रवृत्तिधर्मसिद्ध्यर्थञ्च भगवन्तमेवाश्रयतीति भावः ॥ ३९ ॥

ससंरंभं सोत्साहं सुहृदेति पदं उभयत्रान्वेति । मनीषितस्य निष्पादने उत्पादने कौशलं सामर्थ्यं तत्किमित्यत आह ।

जमदग्नेति—॥ जमदग्निमुखान् जमदग्निप्रभृतीन परित्यजन जमदग्निरपि धन्तमपि हैहयं नशशाव एवमन्येपिकेचित्तमावन्तः दशकन्धरादिकान रावणप्रभृतीन गृह्णान् रावणादयोहिति ।

छिंधाभज्येयमप्येवं न नमेयं कथंचनेति ।

क्रोधवशाः अद्भुतं पौरुषं पराक्रमो येषां तान पुरुषान् उपायतोविनिपातित वान् ॥ ४० ॥

इत्थं एवंभूतं भवतश्चातुर्यं प्रख्याते वीतरागे पुरुषे तवावकाशः कइव कीदृश इत्यर्थः ।

क्रोधः—(साहाकारमाम्रेडयन्) अत्रापि संमतोऽप्यवकाशः यथा

पुंसस्त्यक्तपरिग्रहस्य विषयग्राहोऽभिभूतस्याप्यहं
कन्थाविष्टरकुण्डिकादिहरणप्रच्छादनाद्याश्रयः ।
अन्तःक्षोभमलीकजल्पमसदारोपस्पृहां पैशुनं
संमोहादि च संमुखय्य सहसा दास्ये समाधिक्षयम् ॥ ४१ ॥

किं च महेश्वरप्रमुखमहापुरुषचित्तविक्षोभकस्य समाहितहृदयसमारम्भविघटने किमत्राश्चर्यं यतः

बिभर्तु विबुधेश्वरं क्षिपतु दानवानीकिनीं
भिनत्तु कुलपर्वतान् वनशतानि मृद्नातु वा ।
अयत्नविधृतक्षितिस्तवकशेखरालङ्कृतः
किमद्भुतपदं भवत्ययममीभिरैरावणः ॥ ४२ ॥

आम्रेडयन् पुनःपुनर्वदन् अत्रापि संमतोऽवकाशोऽस्त्येव ।

कथमित्यत आह

पुंस इति— ॥ त्यक्ताः परिग्रहाः येन तस्य विषयाः शब्दादयः त एव ग्राहाः तैरुज्झितस्यापि पुंसः कन्था जीर्णवस्त्रं विष्टरमासनं कुण्डिका कमण्डलुः आदिशब्देन दण्डादीनां ग्रहणं एतेषां ग्रहणमपहारः प्रच्छादनं तिरोधानं आदिशब्देन स्थानान्तरनिवेशः एतान्याश्रयो यस्य स तथा । अन्तः मनसि क्षोभं कालुष्यं अलीकजल्पमसत्यवचनं असतो सत्यस्यार्थस्यारोपे स्पृहां पैशुनं कर्णजापं संमोहादि कत्यमादां आदिशब्देन महदतिक्रमो गृह्यते संमुखय्य प्रकाश्य समाधिक्षयं दास्ये ॥ ४१ ॥

महेश्वरप्रमुखाः ये महापुरुषाः तेषां हृदयविक्षोभकस्य समाहितहृदयानां संरम्भस्य विघटने भेदने आश्चर्याभावमेव दृष्टान्तेनाह—

बिभर्त्विति— ॥ विबुधेश्वरं देवेन्द्रं । बिभर्तु दधातु दानवानीकिनीं दानवानां अनीकिनीं सेनां क्षिपतु हन्त्वित्यर्थः कुलपर्वतान् भिनत्तु दलयतु वनानां शतानि मृद्नातु ध्वंसयतु अयत्नं यथा भवति तथा विधृता क्षितिरेव स्तबकशेखरं तेनालंकृतः ऐरावणः ऐरावतः अमीभिः विबुधेश्वरभरणादिभिः अद्भुतपदं अद्भुतस्थानं भवति किं न भवत्येव तथा ममापि समाहितहृदयसंरंभविघटनमाश्चर्येण भवतीत्यर्थः ॥ ४२ ॥

कथमवितथत्वमित्यत्राह—

कामः–सखे पुष्पाकर क्रोधोदीरितमप्यवितथमिदमवधारणीयं ।

निद्रामुग्धनिमीलितेष्वसुलभमिर्धूतनिम्नोन्नतं
निद्राणाखिलवर्णभेदनियमं विष्वक्प्रवृत्तोदयं
कः क्रोधोद्भवमुत्सहेततरितुं कल्पान्तकादम्बिनो
कालोद्वेलकलिन्दशैलतनयाकल्लोलकालन्तमः ॥४३॥

अपि च वाल्मीकिप्रभृतिभिर्महर्षिभिरप्युद्घोषितंमामकं महिमानंमावमंस्थाः अहह

विराधकरिकेसरी विशिखवह्निदग्धार्णवः
प्रभूतखरदूषणप्रभृतिनैर्ऋतव्यूहजित् ।
विलूनदशकन्धरोमृदितकुम्भकर्णस्तदा
मदस्त्रजनिते स्थितः क्वचनलाघवेराघवः ॥४४॥

निद्रेति–॥ निद्रासुप्तिः मुग्धः मोहः ताभ्यां निमीलितेषु पुरुषेषु असुलभमनेन प्रविद्धतमसोत्रैलक्ष्यमुक्त निर्धूते निम्नोन्नते यस्मिन् तत्तथा निम्नोन्नतशब्दाभ्यां महती वस्तुनी गृह्येते निद्राणाः अखिलवर्णभेदनियमाः वर्णाः शुक्लादयो ब्राह्मणादयश्च यस्मिन् तत्तथा विष्वक् सर्वतः प्रवृत्तः उदयउत्भवो यस्य तत्तथा कल्पान्ते प्रलयेयाकादम्बिनी मेघपङ्क्तिः तस्याःकाले समये उद्वेलायाः कलिन्दशैलतनयाया यमुनायाः कल्लोल इव कालं नीलं क्रोधोत्भवं तमः कउत्सहेत कोपि नोत्सहेतेत्यर्थः ॥ ४३ ॥

स्ववैभवातिशयमाह अपिचेति–।

वाल्मीकिप्रभृतिभिः इत्यत्र प्रभृतिशब्देन व्यासादयो गृह्यन्ते । स्वातिशयस्मरणजनितादाश्चर्या (अहहेति–)।

विराधेति–॥ विराध एव करी यस्य केसरी सिंहः विशिखवह्निना बाणाग्निना दग्धाः अर्णवाः प्रभूताः अधिका खरदूषण प्रभृतयो ये नैर्ऋताः राक्षसाः तेषां व्यूहं जयतीति व्यूहजित विलूनः त्रुटितः दशकन्धरोयेन स तथा मर्दितः मथितकुम्भकर्णो येन स तथा राघवः मदस्त्रजनिते क्वचनलाघवे स्थितः अभूत् अन्ये किं पुनरिति भावः ॥ ४४ ॥

कुत एव मुह्यत इत्यत आह त्वयेति–॥

वसन्तः—काम साधुकृतं भवता

कामः—वयस्य आत्मानं बहुमन्येथाः त्वदायत्त वृत्तिना खलु मया सर्वमेतदाचरितं ।

वसन्तः—हन्त मकरध्वज महावीराणामपि भवति वैक्लव्यं भवत्प्रभावेन यदुन्मत्तदशामप्यधिगच्छन्ति—

अथवा

रागोपलिप्तदृष्टिः प्रलपति मुह्यति विघूर्णति स्खलति ।
युवतिमदिरामदान्धो युक्तायुक्तं न जानाति ॥ ४५ ॥

(विचिन्त्य) यद्यपि दुर्जयौ युवां कामक्रोधौ तथापि किञ्चिन्मनसि मे परिवर्तते सहायभूयस्त्वं सर्वेष्वपि कार्येष्वयत्नसिद्धिकारणं, (पदशब्दं सूचयन्)

धर्मध्वंसधुरन्धरश्शमदमप्रारम्भसर्वंकषः
प्रज्ञावारिधिघस्मरः प्रणिदधत्प्रत्यूहमृत्युञ्जयः ।
मुक्तिप्रार्थनमोचनाय महतामोहेन संप्रेषित
स्तृष्णावारविलासिनीसहचरो लोभः किलोदीयते ॥ ४६ ॥

दत्ता प्रवृत्तिर्जीवनं यस्य तेन मया । वैक्लव्यं जाड्यं भवति ।

यदुन्मत्तदशामप्यधिगच्छति । पक्षान्तरमाह अथवेति—

रागोपलिप्तेति—॥ रागेण कामेनोपलिप्ता दृष्टिर्ज्ञानं यस्य स तथा प्रलपति जल्पति मुह्यति मूढो भवति विघूर्णति भ्रमति स्खलति प्रमाद्यति युवतिरेव मदिरा मदः तेनान्धः युक्तायुक्तं युक्तमयुक्तं च न जानाति ॥ ४५ ॥

युवां दुर्जयौ यद्यपि तथापि किंचिन्मे मनसि वर्तते तदेवाह सहायेति—॥ सहायानां भूयस्त्वं कार्येष्वयत्नेन सिद्धिकारणं अस्मिन्नवसरे कस्यचिदागच्छतः पदशब्द तमयं पदशब्द इति तयोस्सूचयन्नाह ।

धर्मेति—॥ धर्मध्वंसे धुरन्धरः शमदमयोः प्रारम्भस्य सर्वंकषः कार्त्स्न्येन नाशकः प्रज्ञैव वारिधिः प्रज्ञावारिधिः तस्य घस्मरः भक्षकः प्रणिदधतां योगं कुर्वतां प्रत्यूहस्य विघ्नस्य यो मृत्युः तं जयतीति मृत्युंजयः प्रत्यूहरूपश्च इत्यर्थः । मुक्तेः प्रार्थनस्य मोचनाय महतामोहेन संप्रेषितः तृष्णैव वारविला...
सहचरतीति तत्सहचरः लोभः उदीयते ...

कामक्रोधौ सहर्षमवलोकयतः

वसन्तः—विश्वहृल्लोभनो लोभइहाकार्यः ।

कामक्रोधौ—सुष्ठुचिन्तितं सुहृदा वसन्तेन ।

कामः—छोटिकां ददाति ।

क्रोधः—सोद्‌घोषमनुमोदते ।

ततः प्रविशति लोभस्तृष्णा च ।

लोभः—

महामोहस्याज्ञां शिरसिनिदधानस्स्रजमिमां
महन्तृष्णाजानिस्त्वरितमिहलोभस्समुदितः ।
प्रदिष्टैस्तत्तादृक्प्रथिमविकटैर्हाटकमयै
रखण्डैर्ब्रह्माण्डैर्ममकइवतृप्तिं घटयिता ॥ ४७ ॥

तृष्णांपरिष्वज्य प्रिये

अशेषसुरनारीणामाभिरूप्यसमुच्चयैः ।
अजहद्यौवनान्तृष्णेविदधेत्वांविधिस्स्वयम् ॥४८॥

तदिदंनिदर्शयामि--

कनककलधौतशैल
प्रभृतिभिरपिहन्तपूरणेक्षितैः ।

विश्वेषां हृल्लोभनः हृदय लोभकारी आकार्यः आहूतव्यः ।

छोटिक कृष्ठमध्यमाङ्गुलीभ्यां उत्पन्नं शब्दं ददाति । उद्‌घोषः उच्चैः शब्दः तेन सहितं यथा भवति तथा अनुमोदते स्वानुभवं वर्णयति ।

महामोहस्येति—॥ इमां महामोहस्याज्ञां स्रजं शिरसि निदधानः तृष्णाजाया यस्य स तृष्णाजानिः लोभोऽहं समुदितः । तत्तादृक्प्रथिमभिः विकटैश्च हाटकमयै स्वर्णमयैः अखण्डैः अशेषैः ब्रह्माण्डैः प्रदिष्टैः दत्तैः ममतृप्तिं क इव घटयिता ॥ ४७ ॥

अशेषेति—॥ अशेषाणां सुरनारीणां आभिरूप्यस्य सौन्दर्यस्य समुच्चयैः पुञ्जैः ॥ ४८ ॥

पूर्वं श्लोके यदुक्तं तदिदं निदर्शयामि ।

कनकेति—॥ कनककलधौतशैलौ सुमेरुकैलासौ तत्प्रभृतिभिः पूरणैः पूर्ति

तृष्णे भजतिसमृद्धिं
भूयोभूयस्तवोदरेकार्श्यम् ॥ ४९ ॥

तृष्णा—अ० अउत्ततुह्नवल्लहाणमहरमणिज्जत्तणं सव्वरमणिममब्भहियंतिकिं अच्चरियं तहवि देवासुरघरगअसअलरअणोवहारेणमहसोभग्गाइहारकेऊल मेहलणूउराइ तुए करणिज्जाइ ।

लोभः—प्रिये ईषत्करमिदमभ्यर्थयसेनिर्जिताः खलुमयादेवासुरकिंनरकिंपुरुषविद्याधरमुनिमनुष्यतिर्यञ्चः यथापरस्परमेवव्यतिहन्यन्ते यथा वातुषकणमपिमेरुं मन्यन्तेतत्रतावद्धनदबिरुदविख्यातस्यत्र्यम्बकसखस्यमत्कृतामवस्थां आकर्णय

लब्धन्नमुञ्चति विलक्षमतिर्नभुङ्क्ते
धत्तेपुनः पुनरसौ महतीन्धनायां ।
निद्रारसन्नलभते महतांनिधीनां
रक्षापिशाच इवसंप्रतिराजराजः ॥ ५० ॥

आर्यपुत्रतववल्लभायाममरमणीयत्वंसर्वरमणीसमभ्यधिकमितिकिं आश्चर्यं तथापिदेवासुरगृहगतसकलरत्नोपहारेणममसौभाग्ययोग्यानिहारकेयूरमेखलनूपुराणित्वयाकरणीयानि

हेतुभः क्षिप्तैरपि तवोदरे कार्श्यं भूयोभूयस्समृद्धिः भजते उक्तं उदरकार्श्यमन्येषामप्यभिरूपाणामप्युपलक्षकं ॥ ४९ ॥

ईषत्करमल्पयत्नसाध्यं । ईषत्करत्वं कथमित्यत आह निर्जिता इति—देवादीनां निर्जितत्वात् तत्तद्गृहगतरत्नानां सुलभत्वात् तैर्हारादिकरणं ईषत्करमिति भावः । कथं ते निर्जिता इत्यपेक्षायामाह यथेति— यथाते परस्परमेव व्याहन्यन्त तथा निर्जिता, इत्यर्थः । प्रकारान्तरं चाह यथा तुषकणमपि मेरुं मन्यन्तइति तुषस्य कणमल्पांशं । धनद इति बिरुदेन विख्यातस्य केयमवस्थेत्यत आह ।

लब्धमिति—॥ लब्धं वस्तु न मुञ्चति विलक्षाव्रीलावती मतिर्यस्य स तथा करगतं वस्त्वयं भुक्तवानिति सर्वे परिहसन्तीति व्रीला पुनःपुनर्महतीं धनायां वित्ताशां धत्ते निद्रासुखं न लभते अतस्सम्प्रति राजराजः यक्षेशः महतां निधीनां रक्षापिशाच इववर्तते ॥ ५० ॥

तृष्णा—अ०अंउत्तउए अच्छपुरुसथसंधासंठाविअहिअएतेल्लोक्किविवे (अपरिगहिअस्सपुरुसस्सका उणदसा

लोभः—प्रिये विमर्शनीयमेतत् तस्यपुनस्समाधिकौतुकंप्रशमयितुं महाराजेनमहामोहेनसमादिष्टौकामक्रोधौमदागमनकांक्षिणौतिष्ठतः इमौ तावदुपसर्पावः (उपसृत्य) लोभनामाहमभिवादयेज्यायांसौकामक्रोधौ

तृष्णा—सोह्णएसा पणमइगुरुअणं (इति उभौ प्रणमतः) ।

कामक्रोधौ—दीर्घायुषौ भूयास्तां ।

वसन्तः—अहो निदाघपवनदवाग्नीनामिवभवतांसमागमः किन्नसे त्स्यतिराज्ञो महामोहस्य माभूद्विवेकतोभवत्पत्नीनांरतिजिघांसातृष्णानां माङ्गल्यभूषणवैकल्यं (सर्वेपरस्परमाश्लिष्यन्ति) ।

कामः—अपिस्वागतमस्मदुपजीव्यमर्थपुरुषार्थमभिरक्षतेलोभाय ।

लोभः—अथकिं अनुग्रहपदं खल्वहंभवतां ।

क्रोधः—अपिकच्चममोघ वृत्तिरपवर्गोदन्तवैदेशिकस्त्वमवधत्से स्वामि कृत्यं ।

लोभः—युष्मदनुष्ठानेन सर्वत्रामोघवृत्तिरस्मिपश्यसुयोधनादिवन्म त्परिगृहीतस्यनोकस्येदानीमद्वितीयां द्वितीयपुरुषार्थनिष्ठां ।

क्षुद्रक्षोणिरजः कणास्थिरतृषः क्षुभ्यन्तिपृथ्वीभृत
स्तप्येतस्त्रपदायकः क्वचिदिति त्रस्यन्त्यमर्त्येश्वराः ।

आर्यपुत्र त्वया अर्थपुरुषार्थश्रद्धासंस्थापितहृदये त्रैलोक्येविवेकपरिगृहीतस्य पुरुषस्य कापुनर्दशा

स्नुषेषा प्रणमतिगुरुजनं ।

अर्थरूपे पुरुषार्थे या श्रद्धा तस्यां संस्थापिते हृदयं यस्य तस्मिन् ।

एतत् त्वदुक्तं विमर्शनीयं चिन्तनीयं । तस्य पुरुषस्य समाधौ कौतुकं प्रशमयितु महामहने प्रतिष्ठा ययोः स्तौ । ज्यायांसौ कामक्रोधलोभानां क्रमेण ।

स्नुषैवाप्रणमति गुरुजनं उभयतः कामसमीपे क्रोधसमीपे च ।

दीर्घमायुर्ययोस्तौ दीर्घायुषौ ।

निदाघः ग्रीष्मः पवनः वातः दवाग्निः वनवह्निः तेषामिव त्रयाणां भवतां समवायः । महामोहस्य राज्ञः किंनसेत्स्यति सर्वं सेत्स्यत्येवेत्यर्थः । मङ्गल्यानां मङ्गलानां भूषणानां हानिर्माभूत् । कामस्यरतिः क्रोधस्य जिघांसालोभस्य तृष्णेति विवेकः ।

भिक्षाकेष्वपिकेषुचित्क्वचिदुपक्षिप्तेष्वधिक्षेपतः
पक्षेदुर्मतिभृत्ययोरिहजगत्तिष्ठत्यसूयेर्ष्ययोः ॥ ५१ ॥

अपि च

अटन्तिहरितोदशस्थपुटयन्तिविश्वम्भरां
पठन्तिधनिनाञ्चटून्परपरिच्छदंबिभ्रति ।
तरन्तिजलधिंप्लवैस्समरमारभन्तेमुधा
दुरन्तधनदोहलग्रहिलचेतसोदेहिनः ॥ ५२ ॥

वसन्तः—आयुष्मन्महामोहामात्यधुरीण पुनस्तृष्णासहायस्यतेपूर्वापरपुरुषार्थसाधकेस्वयञ्चसर्ववित्तसात्तिकेस्वादुतयोपलभ्यमाने सर्वराजन्यसेवनीयचरमोपवेदसिद्धेप्रत्यक्षपुरुषार्थेकः प्रत्यूहः

अस्मदुपजीव्यं अस्माकमुपजीव्यं ।

अथ किमित्यंगीकारे । अत्र हेतुमाह अनुग्रहेति–।

अपवर्गोदन्तस्य मोक्षवृत्तान्तस्य वैदेशिक अनभिज्ञ इत्यर्थः। एवं भूतस्त्वं स्वामिन महामोहस्य कृत्यं कथमवधत्से ।

युष्माकमवष्टंभेन अवलंभनेन सर्वत्रामोघवृत्तिः सफलयत्नोस्मि ।

दुर्योधनादिवत् दुर्योधनादीनामिव–तामेव विशदयन्ति ।

क्षुद्रेति–॥ पृथ्वीभूतः राजानः क्षुद्रे क्षोणीरजः कणे भूरेणुलेशे स्थिरतृषः गाढस्पृहास्सन्तः क्षुभ्यन्ति क्षुब्धाभवन्ति अमर्त्येश्वराः ब्रह्मादयः स्वपदाय स्वाधिकाराय क्वचित्प्रद्वेशे कःकोवा तप्येत तपःकुर्यादितित्रस्यन्ति बिभ्यन्ति । केषुभिक्षाकेषु याचकेष्वपि केषुचित् क्वचित् प्रयोजने उपक्षिप्तेषु समीपमानीतेषु सत्सु अधिक्षेपत अन्येषां निन्दनात् दुर्मतिभृत्ययोः असूयेर्ष्ययोः पक्षे जगत्तिष्ठति ॥ ५१ ॥

अन्यदप्याह

अटन्तीति–॥ दशहरितः दिशः अटन्ति सञ्चरन्ति विश्वम्भराः भूमिंस्थपुटयन्ति धनलिप्सया खननेन विपुलां कुर्वन्ति धनिनां पुरश्चाटून चाटूनि पठन्ति परेषां परिच्छदं उपकरणं बिभ्रति वहन्ति प्लवैः जलधिं तरन्ति समरं संग्राममारभन्ते दुरन्तेन धनदोहलेन धनाभिलाषेण ग्रहिलं ग्रहगृहीतं चेतो येषां ते तथा देहिनः एवमेवं कुर्वन्ति ॥ ५२ ॥

अपच्च

कालप्राप्तैर्धर्मतोऽधर्मतो वा
कक्षीकार्यः कामतन्त्रप्रधानैः ।
लाभे गुप्तौ वा प्रदाने व्यये वा
त्वदध्यायत्तो ह्यर्थनामा पुमर्थः ॥ ५३ ॥

एवन्तु सर्वे भवन्तो मामकमनुयोगं विवेककवचदुर्भेदविज्ञानो विपश्चित्तमः कथङ्कारमवस्कन्दनीयः ।

कामः—सखे एवमहमेतदध्यवस्यामि अहन्तावदग्रे परागच्छामि भवद्भिस्तु पक्षद्वयं पार्ष्णिं च परिपालयद्भिरन्तरानिवेश्य वृष्णामनुप्रवेष्टव्यं तदनेन दुर्भेदेन व्यूहेन विवेकस्य स्वकुलविध्वंसनमनोरथप्रत्यूहीभविष्यामः इति (तथा व्यूह्य सर्वे पञ्चषाणि पदानि परिक्रामन्ति)

कामः—(सरभसपुंखितशरं पौष्पं धनुरान्दोलयन्) पश्यत तावदिदानीमधिज्यधन्वनो मे ललितघोराणामिषूणां लक्ष्यलाभं ।

महामोहामात्यानां धुरीणाः अग्रेसराः पूर्वापरयोः धर्मकामयोः पुरुषार्थयोः बाधके सर्वेषां चित्तं साचिव्यस्मिन्कर्मणि तत्तथा स्वादुतया भोग्यतयोपलभ्यमाने जायमाने सर्वैः राजन्यैः सेवनीयेन चरमेण उपवेदेन अर्थशास्त्रेण सिद्धे ।

आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव च ।
अर्थशास्त्रं परं तस्मात् विद्या ह्यष्टादश स्मृताः ॥ इत्यत्र

अर्थशास्त्रस्य चरमोपवेदत्वं ज्ञायते । प्रत्यक्षपुरुषार्थे अर्थरूपे कः प्रत्यूहः विघ्नः नकोऽपीत्यर्थः ।

कालेति—॥ कामतन्त्रं कामशास्त्रं प्रधानं येषां तैः काले तत्तत्समये प्राप्ता-धर्मत अधर्मतो वा कक्षीकार्यः अङ्गीकार्यः अर्थनामा पुमर्थः लाभे गुप्तौ अप्रदानरूपे-व्यये च त्वदध्यायत्तः ॥ ५३ ॥

अनुयोगं प्रश्नं । तमेवाह विवेकेति—।

विवेक एव कवचः तेन दुर्भेदं विज्ञानं यस्य स तथा विपश्चित्तमः पुरुषः कथं कारमवस्कन्दनीयः पीड्यः ।

कामः स्वमतमाह 'सखेति—। पक्षद्वयं पार्ष्णिद्वयं पृष्ठभागं च पालयद्भिः

प्रणिधानविशेषभावितात्मा
करणग्रामनिरोधनिष्प्रकम्पः ।
निभृतश्वसनो निवृत्तिधर्मा
पुरुषस्त्यक्तपरिग्रहोयमास्ते ॥ ५४ ॥

वसन्तः—सूक्ष्ममवलोक्य हन्तावहितैरस्माभिर्भवितव्यं
अत्र हि

वितमसि पदे विधास्य
न्मायाजलधेस्समुद्धृतं पुरुषं ।
विमृशति किमपि रहस्यं
सुमतिसहायो विवेकएकान्ते ॥ ५५ ॥

तूष्णीमन्तरा मध्ये निवेश्य अनुसृत्यैः भवितव्ये दुर्भेदव्यूहेन स्वकुलध्वंसिनो मनोरथस्य प्रत्यूही भविष्यामः ।

पञ्चबाणज्या पञ्चबाणी ।

सरभसं सवेगं यथा भवति तथा पुंखिताः ज्यामारोपिताः शराः यस्मिन् सत् अधिज्यमारोपितमौर्वीकं धनुर्यस्य सोऽधिज्यधन्वा तस्य ललितानां घोराणां । पुष्पत्वाल्ललितत्वं बाधकत्वेन घोरत्वं लक्ष्यस्य शरव्यस्यलाभं तल्लक्ष्यमित्यत आह—

प्रणिधानेति—॥ प्रणिधानविशेषेण योगविशेषेण भावितः ध्यातः आत्मा परमात्मा यस्य स तथा करणानां मिन्द्रियाणांग्रामस्य समूहस्य निरोधेन प्रत्याहारेण निष्प्रकम्पः निभृतः नियतः श्वसनः प्राणानिलो येन स तथा निवृत्तिधर्मा. निवृत्तिरेव धर्मो यस्य स तथा त्यक्ताः परिग्रहाः येन स तथा अयं पुरुषः आस्ते ॥ ५४ ॥

अवहितैः सावधानैः । कुत इत्यत आह अत्रहीति—॥

वितमसीति—॥ मायाप्रकृतिः सैवजलधिः तस्मात्समुत्थितं पुरुषं वितमसि रजस्तमोभ्यामस्पृष्टे पदे स्थाने । तमसस्तु पारे तमसः परस्तात् क्षयंतमस्य रजसः पराके इत्यादिश्रुतिभ्यो रजस्तमसोः पारे वर्तिप्रतिपद्यं तस्मिन्वैकुण्ठाख्ये विधास्यन् स्थापयिष्यन् विवेकः एकान्ते सुमतिसहायस्सन् किमपि रहस्यं विमृशति ॥ ५५ ॥

रोषाधिक्येन भ्रूभङ्गः तेन सहितं यथाभवति तथा । विवेकेन किंचित्पर्यालोचन-मितिभावः । कथंनातिवर्तत इत्यत्राह—।

क्रोधः-(सभ्रुकुटीभङ्गं) भोवसन्त विमृश्यतांकिमपिदुरात्मनाविवेकेन पुरुषस्तावत्पुरस्कृतमन्मथानामस्माकमभिमतत्वातिवर्तते यतः

अनघसमाधिसम्पदुदरंभरिरात्मभवः
प्रबलमहोर्मिजाल भरितेदुरिताम्बुनिधौ ।
जडमतिजन्तुजातमुपजातविहारमसौ
सुखबडिशावकृष्टमुपदंशदशान्नयति ॥ ५६ ॥

पश्यतुभवानेतस्यपुरुषस्यभावनाविशेषं

स्वसंबोधस्सौधश्शुभगुणगणोमण्डनविधि
स्समाधिस्सम्भोगोरहसिजपशीलीरतिकथा ।
सुषुप्तेलोकेथ्यश्रुतिपरिषदन्तः पुरगतो
मुनिः शान्तिव्याजान्मुखरयतिशृङ्गारनिगमं॥५७॥

वसन्तः-(स्वगतं) आशामात्रकृतेयमन्यथाकल्पना (प्रकाशं) सखे प्रवनप्रतिपक्षसन्निधौ किमनेनप्रगल्भभाषितेन

अनघेति-॥ अनघया समाधिसम्पदा उदरम्भरिः उदरपोषकः आत्मभवः मदनः प्रबलाः प्रकृष्टबलाश्च महान्तः ऊर्मयः अशनाया पिपासे शोकमोहौ चेति षट् त एव ऊर्मयः मरीचयः तेषां जालैः भरिते पूर्णे दुरितान्येवाम्बुनिधिः तस्मिन्सुखमेव बडिशं तेनापकृष्टं तेषां जातं समूहं उपजातो विहारो यस्मिन्कर्मणितत्तथा भवति तथा उपदंशस्यव्यंजनस्य दशां नयति कामस्य समाधिसंपदशनं जडमतिजन्तुजातं उपदंशः ॥ ५६ ॥

भावना विशेषः समाधिविशेषः । विशेषशब्देन वैलक्षण्यं द्योत्यते । तदेवाह-

स्वेति-॥ स्वस्य संबोधः ज्ञानमेवसौधं शुभानां गुणानां शमदमादीनां गणएवमण्डनविधिः अलंकारं विधीयत इति विधिः समाधिरेव संभोगः सुखानुभवः रहसि जपशीलो जपस्स्वभाव एव रतिकथा रतिविषयः प्रसङ्गः अध्यालोके सुषुप्ते सति स्वस्वरूप परस्वरूपाद्यानभिज्ञेसति अत्र ।

यानिशासर्वभूतानां तस्यांजागर्ति संयमी त्येतदनुसन्धेयं । श्रुतिपरिषदेव अन्तःपुरं तद्गतः मुनिर्योगी शान्तिव्याजात् शृङ्गारनिगमं शृङ्गारशास्त्रं मुखरयति:पठति ॥ ५७ ॥

लोभः—सखेवसन्तप्रियातावन्ममैषाप्रतिपक्षप्रतिक्षेपभीता प्रत्याश्वास यितव्या (तृष्णामवलोक्य) सुमुखितृष्णेमहावीरव्यूहमध्यगता महत्यपिप्रति- पक्षेमाभैषीः ।

तृष्णा—सकलसुरासुरमहितमाहात्म्येषु तुष्मेसुजीवत्सुनित्यंनिर्भ- यास्मि

कामः—(सान्तस्त्रासं) परिवृत्यावलोक्यपश्चात्पदानिप्रतिक्षिप्यन्ताव दस्माभिः

अद्यहि

अनिद्राणप्रज्ञासहजबलधीराद्भुतगति
स्तितिक्षासन्तोषस्थिरतरतनुत्राणघटितः ।
प्रयुक्तंकेनापिप्रणवरथमास्थायपुरतो
विवेकः प्रत्युद्यन्विघटयतिमे व्यूहघटनां ॥ ५८ ॥

सकलसुरासुरमहितमाहात्म्येषुयुष्मासुजीवत्सुनित्यंनिर्भयास्मि

इयं समाधेरन्यथा कमुना आशामात्र कृतानतु वास्तवी इयं नकार्येहेतुरित्याह नयान्वितिः—।

मनोरथसंपादितया चतुरङ्गसंपत्या महाराज्य सिद्धिः नखलु प्रबलस्य प्रति पक्षस्य सन्निधौ प्रगल्भभाषितेन समर्थाचितभाषितेन किंसिद्ध्यति ।

प्रतिपक्षस्य उपक्षेपणप्रसंगेन भीता प्रत्याश्वासयितव्या भयापनोदनेन स्थिराक- र्तव्या । महावीराणां व्यूहस्य मध्यगता प्रतिपक्षेमहत्यपि माभैषीः ।

सकलैः सुरासुरैः महितं पूजितं माहात्म्यं येषां तेषु । अन्तर्मनसि त्रासेन सहितं यथाभवतितथा । परिवृत्य निवृत्य पश्चात्पृष्टतः प्रक्षिप्यन्तां निधीयन्तां कुत एतदित्यत आह अद्यहीति—॥

अनिद्राणेति—॥ अनिद्राणायाः प्रज्ञायाः सहजेन स्वभावेन बलेन धीरा- निश्चला अद्भुता आश्चर्यभूता च गतिर्वृत्तिर्यस्य सतथा तितिक्षासन्तोषस्य तावे- व स्थिरतरं तनुत्राणं कवचं तेनघटितः संबद्धः केनापिप्रयुक्तं प्रणवरथं प्रणवमेवरथं आस्थायप्रत्युद्यन् प्रत्युत्थानंकुर्वन् मे व्यूहघटनां व्यूहरचनां विघटयति विदलयति ॥५७॥

भयं नाटयन्ति अभिनयन्ति ।

सर्वे भयं नाटयन्ति

वसन्तः—युष्मासु त्रिषु कस्यचिद्यदि विपत्संपत्स्यते केनचित्
त्यक्ष्यत्येव हि भक्तजीविततया मोहः स्वयं जीवितं
सद्यश्चैनमनुम्रियेत नियतं तद्दुर्लभा दुर्मतिः
तत्संप्रत्यपसर्पणं क्षममितः क्षिप्रं—
विवेकास्पदात् ॥ ५६ ॥

लोभः—अराजकैरस्माभिरत्र न योद्धव्यं मन्त्रयिष्यति वा राजा स्वयमेव
कृत्यशेषं

क्रोधः—(सनिर्वेदं) धिग्धिक्किमियता कालेनास्माभिराचरितं राजकृत्यं

लोभः—सखे

अतिक्रामन्कालस्तव नरथवेगेन महता
न रोद्धुं शक्येत प्रतिवहनवातूलरहितः ।

युष्मांस्त्विति—॥ त्रिषु युष्मासु कस्यचिदेकस्य विपत् मृतिः केन चिद्धेतुना संपत्स्य-
ते भविष्यति यदि मोहः भक्तजीविततया भक्तः जीवितं यस्य सः भक्तजीवितः तस्य भावः
तत्ता तया स्वयं जीवितं त्यक्ष्यत्येव हि प्रसिद्धौ तद्दुर्लभा दुर्मतिः एनं मोहं सद्यः सहसा
अनुम्रियेत अनुमृता स्यात् तत् तस्माद्धेतोः इत विवेकास्पदात् क्षिप्रमपसर्पणं
संप्रति क्षमं युक्तं अस्मिन् युद्धे अस्मासु यस्य कस्यचित्पराजयेऽपि मोहो दुर्मतिश्च
मरिष्यतः एवं स्वामिनाशहेतोर्युद्धादपि अपसर्पणमेवास्माकं युक्तमिति भावः ॥ ५८ ॥

हेत्वन्तरमाह अराजकैरिति—॥ न विद्यते राजा येषां तैः अस्माभिर्न योद्धव्यं
एवं सति स्वामिकार्यं कथं सेत्स्यतीत्यत आह मन्त्रयिष्यतीति—।

कृत्यस्य कार्यस्य शेषं ।

धिग्धिगिति खेदोक्तिः । इयता कालेन अस्माभिः किं राजकृत्यमाचरितं न
किंचिदिति भावः ।

किमाचरितमस्येत्यत आह—

अतिक्रामन्निति—॥ महता तव नरथस्य वेगेन अतिक्रामन् गच्छन् कालः

गतस्रोतोरोधे न खलु यतितव्यं कृतधिया
तदारम्भः श्रेयानुपरितनभीतिप्रतिभटः ॥ ६० ॥

तदस्माभिरायुस्तावदस्माभिरभिरक्षणीयं सर्वत एवात्मानं गोपायेदिति हि श्रूयते ।

काम:—समयोचितमिदं समर्थ्यते लोकवृत्तवेदिना लोभेन ।

आदेयो न हि सौप्तिकप्रणिहितैरस्माभिराकस्मिकः
पातः क्षुद्रविवेकलक्षणमहापातालगर्तोदरे ।
सद्यस्संप्रति दम्भदर्पकुहनासूयादिदत्तेक्षणः
प्रत्यर्थिप्रतिरोधकर्मणि महामोहः प्रवर्तिष्यते ॥६१॥

प्रतिवहनः संमुखमागत्यनिवर्तकः सचासौ वातूलश्च तेन रहितः कालः परोद्धुं शक्येत गन्तव्यमिति वारयितुं शक्यते किं नशक्यत इत्यर्थः । अथ किंकर्तव्यमित्यत आह गतेति—। कृतधिया शिक्षितबुद्धिना जनेन गतस्य स्रोतसः प्रवाहस्य रोधे निरोधे यतितव्यं नखलु गतस्य स्रोतसः निरोधासंभवात् तत् तस्मात्कारणात् उपरितनायाः अप्रस्थिताः भीतेः प्रतिभटः प्रतिबन्धकः आरम्भः उद्योगः श्रेयान् श्रेष्ठः स एव कर्तव्यइत्यर्थः ॥ ६० ॥

तत् तस्मात् हेतोः अस्माभिरायुरभिरक्षणीयम् । आत्मानं शरीरं सर्वस्मात् भयस्थानात् गोपायेत् रक्षेदिति श्रुतिश्चश्रूयते हि ।

लोकवृत्तान्तं वेत्तीति लोकवृत्तान्तवेदी तेन समयस्य कालस्योचितमिदं समर्थ्यते प्रतिपाद्यते । अतएवमेव वक्तव्यमित्याह-

आदेय इति—॥ सौप्तिके प्रणिहितैरस्माभिः क्षुद्रो यो विवेकः तल्लक्षणस्य तद्रूपस्य महतः पातालस्य गर्तोदरे श्वभ्रान्तः आकस्मिकः निर्हेतुकः पातः पतनं अस्माभिः आदेयः आदातुं योग्यः न हि । राजकृत्यसिद्धिः कथमित्याह सद्य इति— सम्प्रति प्रत्यर्थिनां प्रतिरोधकर्मणि निवारणकृत्ये दम्भदर्पकुहनासूयादिषु दत्तेक्षणः दत्तदृष्टिः महामोहः सद्यः प्रवर्तिष्यते प्रवृत्तो भविष्यति ॥ ६१ ॥

तद्वयमिदानीं भिन्नदिक्काः प्रतिष्ठेमहि आत्मार्थे पृथिवीं त्यजेदिति हि वदन्तीति निष्क्रान्ताःसर्वे—

इतिकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये कामादिव्यूहभेदो नाम चतुर्थोऽङ्कः ।

श्रीमते भाष्यकाराय महादेशिकायनमः ।

श्रीमते निगमान्तमहादेशिकायनमः ॥

तत्तस्माद्धेतोः भिन्नदिक्काः भिन्नाः प्रतिनियताः दिशः येषां ते तथा प्रतिष्ठामहे प्रस्थास्यामहे । प्रस्थाने हेत्वन्तरमाह आत्मार्थइति वदन्ति मुनय इति शेषः ।

ॐ श्रीरस्तु ।

श्रीमते हयग्रीवायनमः ।

श्रीमते निगमान्तगुरवेनमः ॥

सङ्कल्पसूर्योदये पञ्चमोऽङ्कः ।

ततः प्रविशति दम्भः कुहना च,

दम्भः—अहहारे त्वां धर्मपत्नि कुहने संबोधयामि । त्वं हि मे तारेव बृहस्पतेरहल्येव गौतमस्यास्पृष्टपुरुषान्तरा तर्णाविरहाक्षमा सहधर्मचारिणी ।

कुहना*—जं बह्मणेसरो भणाद, तह विलज्जामि णिद्विट्ठादो णिदंसणादो । अरुंधई विह वसिट्ठस्सेति वण्णणिज्जं घरसामिणा । जाहे अहं तक्करेहिं किदवेहिं गामणीहिं णरिंदामच्चेहिं पासंडोहिं अण्णोहिं वि तारिसेहिं पत्थिदह्मि ताहेवि ता तुमं एव्व सुमरिऊण सेवामि ।

---

* यद्ब्राह्मणेश्वरो भणति, तथापि लज्जामि निर्दिष्टान्निदर्शनात् । अरुन्धतीव वसिष्ठस्येति वर्णनीयं गृहस्वामिना । यदाहं तस्करैः कितवैर्ग्रामणीभिर्नरेन्द्रामात्यैः पाषण्डिभिरन्यैरपि तादृशैः प्रार्थितास्मि तदापि तान् त्वामेव स्मृत्वा सेवे ।

अत्रापि पूर्वाङ्कदर्शितैरेव दंभाद्यैः महामोहस्य विमतभङ्गप्रयतनवर्णनादङ्कास्यमेवार्थोपक्षेपकम् । कुहना दम्भस्य पत्नी । अरेइति सम्बोधनसूचनम् । हे भो इतिवत् । त्वा त्वां सम्बोधयामि । अस्पृष्टं पुरुषान्तरं अन्यपुरुषो यया तथा मे सहधर्मचारिणी हि ।

यत् ब्राह्मणेश्वरो भणति तत्सत्यमिति शेषः । तस्करादीनां कुहनासम्बन्धः कादाचित्कः, दम्भस्य तु नित्यइति भावः ।

दम्भः—सान्तर्हासं, अत एव सर्वलोकपतिव्रता खल्वसि यया पुनरनुगतानपि मे गार्हपत्यादीन् यतःकुतश्चनानीतैरपि शुष्मभिस्समादधानया यज्ञपत्न्या त्वया नकदाचिदपि मामकमग्निहोत्रं विच्छिद्यते पर्वकालेषु चानाविष्कृतपुष्पया त्वया दर्शपूर्णमासौ च नित्यमनुवर्त्येते । निर्वर्त्यते च पिण्डपितृयज्ञादिकम् । का कथा प्रायश्चित्तस्य ।

कुहना *—संतं पाअं संतं पाअं । जाअंमि खु विच्छेए समाहाणिज्जं णखु काहेपि अह्म घरे अग्गीणं विच्छेओ पसंणाहिं खु कुलदेवआहिं णिच्चं रक्खिज्जन्ति अह्माणं अग्गिणो । तह उप्पण्णं खु पुप्फं अणाविक्करणिज्जं पत्तोवि अ पव्वसु ताहिं एव्व कुलदेवआहिं विलम्बीअदि पुप्फसमओ ।

दम्भः—साधु कुहने साधु, अस्मत्सहधर्मचारिणी खल्वसि । बहु मन्ये त्वाम् ब्राह्मण्यप्रतिष्ठापिकां यज्ञपत्नीं परमश्रोत्रियधर्मपत्नीम् । नित्यमेव खल्वशनायोदन्याभ्यामातुरस्य मे हरिवासरेषु मृष्टमपि भोजनमनाविष्कुर्वाणया त्वया प्राप्यते द्वादशीव्रतम् पख्याप्यते च प्रतिगृहं साधनसंपत्तिक्रमेण ।

* शांतं पापं शांतं पापं जाते खलु विच्छेदे समाधानीयम् । न खलु कदाप्यस्मद्गृहे ऽग्नीनां विच्छेदः । प्रसन्नाभिः खलु कुलदेवताभिर्नित्यं रक्ष्यन्तेऽस्माकमग्नयः । तथा उत्पन्नं खलुपुष्पमनाविष्करणीयं प्राप्तेऽपि च पर्वसु ताभिरेव कुलदेवताभिर्विलम्ब्यते पुष्पसमयः ।

सर्वलोकपतिव्रता सर्वेषु लोकेषु पतिव्रतात्वेन प्रसिद्धा सर्वलोकपतिषु व्रतवती च अनुगतान् शान्तानपि शुष्मभिः अग्निभिः समादधानया अनाविष्कृतं अप्रकाशितं पुष्पं रजः यया तथा ज्ञातमप्यार्तवमनाविष्कुर्वाणया त्वयेत्यर्थः । एवं तेषुतेष्वेव कालेषु सर्वकर्मणां निवर्तनात् प्रायश्चित्तकथैव नास्ति ।

शान्तं पापं । यतः कुतश्चनानीतैरपि शुष्मभिः समादधानयेति तेनोक्तम् । तदलीकवचनश्रवणजनितं पापम् शान्तमित्यभिप्रायः अस्याः पुष्पसमय इत्यन्तमाकर्ण्य दम्भस्तां श्लाघते साध्वित्यादि ।

किन्तु किञ्चित् रहस्यमुपदिशामि। सम्प्रीदानीमन्तिमयुगभूमिकाभेदा इव केचिदवधीरितसकलधर्माः प्रव्राजितवेषभाजः प्रकटितमायाविलासाः पूर्वदेवाः। ते च रावणधनंजयन्यायेन भवतीं जिघृक्षेयुः, अतो मत्समीपं कदाचिदपि नातिवर्तेथाः। न च परमब्राह्मणीं मां मुहूर्तमपि त्वदन्याः परिचरितुमर्हन्ति। अहं पुनरधुना दिव्यादिव्यसर्वभोगसार्वभौमस्य राज्ञो महामोहस्यानुचितमाचरन्तमाततायिनं विवेकमभिचरितुं देव्या दुर्मत्या प्रार्थितोऽस्मि, यथा वत्स दम्भ विश्वधर्मोपप्लावकेन त्वया विवेकः प्रध्वंसनीय इति। ततश्चाहं नित्यनिस्पृहोऽपि दाक्षिण्यपरवशतया "षट्स्वनभिचरत्पते"-दिति महर्षिभाषितं चानुवर्तमानः कामप्यलक्ष्यां देवतामारिराधयिषुरास्थितनियमोऽस्मि। तन्मे दिव्यगङ्गाजलाप्लुतलोकपालपुरोहितोपनीतानि पारिजातपुष्पफलान्युपाहर।

ब्राह्मण्यस्य प्रतिष्ठापिकां परमस्य श्रोत्रियस्य पत्नीं परम् अश्रोत्रियपत्नीं इति च नित्यमेवं अशनायोदन्याभ्यां क्षुत्तृड्भ्यामातुरस्य अनाविष्कुर्वाणया मया न दत्तमिति वदन्त्या अन्तिमयुगस्य कलियुगस्य भूमिकाभेदा वर्णिकाभेदा अवधीरिताः सकलाः धर्माः वेदोक्तधर्माः प्रव्राजितानां सन्यासिनां वेषभाजः प्रकटिताः प्रकाशिताः मायायाः वञ्चनायाः विलासाः यैस्ते तथा पूर्वदेवाः असुराः रावणो यथा भिक्षुरूपो सीतां जहार, धनञ्जयो यथा सन्यासिरूपमास्थाय सुभद्रामुपयेमे तन्न्यायेनेत्यर्थः। परममुत्तमं ब्राह्मणीं परम्अब्राह्मणीमिति च। त्वदन्ये त्वत्त इतरे मां परिचरितुं नार्हन्ति। अतः कदाचिदपि नातिवर्तेथाः। स्वचिकीर्षितमाह अहं पुनरिति। दिव्याश्चादिव्याश्च ये सर्वे भोगाः तेषां सार्वभौमस्य विश्वेषां धर्माणामुपप्लावकेन नाशकेन दाक्षिण्यपरवशतया दाक्षिण्याधीनतया षट्सु आततायिषु अग्निदोगरदश्चेत्यारभ्य पठिते आततायिन इत्युक्तेषु अनभिचरन् अभिचारमकुर्वन् अलक्ष्यामप्रत्यक्षामारिराधयिषुः आराधयितुमिच्छुः दिव्यगङ्गायाः मन्दाकिन्याः जले आप्लुताः स्नाताः ये लोकपालानां पुरोहिताः तैरुपनीतानि पारिजातपुष्पादीनि आदिशब्देन पल्लवसलिलादि गृह्यते॥

कुहना *—हद्धि हद्धि सअलागमसारगहणविसारओ विवेओ समअमप्पमुहेहिं अमच्चअणेहिं संरक्खिओ कहं अभिआरिज्जइ । तारिसेसु पउत्तो अभिआरो कत्तुणो एव्व बाहं आवहइत्ति सुणीअइ ।

दम्भः—अयि मुग्धब्राह्मणि अविचारितास्मद्वैभवा किं भाषसे ।

विद्याश्चतुष्कसहिता विदिता द्विसप्त
त्रिप्रं चतुर्गुणितचन्द्रकलाः कलाश्च ।
काले च साधुविहिताः क्रतवस्सहस्रं
धर्मध्वजाश्च भुवनेषु मया निबद्धाः ॥ १ ॥

अयि परमधार्मिक सहधर्मचारिणि आस्तामिदं तावद्विद्याचार माहात्म्यं निस्पृहत्वमपि निपुणमवधारय ।

---

* हा धिक् हा धिक् । सकलागमसारग्रहणविशारदो विवेकः शमदमप्रमुखै रमात्यजनैस्संरक्षितः कथमभिचर्यते तादृशेषु प्रयुक्तोभिचारः कर्तुरेव बाधामावहतीति श्रूयते ।

कर्तुरेव बाधामावहतीति श्रूयते । श्रुतिश्च "प्रत्यगेनमभिचारस्तृणुते" इति । मुग्धब्राह्मणि मूढब्राह्मणि । अविचारितमस्माकं वैभवं यया सा तथा ।

विद्येति-॥ चतुष्कं विद्यानां चतुष्टयं तेन सहिताः द्विसप्त चतुर्दश विद्या मया विदिताः । चतुर्दशविद्याः

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इत्युक्ताः । विद्याचतुष्कं तु

आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव च ।
अर्थशास्त्रं परं तस्मादित्युक्तम् ।

अतो विद्या अष्टादश चतुर्गुणितचन्द्रकलाः षोडशतच्च चतुर्गुणिताश्चेत् चतुष्षष्टिर्भवन्ति । ताश्च मयाविदिताः काले शास्त्रोक्तकाले धर्मध्वजः अयं धार्मिक इति धर्मसूचकोध्वजश्च निबद्धः ॥ १ ॥

निर्जित्य क्षितिमण्डलं भृगुपतिर्मह्यं प्रदातुं पुनः
प्रह्वः प्रार्थयत न्यषेधि च मया विश्वं तृणीकुर्वता ।
अस्मद्वैभवदृष्टिसंभृतचमत्कारैरमर्त्येश्वरैः
दत्तौ धिक्कृतवानहं शमधनः स्वर्गापवर्गावपि ॥ २॥

सुहना*–सविमर्शं एवं णाम महप्पहावाणं तुह्माणं विवेआहिआरो किं सेणो अण्णारिसो वा जोवि कोवि जत्थ अहं सह-धम्मआरिणी होम्मि ।

दम्भः–अयि महाश्रोत्रियधर्मपत्नि महानुभावानामस्मदन्तेवासिनामत्यन्तरहस्यमिदमावेदयामि । सर्वेभ्यस्तृणादिभ्योऽपि नैतद्ब्रूयाः । न खलु श्येनादिवद्विशेषतो विहितोऽयमभिचारः ।

किन्तु

ये तु धर्मतयाधीतास्ते सर्वे मत्परिग्रहात् ।
अविशेषेण गच्छन्ति विवेकस्याभिचारताम् ॥ ३ ॥

---

* एवं नाम महाप्रभावाणां युष्माकं विवेकाभिचारः किं श्येनः अन्यादृशो वा योऽपि कोऽपि यत्राहं सहधर्मचारिणी भवामि ।

विद्याचारमाहात्म्यं विद्यया महात्म्यं आचारेण माहात्म्यं च । निस्पृहत्वमाह

निर्जित्येति–॥ भृगुपतिः जामदग्न्यः क्षितिमण्डलं निर्जित्य पुनर्मह्यं प्रदातुं प्रह्वस्सन् प्रार्थयत विश्वं तृणीकुर्वता मया न्यषेधि च । अस्माकं वैभवस्य दृष्ट्या संभृतः संपादितः चमत्कारो येषां तैः अमर्त्येश्वरैः ब्रह्मविष्णुरुद्रैः दत्तौ स्वर्गापवर्गा-वपि शमः शान्तिर्धनं यस्य स तथा अहं धिक्कृतवान् निरस्तवान् ॥ २ ॥

महान् अनुभावः उत्कर्षः येषां तेषामस्माकं अन्तेवासिनां शिष्याणामपि अत्यन्तरहस्यम् । श्येनादिवत् आदिशब्दः सर्पादीनां ग्राहकः । विशेषतः विशेषेण श्येनः सर्प इत्यादिवच्च विहितोऽयमभिचारः ।

किन्त्विति तेभ्यो विशेषं द्योतयति ।

ये त्विति–॥ धर्मतया प्रवृत्तिधर्मतया निवृत्तिधर्मतया वा ये अधीताः शास्त्रेणेति शेषः । ते सर्वे मत्परिग्रहात् मया परिग्रहात् अभिशेषेणायमभिचारः अयं तु नेति विशेषाभावेन विवेकस्याभिचारतां गच्छन्ति । प्रवृत्तिनिवृत्तिरूपाः सर्वेऽपि धर्माः दम्भायत्ताश्चेत् विवेकनाश इति भावः ॥ ३ ॥

कुहना*—सुट्ठु विन्हिअं को उण इमस्सि परपीडणजण्णे तुम्हाणं उवदेसं कुणउ ।

दम्भः—अहह अयि मुग्धे सर्वज्ञस्य मे किमन्येनोपदेष्ट्रा । सर्वेऽपि हि पण्डितंमन्या मामेवाश्रित्य संशयं प्रशमयन्ति । अथापि मयेदानीं साक्षिमात्रतया स्थापितः कश्चिदुत्कृष्टसर्वजनतिरस्कारको गर्वो नाम सर्वजनहृदयसंश्रयी महामोहसमयमहोपाध्यायः । तस्य चेदानीमागमनं प्रतीक्ष्यास्मिन् सिद्धाश्रमे नवकृत्वः पुण्याहपूते संभृतसंभारस्सप्तर्षिभिः प्रदिष्टां बृसीमधितिष्ठामि ।

कुहना†—जुत्तं आअरिअं कज्जसिद्धि अ तुम्ह करगआ होउ ।

दम्भः—निमित्तं सूचयन् अस्मत्कुलधर्मपालिनि कुहने स्पन्दते मम दक्षिणं चक्षुः । अद्यैव च सुहृत्समागमस्सम्पत्स्यते (पुरस्तादवलोक्य) कः खल्वसौ ज्वलत्प्रभाकञ्चुकितदुर्निरीक्षमूर्तिर्महात्मा मध्यमलोकमवतीर्यास्मदाश्रमाभिमुखमागच्छति ।

* सुष्ठु विस्मितं कः पुनरस्मिन् परपीडनयज्ञे युष्माकमुपदेशं कुर्यात् ।

† युक्तमाचरितं कार्यसिद्धिश्च युष्माकं करगता भूयात् ।

अन्येनोपदेष्ट्रा किं नकिंचिदप्युपदेष्टव्यमित्यर्थः । तदेव विशदयति सर्वेपीति ॥ अथापि साक्षिमात्रतया साक्षाद्द्रष्टृमात्रत्वेन स्थापितः उत्कृष्टजनानां तिरस्कारकः अवमन्ता सर्वेषां जनानां हृदयेन संवादो समानवादः सकलजनहृदयवेद्य इति यावत् । नवकृत्वः पुण्याहपूत इति शुध्यतिशयद्योतनम् । सप्तऋषिभिः प्रदिष्टां दत्तां बृसीनयनमपि तैरेव कार्यं नान्यैः इति व्यज्यते ।

अस्मिन्नवसरे गर्वस्समागतः । दम्भस्य दक्षिणनयनस्फुरणं जातम् । तदेवाह-निमित्तं शुभनिमित्तं सूचयन्निति अभिनयन्नित्यर्थः । स्पन्दते चलति अस्य किं फलमित्यत्राह—अद्यैवेति—॥ ज्वलन्त्या प्रभया कञ्चुकिता आवृता अत एव दुर्निरीक्षा निरीक्षितु मशक्या मूर्तिर्यस्य स तथा । अस्माकमाश्रमस्याभिमुखं संमुखमागच्छति असौकः ।

ततः प्रविशति परिगृहीतपृथुलपादुकः प्रतिक्षणविक्षिप्यमाणविकटभुजदण्डो दृढतरदण्डावलम्बितप्रतिज्ञापत्रिकापताको दर्पः ।

दर्पः—अहं किल राज्ञा महामोहेन प्रकृष्टजनतिरस्काराय प्रणिहितः सकललोकतारतम्यविदृक्षया परिक्रान्तः पितामहगृहान्मध्यमलोकमवतरन्नाचक्रवालमवलोकितदिशाचक्रवालः पुरन्दरपुरोगमैर्लोकपालैरभ्यर्चितस्सुरभिमदिरासुधाचन्द्रपारिजातमणिवरवितरणमहावदान्येन मन्दरमन्थमथनसंक्षोभसर्वंसहेन मधुकैटभमथनबन्धुना सिन्धुना समाहृतं हारोपहारमाबिभ्राणः प्रत्यागतोऽस्मि भारतं वर्षम् ।

अपि च ।

त्रयोदशमिवादित्यं रुद्राणां द्वादशं तथा ।
मन्वीत नियतं लोको वसूनां नवमं च माम् ॥४॥

(विचिन्त्य सरोषहासं) अहो नु खलु जगतो मौढ्यं येषामस्मद-

परिगृहीते पृथुले पादुके येन स तथा । प्रतिक्षणं विक्षिप्यमाणो धूयमानो विकटो दीर्घो भुजदण्डो येन स तथा । दृढतरे दण्डे अवलम्बिता प्रतिज्ञापत्रिका अहमेव परिवृढः नान्य इति प्रतिज्ञासूचिकी पत्रिका सैव पताका यस्य स तथा

स्ववैभवमाह अहं किलेति—॥ प्रकृष्टाः उत्कृष्टा ये जनाः तेषां तिरस्काराय प्रणिहितः प्रेरित इत्यर्थः तारतम्यं तरतमभावः तद्दिदृक्षया परिक्रान्तः सञ्चरन् पितामहगृहात् सत्यलोकात् मध्यमं लोकं भूलोकं आचक्रवालं चक्रवालाचलपर्यन्तमवलोकितं दिशानां चक्रवालं समूहो येन स तथा सुरभिः कामधेनुः मदिरा सुरा मणिवरः कौस्तुभः येषां वितरणेन विश्राणनेन महावदान्यः परमोदारः तेन मन्दरेण मन्दराचलेन यन्मथनं तेन संक्षोभः तस्य सर्वंसहेन मधुकैटभमथनो भगवान् तस्य बन्धुना श्वशुरेण सिन्धुना क्षीरार्णवेन समाहृतमानीतं हारमुपहारमाबिभ्राणः ॥

त्रयोदशमिति—॥ मन्वीत जानीयात् आदित्यरुद्रवसुभ्योऽप्यधिकतरतेजोविशिष्टं मां दृष्ट्वा लोक एवमेव मन्वीत इति भावः ॥ ४ ॥

वक्ष्यमाणार्थप्रतिसंधानेन रोषहासौ ।

मौढ्यमेव विशदयति येषामिति—॥ अस्मदनुचराणां प्रतिनिधिपर्वणि अवस्था-

नुचरप्रतिनिधिपर्वतयव्यवस्थानमपहास्यं तेऽपि मत्सामर्थ्यमाधिक्यं वा प्रतिलब्धुं मोघवृत्तिं मनोरथमारोहन्ति ।

इहहि ।

छन्दश्छन्दितबुद्धयः पदविदः कल्पे विकल्पत्यज
शिक्षाशिक्षितमानसा विगणितज्योतिर्गणावृत्तयः ।
निर्णीतार्थनिरुक्तयस्त्रिविधया मीमांसया मांसला
नृत्यन्तो नयविस्तरेषु सुधियस्सर्वे मया खर्विताः ॥५॥

(आकाशे) रेरे बालिश किं ब्रवीषि कुतस्तवेयं शिक्षा कीदृशी च परिचितिरिति (सहस्तास्फालनं विहस्य)

विधिमन्तरेण विहगेन कुत
पयसोरशिक्ष्यत विवेकविधिः ।

ममनुचराणामनभिधाने तत्प्रतिनिधितया समावेशोऽप्यपहास्य इत्यर्थः । मोघा व्यर्था वृत्तिः प्रवृत्तिः यस्य तम् । मनोरथमारोहन्ति अनुचरप्रतिनिधिपर्वतयव्यवस्थानमपहास्यमित्युक्तं तत्कथमित्यपेक्षायाम् । सांङ्गागमादिविदस्सर्वे मया लघवः कृता इत्याह

छन्दइति–॥ छन्दश्शब्दः छन्दोविचितिपरः । छन्दोभिः उक्थात्युक्थादिभिः छन्दिताः अलङ्कृताः बुद्धयो येषां ते तथा पदविदः व्याकरणविदः कल्पे कल्पसूत्रेषु आश्वलायन बोधायन द्राह्यायणादिषु विकल्पत्यजः संदेहत्यजः निस्संशया इत्यर्थः । शिक्षया वर्णस्वरादिकया शिक्षितानि मानसानि येषां ते तथा विगणिताः विशेषेण गणिताः निश्चिताः ज्योतिर्गणस्य सूर्यादेरावृत्तयः तत्तद्राशिषु संचाराः यैस्ते तथा- निर्णीतार्था निरुक्तयो यैस्ते तथा त्रिविधया कर्मदेवताब्रह्मगोचरया मीमांसया मांसलाः पूर्णाः तदभ्यसनैकपराः नयविस्तरेषु काणादादिन्यायशास्त्रेषु नृत्यन्तः तदभ्यासमन्तुष्टाः एवं भूता अपवस्सर्वेऽपि मया खर्विताः खर्वाः कृताः मत्सामर्थ्यादल्पाः कृताः इत्यर्थः ॥ ५ ॥

रेरे इति क्षुद्रं प्रति संबोधनम् । हस्तयोः आस्फालः आघट्टनम् ॥

विधिमिति–विहगेन हंसेन पयसोः क्षीरनीरयोः विवेकविधिः इदं क्षीरं इदं नीरमिति विवेचनं विधिमदृष्टमन्तरेण विना कुतः कस्माद्धेतोः

कति वा दिनानि वद पर्यचिनोत्
कलशीसुतः कवलयन्जलधिम् ॥ ६ ॥

आस्तां तावद्विश्वतोमुखीयमास्माकी विद्या अभिजनवृत्ताभ्यामप्यहं निस्समाभ्यधिकः ।

तथाहि ।

मद्वंशोद्भवयाजनार्हपुरुषाभावादमुष्मिन्जगत्या गोत्रप्रथमादनध्वरतया प्रख्यातमस्मत्कुलम् ।
अप्रत्यक्षमनक्षपोडनविधिप्रागल्भ्यतस्स्थापितं
विष्वग्वृत्ति तपः परं किमपि मे विश्वाधिकं के विदुः ॥७॥

पुरस्तात्पश्यन् अहह ।

बहव इह नरश्छात्रा·बाह्याः कुदृष्टय इत्यमी
मिषति विबुधस्तोमे मेरुं विगूहयितुं क्षमाः ।

अभिहृतः शिक्षितः । जलधिं कवलयन् कलशीसुतः अगस्त्यः कति कियन्ति दिनानि पर्यचिनोत् तथेदमपि मम सार्वज्ञं स्वाभाविकमेवेति भावः ॥ ६ ॥

विश्वतः सर्वतः मुखं यस्यास्सा विश्वतोमुखी सर्वशास्त्रावगाहिनीत्यर्थः । विद्याज्ञानं अभिजनं कुलशुद्धिः वृत्तं आचारः ताभ्यामप्यहं निस्समाभ्यधिकः समाधिकरहितः ।

तदेवोपपादयति तथाहीति ॥

मद्वंशोद्भवेति–मद्वंशोद्भवानां याजने हिंस्यपुरुषस्य अलाभात् दौर्लभ्यात् अस्मत्कुलं आ गोत्रप्रथमात् गोत्रप्रथममारभ्य अनध्वरतया अध्वररहिततया प्रख्यातम् । अप्रत्यक्षं प्रत्यक्षागोचरं अक्षाणां इन्द्रियाणां पीडनं नियमः यस्मिन्नविद्यते सोऽनक्षपीडनः सचासौ विधिश्च विधीयत इति विधिः कर्म तस्य प्रागल्भ्यतः स्थापितं विष्वक् सर्वत्र वृत्तिः वर्त्तनं यस्य तत्तथा विश्वस्मात् तपसः अधिकं श्रेष्ठं किमपि अचिन्त्यं मे तपः के विदुः नकोऽपि जानीयुः ॥ ७ ॥

अहहेति हर्षे ।

बहव इति–॥ विबुधस्तोमे देवसमूहे मिषति पश्यत्यपि चक्षुरुन्मील्य पश्यत्यपि मेरुं हेमाद्रिं

प्रबलकुहनाभिर्गभीराभिः प्रलोभनयुक्तिभि-
र्जडबधिरपङ्ग्वन्धप्रायं जगज्जनयन्ति च ॥ ८ ॥

अथवा ।

अनपह्नुतवद्भिरव्ययावत्
प्रतिपक्षानिह किं प्रमाणवर्गैः ।
स्ववशे विनिवेशयामि विश्वं
मणिमन्त्रौषधिवञ्चनोपजापैः ॥ ९ ॥

किमाह कश्चित् प्रतिष्ठिते प्रमाणवर्गं कथं कैश्चिदेवं पाटच्चर-
वृत्तिः प्रतिपत्तव्येति । सरोषहुङ्कारं पश्य अरे ब्राह्मणापशद सार्वलौकिकं
गगनतलमलिनिमप्रत्यक्षं किं न प्रामाणिकैः परिभूयते ॥

अपि च ।

षड्भिः पूर्वप्रणीतैरलमिह समयैश्श्रद्दधानप्रमाणै-
र्वस्तुस्थित्यैकरूप्ये मतिविहृतिहते कस्य कीदृग्व्यवस्था ।

विगूहयितुं क्षमाः शक्ताः बाह्याः कुदृष्टय इत्यमी नः अस्मद्वः छात्राः शिष्याः सन्तीति
शेषः प्रबलाभिः कुहनाभिः कापटैः गभीराभिः दुरवगाहाभिः प्रलोभने वञ्चने युक्तिभिः
जगज्जगति स्थितान् जडबधिरपङ्ग्वन्धप्रायं जडादितुल्यं जनयन्ति कुर्वन्ति च । अनेन
अहं शिष्यसंपदा च निस्समाभ्यधिक इत्यस्याभिप्रायः ॥ ८ ॥

पक्षान्तरमाह अथवेति ।

अनपह्नुतेति—॥ अव्ययावत् अव्ययपर्यन्तं प्रतिपक्षान् विरोधिनः अनपह्नुत-
वद्भिः अतिरस्कुर्वद्भिः प्रमाणानां प्रत्यक्षादीनां वर्गैः स्तोमैः किं न किमपि प्रयोजनं
इह जगति मणिमन्त्रौषधिवञ्चनोपजापैः विश्वं स्ववशे विनिवेशयामि उपजापः समीपे
स्थित्वा बहुधा निवेदनम् ॥ ९ ॥

प्रमाणवर्गैः किमित्युक्तं तदसहमानस्य वाक्यमनुवदति किमाहेति—॥ प्रति-
ष्ठिते स्थिरतरे सति पाटच्चराणां तस्कराणां वृत्तिर्व्यापारः प्रतिपत्तव्या अंगीकर्तव्या
इति किमाह एवमस्माकं पुरस्तादयुक्तमुक्तवानिति क्रोधाहङ्कारौ । सार्वलौकिकं सर्व-
लोकविदितं गगनतलमलिनिमविषयं प्रत्यक्षं प्रामाणिकैः परिभूयते न किं परिभूयत
एवेत्यर्थः । अतः प्रमाणानामपि परस्परव्याघातोऽस्त्येवेति भावः ।

अक्षुभ्यद्द्विपक्षकदनव्यवहरणसहानस्मदुन्नीतयुक्त्या
सिद्धान् सिद्धान्तभेदानमदुपहितधियः प्रत्यवस्थापयन्तु[1]

(अपसव्यं पश्यन्) एते मगधकलिङ्गान्ध्रद्रमिडकर्णाटकेरलकोङ्कणादयो जनपदाः अहह ।

अष्टाचत्वारिंशतं बौद्धभेदान्
नीचोच्चयाहं हेलया निर्मिमाणः ।
अध्यासीनो बोधिवृक्षस्य मूलं
विद्यादर्पं वैदिकानामहार्षम् ॥ ११ ॥

ततः प्रभृति सुगृहीतनामानो नाममात्रनिःशेषितविपक्षास्सप्ताङ्गी परिवहितजयस्तम्भास्सञ्चरन्त्यस्माकमन्तेवासिनः ।

अपि च ।

अद्वैतं क्वचिदर्पितं क्वचिदिह द्वैतं मयासाधितं
द्वैताद्वैतसमाहृतिः क्वचिदसौ दुस्थाव्यवस्थापिता ।

अन्यदप्याह अपि चेति–॥

षड्भिरिति–॥ षड्धानानां प्रमाणैः प्रमाणभूतैः पूर्वप्रणीतैः प्राचीनपुरुषप्रणीतैः षड्भिः समयैः अलं तेषु आदरः न कार्य इत्यर्थः । वस्तुस्थितेः पेककण्ठे मतिविहत्या मतानां विरोधेन हते सति कस्य वस्तुनः कीदृक् व्यवस्था कस्याश्चिदपि व्यवस्थाया अभावात् । एवं सति सिद्धान्तभेदो न सिद्ध्येदित्यत आह अक्षुभ्यदिति–। अस्माभिः उन्नीतया युक्त्या सिद्धान् अक्षुभ्यन्तीनां द्विपक्षकदनानां व्यवहरणसहान् सिद्धान्तभेदान् मया उपहिता उत्पादिता धियो येषां ते तथा सन्तः प्रत्यवस्थापयन्तु प्रत्यवस्थितान् कुर्वन्तु ॥ १० ॥

एते मगधादयो जनपदाः ।

अष्टेति–॥ नीचा हीना उत्कर्षवती तया भाषया भेदान् निर्मिमाणः कुर्वन् अहं बोधिवृक्षस्य अश्वत्थस्य मूलं अध्यासीनस्सन् वैदिकानां विद्यादर्पं विद्याजनितं दर्पं अहार्षं हृतवानस्मि ॥ ११ ॥

सुगृहीतनामानः नाममात्रेण स्वनामश्रवणमात्रेण निःशेषिताः विनाशिताः विपक्षा येषां ते तथा ।

तत्तद्युक्तिमुधाग्रहोदितकथाकल्लोलतो वादिनां
मन्ये सम्प्रति मल्लमेषसमरप्रेक्षारसम्प्राप्नुमः ॥ १२ ॥

(परिवृत्यावलोक्य) एते पुनर्यवनतुरुष्काद्युपप्लुताः प्रत्यन्तदेशाः ।

इह च ।

वादद्यूतपणं प्रकल्प्य किमपि क्षिप्ताभिमानः कथन्
कश्चिद्वैदिकपद्धतिं द्विजपतिः क्षिप्रं मया त्याजितः ।
अर्हद्बुद्धबृहस्पतिप्रभृतिभिः क्लृप्तान्कृतान्तक्रमा
नन्योन्यव्यतिहारितानपि पठन्व्यामोहयत्यर्भकान् ॥ १३ ॥

अमी च पशुमृगपक्ष्यादिकल्पैरनार्यैरधिष्ठिता नास्मद्दृष्टिगोचरतामर्हन्ति । एतेष्वनिश्चिताचाराः कक्षावलम्बितपुस्तका विस्तारितकूर्चभाराः केचिदेते विपश्चित इवाभान्ति । आः प्रतारितोऽस्मि गाढमापातदृष्ट्या ।

अद्वैतमिति-॥ एतेषु क्वचित् केषुचित्पुस्तकेषु अद्वैतमैक्यं अर्पितमुपदिष्टं मया क्वचित् द्वैतं भेदस्साधितः क्वचित् दुस्था दुःखेन स्थिता अनयोर्द्वैताद्वैतयोः समाहृतिः समाहारः व्यवस्थापिता वादिनां तत्तद्युक्त्या तत्तन्मतादरेण यो मुधाग्रहः व्यर्थाग्रहः तेन उदितायाः उत्पन्नायाः कथायाः वादस्य कल्लोलतः तरङ्गजालात् संप्रति मेषाणां मल्लानां च समरस्य युद्धस्य प्रेक्षया दृष्ट्या यो रसः प्रतीतः तं प्राप्नुमः ॥ १२ ॥

यवनतुरुष्काद्युपप्लुता आदिशब्देन तत्तुल्यशीला म्लेच्छा गृह्यन्ते उपप्लवः उपद्रवः प्रत्यन्तदेशाः पाश्चात्यसमुद्रसमीपवर्तिनः देशाः ।

वादेति-॥ कश्चित् द्विजपतिः मण्डनमिश्रः किमपि परस्परमतप्रवेशो वाद एव द्यूतं तस्मिन्पणं प्रकल्प्य प्रतिवादिना जितः अत एव क्षिप्ताभिमानः कथन् परितप्यमानः वैदिकानां पद्धतिं मया क्षिप्रं त्याजितः अन्योन्यव्यतिहारितान् परस्परव्यामिश्रान् अर्हत्प्रमतिभिः क्लृप्तान् कृतान्तक्रमान् पठन् सन् अर्भकान् व्यामोहयत्यपि च मन्दमतीन् मोहयति च । अत्रेयं कथा अनुसन्धेया । पूर्वं कदाचित् शङ्करमण्डनमिश्रौ परस्परमतप्रवेशपणं प्रकल्प्य वादमकुरुतां ततः शङ्करेण जितः मण्डनमिश्रः तन्मतं प्रविश्य एकदण्डसंन्यासं कृत्वा सुरेश्वराचार्यकाख्यं प्रबन्धं निर्माय तेन मन्दमतीन् मोहितवानिति ॥ १३ ॥

तथा हि ।

अनियतबहुजल्पैरल्पबोधावलिप्तै-
रमतगुरुवर्गैरत्रिवर्गापवर्गैः ।
अभिनयविधुताङ्गैरङ्गुलीनृत्तसारैः
अलमिह जडभूभृत्पीठमर्दैरमीभिः ॥ १४ ॥

(उत्तरतो दृष्टिं दत्त्वा) कश्चिदितो वासौ काश्मीरतो वा जलन्धराद्वा दक्षिणाभिमुखस्समायाति । एतस्मात्तावत्प्रिययोरवस्थानं परिपृच्छामि । भद्र सुब्राह्मण किं जानासि दुर्मतसमादेशादद्रिराजपरिक्रमणाय प्रस्थितयोरस्मद्गृहिण्योरीर्ष्यासूययोरधुनातनं वृत्तान्तं । (कर्णं दत्त्वा, (किमाह) ते किल सुमतिसखीभिर्मैत्रीकरुणामुदितोपेक्षाभिः प्रतारिकाभिः कस्याञ्चिन्निवृत्तिपथसुरङ्गायां निरुद्धे इति । (सक्रोधं) आः पापोऽयं अलोकवादी ब्राह्मणवेतालः । रेरे दुरात्मन् वैधवेय श्रोत्रियब्रह्मराक्षस कथं सर्वलोकाभिसरण्योप्यस्मत्सहधर्मचारिणीत्वमनुभवन्त्योर्महाभागयोरनयोरेतादृशम-

---

अस्मद्दृष्टिगोचरतां नार्हन्ति अनिश्चितान्यक्षराणि येषां ते तथा । आपातदृष्ट्या अनिरूपणेन प्रतारितोऽस्मि वञ्चितोऽस्मि । प्रतारितत्वमेव विशदयति तथाहीति—॥

अनियतेति—॥ अनियता बहवो जल्पाः येषां तैः अल्पेन बोधेनावलिप्तैः अवमताः अवज्ञाताः गुरूणां वर्गा यैस्तैः न विद्यते त्रिवर्गापवर्गौ येषां तैः अभिनयेषु तत्तदर्थाभिनयेषु विधुतानि पटूनि अंगानि येषां तैः अङ्गुलीनां नृत्तं चलनमेव सारो येषां तैः जडाः मूढाः ये भूभृतः राजानः तेषां पीठमर्दैः

पीठमध्यस्यपुरतः प्रबोद्धान.यकादिषु ।
स पीठमर्दो विश्वास्यो कुपितस्य: प्रसादकः ॥

इत्युक्तलक्षणैः अमीभिः अलम् एतैः न किञ्चिदपि प्रयोजनमित्यर्थः ॥ १४ ॥

जलन्धरो नाम देश विशेषः । प्रिययोः इष्टयोः अवस्थानं स्थितं । अद्रिराजे हिमाद्रौ परिक्रमणाय संचाराय अधुनातनं वर्त्तनं । प्रतारिकाभिः वञ्चनपराभिः निवृत्तिपथः निवृत्तिधर्मः स एव सुरङ्गा तस्यां । ब्राह्मणवेतालः ब्राह्मणरूपपिशाचः वैधवेयः विधवापुत्रः । सर्वलोकाभिसरणे सत्यपि अस्मत्सहधर्मचारिणीत्वं अनुभवन्त्योः सर्वलोकाभिसारिण्योः सहधर्मचारिणीत्वासम्भवेऽपि तादृशमहिमशा-

त्याहितं सम्भविष्यति । निर्वर्ण्य प्रागप्यवगतोयं पर्वतीयैर्व्योधपतिभिः प्रणिधिभावेन प्रेषितः पर्यटनशीलः कश्चित्पान्थः (सपरिहासं) अहो देशकालविशेषसंभवोयं दोषसमवायः ।

यथा ।

श्वश्रूरस्य दिगम्बरव्रतवती सम्बन्धिनस्सौगता
माता चास्य पिता च पाशुपतिनौ वैशेषिको देशिकः ।
जाया तिष्ठति सांख्ययोगसमये चार्वाकशिष्यस्सखा
मिथ्याचारसमाह्वयस्स्वयमसौ विप्लावकोवैदिकः ॥१५॥

तदयं मिथ्याचारनामा व्याधप्रणिधिरलीकवादी चासंभाष्यो मा दृशैर्महात्मभिः । एतदवलोकनदोषपरिहाराय दिवाकरमात्मानं वा पश्यामि । (विकटं परिक्रम्य) अहहे महानद्योरिह गङ्गायमुनयोरमी मध्यमा जनपदाः । एतेषु चावधीरितबृहस्पतिप्रज्ञानामस्माकमनन्तसिद्धान्तसृष्टिकर्बुरमुपन्यासं प्रजापतिपशुपतिदत्तवरोपि कः पुनः प्रत्येष्यति । कुतः

लिन्यावेते इति हृदयं । अत्याहितं विपद् । निर्वर्ण्य सम्यक् दृष्ट्वेत्यर्थः । अवगतः ज्ञातः प्रणिधिभावेन चारत्वेन प्रेषितः । वक्ष्यमाणार्थस्मरणादुपहासः । देशकालयोर्विशेषाभ्यां सम्भव उत्पत्तिर्यस्य स तथा । समवायमेवाह यथेति ।

श्वश्रूरिति—॥ अस्य श्वश्रूः दिगम्बराणां व्रतं दिगम्बरव्रतं तद्वती । सम्बन्धिनः स्नुषायाः पुत्र्यादेश्च जनकादयः सौगताः बौद्धाः पितरौ पाशुपतिनौ पाशुपतनिष्ठौ देशिकः गुरुः वैशेषिकः जाया स्त्री साङ्ख्ययोगसमये साङ्ख्ययोगः साङ्ख्यविषयकं ज्ञानं समयः तज्जनकं शास्त्रं तस्मिन्तिष्ठति सखा चार्वाकशिष्य. लोकायतिकशिष्यः असौ स्वयं मिथ्याचारसमाह्वयः मिथ्याचाराख्यः विप्लावकः आचाराणां विप्लवकारी अत एव अवैदिकः ॥ १५ ॥

एतदवलोकनदोषस्य अवलोकनजनितदोषस्य परिहाराय दिवाकरं पश्यामीत्युक्त्वा तत्रापरितोषात् ततोपि पावनमात्मानं स्वदेहं वा कायक्लेशपर्यायः स्वदेहमेव पश्यामीति वदति । अनन्तानां सिद्धान्तानां सृष्ट्या कर्बुरं नानारूपं प्रजापतिपशुपतिभ्यां दत्तवरोपि कः प्रत्येष्यति ज्ञास्यति अपवर्गमार्गस्य निरोधे उद्यतेन अधरो-

पुनरनुवादादयः । इह चापवर्गमार्गनिरोधोद्यतेनास्मत्स्वामिना समाहूतैरपरास्तवासिभिर्बौद्धकपालिभिरधरोत्तरीकृता राजधान्यः । चरन्ति चात्र केचिदमी चक्रवर्तिनो डाम्भिकानां ।

एते च ।

अयाचन्तः किंचित्स्वयमुपनतेनादरगिरो
धनायाशैलूषीसहचरितसाकूतगतयः ।
निवृत्त्याख्ये धर्मे स्थितिमभिनयन्तो निरुपधिं
नमस्यन्ते सद्भिर्नवमरसनाडिन्धमदृशः ॥ १६ ॥

अपि च दृश्यतेतत्कलेरनङ्कुशमाधिराज्यं महामोहस्य वा तपसां परिपाकः ।

स्वतन्त्रवरवर्णिनीसुरतकेलिसौत्रामणी
रसार्चितमनोभवां रहसि निर्विशद्भिः क्षपां ।
दिवा विविधभूमिकाविहितकञ्चुकैर्वञ्च्यते
वियात्नकितवैरिदं वितथदत्तवित्तं जगत् ॥ १७ ॥

तराः कृताः अधरोत्तरीकृताः विपर्यस्ता इत्यर्थः । डाम्भिकानां चक्रवर्तिनः राजानः ॥

अयाचन्त इति—॥ किञ्चिदपि वस्तु अयाचन्तः स्वयमुपनते धनधान्यादिके अनादरा आदररहिता गिरो येषां ते तथा धनाया धनेच्छा सैव शैलूषी नर्तकी तया सहचरिताः तत्सहिताः साकूताश्च गतयो व्यापारा येषां ते तथा निवृत्त्याख्ये निवृत्तिसंज्ञे धर्मे निरुपधि निर्व्याजां स्थितिमभिनयन्तः नवमरसनाडिन्धमाः शान्तिरसनाडिन्धमाः दृशः येषां ते तथा शान्तिरसोत्तम्भकनयनविलसिताः इत्यर्थः सद्भिर्नमस्यन्ते ॥ १६ ॥

अनङ्कुशमप्रतिहतं । परिपाकः फलनिष्पत्तिः । किं तदित्यत्राह—

स्वतन्त्रेति-॥ स्वतन्त्राः स्वाधीनाः वरवर्णिन्यो वेश्याः तासां सुरतकेलिः सुरतक्रीडा सैव सौत्रामणी इष्टिविशेषः तस्यां रसः तेनार्चितः आराधितः मनोभवः यस्यां तां क्षपां रात्रिं रहसि निर्विशद्भिः नयद्भिः दिवा दिवसे विविधाश्च ताः भूमिकाश्च ताभिः विहितकञ्चुकैः वियात्नकितवैः धृष्टचोरैरिदं जगत् वितथं व्यर्थं यथा तथा दत्तं वित्तं धनं यस्य तत्तथाभूतं वञ्च्यते ॥ १७ ॥

अत्र ग्रामी म्लेच्छाधिष्ठितं देशमपरित्यजतां बहिरावरणमात्र संरक्षितवर्णाश्रमधर्माणामनन्यगतिकानां द्विजानामपहाराः ।

एतेषु च

संस्काराः परमुत्सवैकवपुषस्सन्ध्या विनोदावधि-
स्सावित्री जनवादजर्ज्झरतनुश्शौचन्नटप्रायिकं ।
इत्थं मोहमहीपतेरनुमते विश्वं विपर्यस्यतः
कालस्यैष कलेरलेपकमतव्यक्तक्रमः प्रक्रमः ॥ १८ ॥

अहो नु खलु अयमपि महानत्र धर्मक्रमः

तरुणाकृतयः कचेषु कृष्णा-
स्तइमे दम्पतयस्सहैव साध्यम् ।
इतरेतरदैवतं भजन्ते
मदनोपज्ञमजस्रमग्निहोत्रम् ॥ १९ ॥

बहिरावरणमात्रेण वेषमात्रेण न तु मनश्शुद्ध्यादिनेति भावः संरक्षिता वर्ण-धर्माः आश्रमधर्माः येषां तेषां ।

संस्कारा इति—॥ संस्काराः गर्भाधानादयः परमधिकं उत्सवैकवपुषः उत्सव मात्रशरीराः न तु विध्युक्तमन्त्रतन्त्रादिसङ्कुलाः सन्ध्या प्रातस्सन्ध्यादिका विनोदानां सहासोक्तीनां अवधिरेव अवधिः परा काष्ठा यस्यास्सा तथा सावित्री सन्ध्यासु जप्यमाना सावित्री जनानां वादैः जर्झरा विशीर्णा तनुः यस्यास्सा तथा शौचं शुद्धिः नटप्रायिकं नटानामिव अत्यल्पं मोहमहीपतेः महामोहस्य राज्ञः अनुमते विश्वं विपर्यस्यतः विपरीतं कुर्वतः कलेः कालस्यैव प्रक्रमः प्रकारः अलेपकानां प्रपञ्चस्य बुद्धिपूर्वोत्तराद्यश्लेषं वदतां मते व्यक्तः स्फुटं क्रमो यस्य स तथा । एवं वर्णाश्रमधर्मविपर्यासहेतुः कलिरलेपकमतानुसारीति भावः ॥ १८ ॥

कौलधर्मं दृष्ट्वात आह—

तरुणेति—॥ तरुणा आकृतयः तनवो येषां ते तथा कचेषु कृष्णाः विशेषणद्वयेन युवत्वं जरावैधुर्यं च द्योत्यते कृष्णकेशोऽग्नी नादधीतेति अग्निहोत्रे अधिकारश्च । त इमे दम्पतयः सहैव मिलित्वैव साध्यं इतरेतरदैवतं परस्परदेवताकं मदनोपज्ञं मन्मथोपदेष्टृकं अग्निहोत्रमजस्रं भजन्ते ॥ १९ ॥

अपि च

प्रतिवीथिकमाश्रयन्त एते
कुहनासूक्तिमयीं कुसीदवृत्तिम् ।
अपरीक्षितशिष्यमत्र सर्वे
शुकवद्ब्रह्म पठन्ति शुद्धवेषाः ॥ २० ॥

अन्यतोऽवलोक्य हन्त चित्रार्पितमुकुन्दुहवर्गाचभाः पुराणपठितिमठभित्तिकोणमाश्रित्य जोषमासते (सूक्ष्मं निर्वर्त्य) अहह्हामी दीर्घतरदर्भपूलपूरिताङ्गुलिविवरेण दक्षिणकरेणानासिकाङ्कुवलयन्तः प्राणसंशयेनापि प्राणसंयमनमभिनयन्ति (सहस्तास्फालनं)

अपटुफणितिभावाद्बिभ्रतो मौनमुद्रा
मनितरशरणत्वादादृतान्योन्यसङ्घाः ।
अगतिविहितभिक्षावृत्तयः केचिदेते
चिरविधृततुरङ्गब्रह्मचर्या महान्तः ॥ २१ ॥

अन्यदप्याह अपि चेति—॥

प्रतीति—॥ कुहनासूक्तिः कपटोक्तिः तन्मयीं कुसीदवृत्तिं वार्धुषिकवृत्तिं प्रतिवीथिकं वीथ्यां वीथ्यामाश्रयन्त एते अपरीक्षिताः शिष्या यस्मिन्कर्मणि तद्यथा भवति तथा शुद्धवेषास्सन्तः शुकवत् अर्थज्ञानविरहेण ब्रह्म वेदं पठन्ति ॥ २० ॥

पुराणानां पठितिमठः पुराणपठितिमठः तस्य भित्तिः तत्कोणमाश्रित्य जोषं तूष्णीमासते । दीर्घतरेण दर्भपूलेन पूरितान्यङ्गुलीनां विवराणि यस्य तेन दक्षिणकरेण प्राणस्य संशयेन प्राणोऽस्ति वा न वेति संशयेनापि प्राणसंशयं प्राणायाममभिनयन्ति ।

अपट्विति—॥ अपटुः भणितिः व्यवहारो यस्य न तथात्वात् असमीचीन भाषणत्वादित्यर्थः मौनमुद्रां बिभ्रतः न विद्यते इतरच्छरणं येषां ते अनितरशरणाः तत्वात् समर्थास्तु अन्ये एतैः न संगच्छन्ते अतः आदृतान्योन्यसंघाः संमानितपरस्परसमूहाः न विद्यते गतिर्येषां ते अगतयः अगतित्वात् विहितभिक्षावृत्तयः दरिद्रतया कृतभिक्षाजीवाः चिरविधृतं तुरङ्गब्रह्मचर्यं यैस्ते तथा । तुरङ्गब्रह्मचर्यं नाम मन्दुराबद्धानां तुरंगाणां मैथुनराहित्यं एवं भूताः केचिदेते वर्तन्ते इति शेषः ॥ २१ ॥

(सोपक्रोशं हस्तौ विधून्वन्)

अनल्पमदपित्तलैरनुपरुद्धमानग्रहै-
रजल्परणकर्कशैरपरिदृष्टतर्कक्रमैः ।
अतथ्यनियमस्थितैरनतिवृत्तदंभोद्यमै-
रशिक्षितचमत्कृतैरलमसद्भिरेतादृशैः ॥ २२ ॥

(अन्यतो दृष्टिं प्रसारयन्) अमी पुनरमुष्टिमेययज्ञोपवीतसंछन्नवक्षसः करावलम्बिताक्षमालाः करचरणनयननासादिषु मन्त्रवर्णान्निरन्तरं न्यस्यन्तस्तीर्थयात्रोत्सुकपथिकसार्थयातायातपद्धतिपरिसरप्रतिष्ठापितं चेलाजिनकुशोत्तरमासनमधितिष्ठन्ति । हन्तैषां महायोगिनामद्भुतवैरपेक्ष्यं येनस्वयमप्यन्तर्हसन्ति । यतश्च

दम्भस्येव ध्वजममितया मण्डितं दर्भमुष्ट्या
द्राघीयांसं कमपि पुरतस्संप्रतिष्ठाप्य दण्डम् ।

उपक्रोशः जुगुप्सा ।

अनल्पेति—॥ अनल्पेन मदेन पित्तलैः पित्ताधिकैः अनुपरुद्धः अप्रतिबद्धः मानः अभिमान एव ग्रहः भूतविशेषो येषां ते तथा जल्पः कथा विशेष एव रणः तस्मिन्कर्कशाः, तैः अपरिदृष्टा अपरिचिताः तर्कक्रमाः यैस्तैः अतथ्येषु नियमेषु स्थितैः नविद्यते अतिवृत्तिः यस्य सः अनतिवृत्तिः दंभोद्यमो येषां तैरशिक्षितं चमत्कृतं चमत्कारः येषां तैरलं ॥ २२ ॥

अमुष्टिमेयानि अमुष्टिपरिमितानि यज्ञोपवीतानि तैस्संछन्नं वक्षो येषां ते तथा । करतलेन अवलंबिता अक्षमाला येषां ते तथा मन्त्रवर्णानि मन्त्राक्षराणि तीर्थाम्युद्दिश्य यात्रायां उत्सुकानां रसिकजनानां यातायातपद्धतौ गतागतमार्गे प्रतिष्ठापितं चेलाजिनकुशोत्तरं चेलं वस्त्रं अजिनं व्याघ्रचर्मादि कुशादर्भविशेषाः तान्युत्तराणि उपरिक्षिप्तानि यस्य तत्तथा आसनं अधितिष्ठन्ति । महायोगिनामित्यत्र व्यतिरेकलक्षणा अद्भुतमदृष्टपूर्वं येन नैरपेक्ष्येण । अन्तर्हृदये । कुतोऽयमन्तोत्यत आह यत इति—॥

दंभस्येति—॥ अमितया दर्भमुष्ट्या मण्डितं दम्भस्य ध्वजमिव स्थितं द्राघीयांसं अधिकोन्नतं कमपि दण्डं पुरतः संप्रतिष्ठाप्य नामतः आख्यामात्रेण तीर्थपादाः

पादोपान्तप्रणिहितधनान्प्राणिनो भक्तिनम्रान्
नावेक्षन्ते कितवमुनयो नामतस्तीर्थपादाः ॥२३॥

अहहामी निरन्तरमान्तरं ध्यानमभिनयंतः पुरः प्रतिष्ठापितान्दे-वतामपि नोद्वीक्षन्ते अभ्यर्णमागतानपि आचार्यमातापितृप्रमुखान-र्धनिमीलितेन लोचनेनावलोकयन्तोऽप्यनवलोकनच्चाटयन्ति। का कथा-प्रणामादीनाम्। एतेषु च।

शमदमवृत्तसमाधिषु निस्पृहभावे च नैष्ठिका डम्भाः।
अयुतायुतांशकक्ष्यामडम्भडम्भस्य नार्हन्ति ॥ २४ ॥

अयं पुनरिहानुपतितमार्जारधूर्तबकवृत्तीनां त्रयोविद्यातपस्विना-मग्रगण्यो महातपाः।

शिक्षाविशेषनिभृताकृतिरूर्ध्वबाहुः
प्रक्ष्वेडयन्निव निजान्तपसि प्रतिष्ठाम्।
दर्भावृतो क्षितितले निहितैकपादः
चित्रं सजीवमिव तिष्ठति डाम्भिकेन्द्रः ॥ २५ ॥

तीर्थपादचरणाः कितवमुनयः कपटतापसाः पदयोरुपान्ते प्रणिहितं न्यस्तं धनं यैस्तान् भक्त्यानम्रान् प्रह्वान् प्राणिनः नावेक्षन्ते न विलोकयन्ति ॥ २३ ॥

आराधनाय पुरतः प्रतिष्ठापितां अभ्यर्णे अभ्याशे अवलोकनस्याप्यभावे प्रणा-मादीनां काकथा।

शमेति—॥ शमः चित्तप्रशान्तिः दम इन्द्रियजयः वृत्तं वर्णाश्रमाचारः समाधि-र्योगः एषु निस्पृहत्वे च नैष्ठिका निष्ठावन्तः डंभाः अडंभडंभस्य अडंभं अभि-नयतोऽडंभस्य अयुतांशस्य यः अयुतांशः तस्य कक्ष्यां साम्यं नार्हन्ति। अडंभ-डंभस्यान्ये डंभाः अयुतायुतांशकक्ष्यामपि नार्हन्तीति भावः ॥ २४ ॥

समीपागतानपि क्षुद्रमत्स्यानपीडयन् बकोधूर्तबकः अनुगता तद्वृत्तिर्यैस्तेषां। त्रैविद्यतपस्विनां त्रयीपठननिरततपस्विनां अग्रगण्यः अग्रेगणयितुं योग्यः।

शिक्षेति—॥ शिक्षाविशेषेण निभृताकृतिः निश्चलशरीरः निजां तपसि प्रतिष्ठां प्रक्ष्वेडयन्निवस्थितः दर्भैरावृते क्षितितले प्रोक्षिते च तले निहितः एकः पादः यस्य सतथा डांभिकानां इन्द्रः सजीवं जीवसहितं चित्रमिव तिष्ठति ॥ २५ ॥

इतश्चायमेतादृशो याचजूकः

अलिकचिबुकनासाजानुबाहूदराद्यै
र्विवृतनतिविशेषो मृत्तिकालेपचिह्नैः ।
कनकगिरिमिवेच्छन् कश्चिदग्नीन्समिन्धे
मुकुलितनयनार्धो मूर्तिमानेष दम्भः ॥ २६ ॥

(परिवृत्यावलोक्य) अहो नु खलु काषायदण्डमात्रशरणानां कलियुगसन्यासिनां नैरपेक्ष्यम् ।

भिक्षेति शिष्यजनरक्षणदक्षिणेति
शाटीति शाश्वतमठोपधिकल्पनेति ।
ग्रन्थोपसंग्रहणमूल्यमिति ब्रुवाणाः
सन्यासिनोपि दधते सततन्धनायाम् ॥ २७ ॥

सहर्षं, नूनमीदृशपुरुषावष्टब्धे जीवलोके छिद्रप्रायं समीहितं महामोहस्य । अथाप्येतदिह सितासितनदीसंभेदो विवेकस्थानमिव किञ्चिदाभाति । यदुत

एतादृशः अस्यायमेव सदृशः याचजूकः यज्ञशीलः ।

तमेवाह—

अलिकेति—॥ मृत्तिकायाः लेप एव चिह्नं येषां तैः अलिकं ललाटं आदिशब्देन अङ्गुष्ठशाङ्गुन्तरकपोलानां ग्रहणं अलिकाद्यैरवयवैर्विवृतः विस्तृतः प्रकाशितः नत्यर्थः नतिविशेषः प्रणामविशेषः यस्य स तथा मुकुलितं नयनार्धं यस्य स तथा मूर्तिमान् विग्रहवानेव दम्भः कनकगिरिं मेरुमिच्छन्निव अग्नीन्समिन्धे ॥ २६ ॥

काषायदण्डावेव शरणं येषां तेषाम् ।

नैरपेक्ष्यमेव विशदयति—

भिक्षेति ॥— शिष्यजनानां रक्षणदक्षिणा सेवाभक्तिरिति शाटीकाषायवस्त्रं शाश्वतस्य सन्यासिपरंपराप्राप्तस्य मठस्य उपधिकल्पना तद्वार्धहेतुस्तृणातुलादि कल्पना ग्रन्थोपसंग्रहणस्य पुस्तसंपादनस्य मूल्यम् ॥ २७ ॥

हर्षहेतुमाह नूनमिति समीहितमिष्टं छिद्रप्रायं छिद्रतुल्यमित्यर्थः । सितासित नद्योः गङ्गायमुनयोः संभेदः संमेलनम् । विवेकस्थानत्वे हेतुमाह यदुतेति—॥

आचारोदधिसैकतप्रतिनिधिर्मृत्पिण्डकूटः क्वचित्
पापच्छेदनशस्त्रजालपरुषः कुत्रापि दर्भोत्करः ।
पूजाशेषितपुष्पपल्लवफलस्तोमस्स्फुरत्यन्यतो
मन्ये कस्यचिदेतदाश्रमपदं मान्यं महायोगिनः॥ २८॥

अत्र च

विरुद्धमतिकर्दमं विषयवृत्तिविन्ध्याटवीं
त्रिवर्गमृगतृष्णिकां त्रिगुणवागुरायन्त्रणाम् ।
निवर्त्य नियमक्रमैस्स्फुरति मुक्तवत्कोऽप्यसा-
वपत्यमथवाग्रजस्सवितुरेष तातोऽपि वा ॥ २९ ॥

उपसर्पामि तावदेनम् । (इत्याश्रममासीदति निमित्तं सूचयन् सहर्षं) नूनमिह मे प्रियासमागममत्यासन्नमभिव्यनक्ति दर्शितस्पन्दलास्यं दक्षिणचक्षुः । ततः प्रविशति प्रव्राजितवेषधारिण्यसूया—

आचारोदधिसैकतेति—॥ आचारः वर्णाश्रमोचितशौचाचमनाद्यनुष्ठानं स एवोदधिः तस्य सैकतप्रतिनिधिः पुलिनसदृशः महाङ्कुरितप्रदेशे मृत्पिण्डानां कूटः समूहः पापानां छेदेन शस्त्रजालवत्परुषः क्रूरः दर्भाणां उत्करः उच्चयः पूजायाः शेषितान्यवशिष्टानि पुष्पपल्लवफलानि तेषां स्तोमः राशिः स्फुरति अतः कस्यचिदाश्रमपदं मन्ये ॥ २८ ॥

अत्र आश्रमपदे ।

विरुद्धेति—॥ विरुद्धा वेदविरुद्धा मतिर्ज्ञानं सैव कर्दमः तं विषमा शास्त्रनिषिद्धा वृत्तिर्व्यापारः सैव विन्ध्याटवी तां. त्रयो वर्गाः धर्मार्थकामाः त एव मृगतृष्णिका मरीचिका तां त्रयो गुणाः सत्त्वरजस्तमांसि त एव वागुरा जालं तस्यायन्त्रणं बन्धनं नियमानां क्रमैः परंपराभिः निवर्त्य कोऽपि मुक्तवत्स्फुरति असौ तु सवितुः अपत्यं अथवा अग्रजः तेजोविशेष्यात् अथवा तातः ॥ २९ ॥

निमित्तं दक्षिणाक्षिस्पन्दनरूपं सूचयन्नभिनयन् । दर्शितः स्पन्दनं चलनं स एव लास्यं येन तत् ।

प्रव्राजितानां सन्यासिनां यो वेषः तद्धारिणी । स्वगतमाह अहंहीति—।

असूया—अहं हि विवेकपरिपन्थिचूडामणेर्महाराजस्य महामोहस्य देव्या दुर्मत्या विश्वजनहृदयविस्रम्भकवेषपरिग्रहेण विदुषां चित्तमुपप्लावयितुमादिष्टा परिक्रान्तचतुर्दशभुवना प्रयागतीर्थमवगाह्य प्रतिगतास्मि भगवतो धर्मध्वजाख्यस्य कुलपतेराश्रमम् । निपुणमिहापि गुणवद्विषये दोषानुद्घाटयितुं चारतन्त्वं तन्त्रयितव्यम् । स्वसामर्थ्यं बहुमत्य

मयि दत्तावधानायां विश्वदोषापहारिणा ।
न शक्यमीश्वरेणापि निरवद्येन वर्तितुम् ॥ १० ॥

निरङ्कुशाः खलु मत्परिगृहीताः पुरुषा नित्यमविद्यमानमपि दोषं विद्यमानवदापादयन्ति किमुत विद्यमानं ।

तथाहि

निरवधिगुणग्रामे रामे निरागसि वागसि
स्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।

विवेकस्य परिपन्थिनां विरोधिनां चूडामणेः श्रेष्ठस्य विश्वेषां जनानां हृदयस्य विस्रंभकः यो वेषः तस्य परिग्रहेण विदुषां चित्तं उपप्लावयितुं संक्षोभयितुं परिक्रान्तानि चतुर्दशभुवनानि यया सा तथा गुणवति विषये दोषानुद्भावयितुं उत्पादयितुं च चारतन्त्वं चारकत्वं तन्त्रयितव्यं कारयितव्यम् ।

बहुमत्य बहुत्वेन मत्वेत्यर्थः ।

तत्प्रकारमेव आह—

मयीति—॥ मयि दत्तावधानायां अवहितायां सत्यां विश्वान्दोषानपहरतीति विश्वदोषापहारी तेन ईश्वरेणापि निरवद्येन निर्दोषेण वर्तितुं न शक्यं । असूयाल-वोऽपि भगवत्यपि दोषानुद्भावयन्तीति भावः ॥ १० ॥

निरवधीति—॥ वागेव असिः तस्य स्फुरणेन मुषितः अपहृतः आलोकः ज्ञानं प्रकाशः येषां ते तथा लोकाः जनाः निरवधिः गुणग्रामो यस्य तस्मिन् निरागसि रामे वरतनोः ताटकायाः हतिं वालिद्रोहं अन्येन युध्यमानस्य हननं मनाक् अल्पं अपसर्पणं खरायोधने पश्चाद्देशस्य पदस्यापसर्पणं सदामन्तिके समीपे अतः परि-

यदतनुहृतिं वाक्तिद्रोहं मनागपसर्पणं
परिमितगुणे स्पष्टावद्ये मुधा किमुदासते ॥ ३१ ॥

परिक्रम्य क एते प्रत्यासन्नसुरसरिदनूपस्थोपवनमहीतलनिहित-योगासनाः स्थिरतरपर्यङ्कबन्धबन्धुरनिभृतोन्नततरर्जुकाया मुग्धजटिल-शिखाजटा मुनयः । निर्वर्ण्य हन्त विदितमेतत् (सान्तर्हासं)

स्तनभरनतमन्तर्ब्रह्म सञ्चिन्तयन्तः
पुलकितनिभृताङ्गाः पुष्पबाणागमस्थाः ।
विजितकरणवर्गा विश्रुतात्मान एते
मुषितनिखिलधर्मा मुक्तभावं भजन्ते ॥ ३२ ॥

नामतश्चैतान्निर्दिशामि

मिताः गुणाः यस्य तस्मिन् स्पष्टं अवद्यं यस्य तस्मिन् जन इति शेषः मुधा उदासते उदासीना भवन्ति किं वदन्त्येवेत्यर्थः ॥ ३१ ॥

प्रत्यासन्नायाः सुरसरितोऽनूपे तीरे यदुपवनं तस्य महीतले निहित पर्यङ्काः स्थिरतरेषु पर्यङ्केषु बन्धेन नियमनेन बन्धुराः सुन्दराः निभृताः निश्चलाः उन्नताः प्रांशवः ऋजवः अवक्राः काया देहा येषां ते तथा मुग्धाः केचित् जटिलाः केचित् शिखाजटाः शिखामात्रजटाः केचित् वर्तन्ते । एते के इति विचारः हन्तेति हर्षे । विदितमेतन्मयेति शेषः अन्तर्हासेन हृदयहासेन सहितं यथा तथा ॥

एवं वक्ष्यमाणार्थप्रतिसन्धानेन-

स्तनेति-॥ अन्तश्चित्ते ब्रह्म संचिन्तयन्तः तत्कीदृशं स्तनभरेण नतं योषिद्रूपं पुलकितं निभृतं चाङ्गं येषां ते तथा पुष्पबाणागमे कामशास्त्रे तिष्ठन्तीति तथोक्ताः विजितः स्वस्वविषयेभ्य आकृष्य एकतानीकृतः इन्द्रियाणां वर्गः यैस्ते तथा करण-वर्गविजिता इतिवा । आहिताग्न्यादिवत् समासः । विश्रुतः विशेषेण श्रुतः आत्मा स्वस्वरूपं यैस्ते तथाविश्रुतः प्रसिद्धः आत्मा स्वभावो येषां ते तथा वर्णाश्रमधर्म-त्यागिनः । पुण्यपापे विधूयेति श्रुतेः । विधूतसकलधर्मा इति च ब्रह्मचिन्तनं पुलकितांगत्वं आगमनिष्ठत्वं जितेन्द्रियत्वं आत्मवित्वं विधूतधर्मत्वं इत्येतानि मुक्तलक्षणानि तत एव मुक्तभावं भजन्ते ॥ ३२ ॥

एतान् पूर्वोक्तान् ।

श्रद्धायाजी षड्रसभक्ष्यवादी
कामैकान्ती काकणीनिष्कदासः ।
मार्जाराणां कुक्कुटानां बकानां
छात्रा एते सिद्धचार्वाकतन्त्राः ॥ ३३ ॥

स्वस्ति चैतादृशां स्वोपकारमात्रसंरम्भाय । दृश्यते हि

नवदलपुटे कल्प्या यस्य प्रभोरपि तल्पधीः
नटपरिवृढो यस्याधस्ताच्छ्रमं शमयिष्यते ।
वटविटपिनस्तस्याङ्कुराननुत्कटपल्लवान्
स्थपुटचटसापेक्षी भिक्षुः प्रतिक्षणमीक्षते ॥ ३४ ॥

(आकाशे कर्णं दत्त्वा) किं ब्रूथ भिक्षवः । प्रव्रज्यापरिग्रहः परिवदनञ्चेति विप्रतिषिद्धमिति । ही ही निगृहीता एव यूयं स्ववचन-

---

श्रद्धेति—॥ अन्येषां स्वस्मिन् श्रद्धोत्पत्तये यजतीति श्रद्धायाजी षड्रसा एव कट्वम्ललवणमधुतिक्तकषाया एव भक्ष्या इति वक्तुं शीलमस्यास्तीति तद्वादी कामे मन्मथे एकः मुख्यः निश्चयो ऽस्यास्तीति कामैकान्ती कामपुरुषार्थ एव श्रेयानिति निश्चयवान् काकणीनिष्कस्य अशीतिभागमात्रहेम्नः दासः एते मार्जाराणां यत्रकुत्रचिच्छिद्रबलतया स्थित्वा समीपागतस्वाभिमतप्राणिनां छात्राः बलात्कारेण स्त्रीसंभोगं कुर्वतां कुक्कुटानां पर्याप्तप्रयोजनपर्यन्तं अल्पाननवेक्षमाणानां बकानां च शिष्याः सिद्धं चार्वाकतन्त्रं येषां ते तथा ॥ ३३ ॥

स्वोपकारमात्रसंरंभाय स्वस्ति अस्त्विति शेषः । संरंभो दृश्यते हीत्यर्थः ।

नवेति—॥ यस्य वटस्य नवे दलपुटे पत्रपुटे प्रभोर्हरेरपि तल्पधीः पर्यङ्कबुद्धिः कल्प्या भगवान् हि प्रलयसमये सर्वमुपसंहृत्य महार्णवे वटदले शेत इति प्रसिद्धेः नटानां परिवृढः प्रभुश्शंभुः यस्याधस्तात् मूलदेशे श्रमं ताण्डवजनितं शमयिष्यते शंभुः किल सन्ध्यासु ताण्डवं कृत्वा तज्जन्यं श्रमं वटमूले स्थित्वा शमयतीति प्रसिद्धं तस्य वटविटपिनः वटवृक्षस्य अनुत्कटाः अप्रकाशाः पल्लवाः येषां तान् अंकुरान् स्थपुटचटसे विशालायतभाजने अपेक्षा अस्यास्तीति स्थपुटचटसापेक्षी भिक्षुर्माणवकः प्रतिक्षणं ईक्षते । एतद्दलानि कदा परिणतानि भविष्यन्ति कदाहं तैः पृथुलं चटसं गृहीत्वा भिक्षां ग्रहीष्यामीति क्षणे क्षणे पश्यतीति भावः ॥ ३४ ॥

आकाशे कर्णदानं भिक्षुवचश्रवणार्थं किं ब्रूथेति तद्वचनानुवादः । प्रव्रज्यायाः सन्यासव्रतस्य परिग्रहः परिवदनं परिवादः सन्यासिनां परिवादस्य निषिद्धत्वात्

विरोधेन। प्रव्रजिताः खलु भवन्तोऽपि स्वगृहेभ्यः परिवदन्ति च मामिति (अन्यतोऽवलोक्य) अयमपरः कश्चिदिह रौक्मकुण्डलदण्डकमण्डलु मण्डितः कटितटनिबिडनिगुम्भितदर्भरज्जुरष्टकाश्चाहुभोऽजननिरन्तराध्मातकुलिशनवरतविरचितहुङ्कारभर्त्सितपुरोवर्तिजन इतस्ततो दत्तदृष्टिस्तृणीकृतजगत्त्रयस्त्रिविष्टपैरपि दुष्प्रवेशं धर्मध्वजस्य कुलपतेराश्रममुपजिगमिषति । इमन्तावदाश्रमद्वारोपरोधेन तस्थुषी विशेषतो विविदिषामि ।

दर्पः—उपसृत्य प्रश्रयमभिनयन् अयि भगवति भारतकथाप्रसिद्धवैभवा प्रव्रजिताश्रमाधिदेवताकल्पा प्रत्यायितयोगसिद्धिस्तुलभैव संदृश्यसे । तदहमिह नामकुलगोत्रादिभिर्विशेषतस्त्वां विजिज्ञासे ।

असूया—भद्र अन्तिमाश्रमप्रविष्टैरवक्तव्यं पृच्छसि । अप्रणम्य तु मां कथं यूपवत्तिष्ठसि ।

दर्पः—वयःकर्मविद्यादिभिरधिकोऽहं आश्रमाधिका तु भवती । इहतु मन्तृमन्तव्यभावे सन्निहितानस्तिष्ठामि ।

असूया—अत्र तदस्मिन्नाश्रमे योऽसौ कुलपतिरशेषधर्मविदास्ते तमेव धर्मसङ्कटं पृच्छावः—

नवास्मत्परिवदनं विप्रतिषिद्धमिति किं ब्रूथेति अन्वयः । हीहीति जुगुप्सायां । स्वव्रतविरोधेन युष्माभिर्निगृहीताः कुत इत्यत आह प्रव्रजिता—इति । प्रस्थिताः खलु भवन्तः रौक्मे रुक्मकृते कुण्डले कटितटे निबिडं यथा भवति तथा गुंभिता वेष्टिता रज्जुर्यस्य स तथा तृणीकृतं तृणं कृतं जगत्त्रयं येन स तथा । त्रिविष्टपैः देवैः इमं प्रकृष्टं आश्रमद्वारोपरोधेन आश्रमद्वारावरणेन तस्थुषी स्थिता विविदिषामि वेत्तुमिच्छामि ।

प्रश्रयं विनयं । भारतकथायां प्रसिद्धवैभवा प्रव्राजकाश्रमस्य अधिदेवतातुल्या प्रत्यायिता प्रत्ययवती योगसिद्धिर्यस्यास्सा तथा विजिज्ञासे विज्ञातुमिच्छामि ।

अन्तिमाश्रमः सन्न्यासाश्रमः वयःकर्मविद्यादिभिरित्यत्रादिशब्देन अभिजनो गृह्यते ।

अशेषान्धर्मान् वेत्तीति अशेषधर्मवित् । धर्मेषोऽस्तं कटं संमर्दे किं तदित्यत आह—

दर्पः—यदभिमतं भवत्यास्तदभ्युपगच्छामि । तिष्ठत्वयं विमर्शः । किन्तु किञ्चिदन्तर्वर्तते ।

भवतीं सन्निवेशेन भाववीक्षितचेष्टितैः ।
अनुभूतचरीं मन्ये वेषस्तु विषमस्तव ॥ ३५ ॥

अनसूया—अहमपि दृष्टपूर्वमिव भवन्तं भावयामि तिष्ठत्वयं विमर्शः परमहंसपरिव्राजकैरपि महानुभावैर्वृत्तवृत्तेति क्रियासमभिहारेण वन्दितपादां महाभागां मामप्रणम्य दीपदण्डवत्तिष्ठतः पाण्डरपटस्य ते प्रायश्चित्तं ब्राह्मणेन विधापयितुं तव च शुद्धिमापादयितुमिच्छामि ।

दर्पः (स्वगत) परिगृहीतान्त्याश्रमा प्रगल्भमिव किं प्रजल्पति (प्रकाशं) सविचिकित्सं यस्तुर्हि असौ आश्रमस्वामी प्रष्टव्यः इत्युभावुपसर्पतः ।

दम्भः—उभौ दृष्ट्वा मौनव्रतमभिनीय पत्नीं चेष्टया चोदयति ।

* कुहना—ससंभ्रममुपसृत्य भद्द ब्रह्मणा भअवइ सण्णासिणि तुह्मेहिं अह्मघरवइसआसादो दूरे ठाअव्वं दीहमग्गागमणदूसिआणं तुह्माणं अकिदमज्जणाणं अच्चासत्ती दूरपरिहरणिज्जा

* भद्र ब्राह्मण भगवति सन्यासिनि युवाभ्यामस्मद्गृहपतिसकाशाद् दूरे स्यातव्यं दीर्घमार्गागमनदूषितयोर्युवयोरकृतमज्जनयोरत्यासत्तिर्दूरपरिहरणीया

भवतीमिति—॥ सन्निवेशेन संहननेन भावाः विलासाः वीक्षितानि दृग्विलासाः चेष्टितानि यातायातानि तैः अनुभूतचरीं अनुभूतपूर्वां भूतार्थे चरट् प्रत्ययः वेषस्तु इदानींतनवेषस्तु विषमः पूर्वस्माद्विषमः ॥ ३५ ॥

परमहंसपरिव्राजकैः परमहंसाश्चते परिव्राजकाश्च तैः वृत्तेन वृत्तेति क्रियासमभिहारेण पौनःपुन्येन पाण्डरः पटो यस्य तस्य गृहस्थस्येत्यर्थः । ब्राह्मणेन वेदोक्तकर्मणा प्रायश्चित्तं विधापयितुं कारयितुं । परिगृहीतः अन्त्याश्रमो यया सा तथा ।

आश्रमस्य दीर्घमार्गे आगमनेन दूषितयोः स्पृष्टमलोरकृतमज्जनयोः अकृतस्नानयोः अत्यासत्तिः समीपागमनं । मन्त्रसिद्धेः मन्त्रफलसिद्धेः परिपन्थिनी ।

मन्तसिद्धिपरिपंथिणी अ तुह्माणं छाआ महाजोइविग्गहे मा होदु एवं क्खु महप्पाणोवि मुणिजणा दूरे पणमन्ति तेहिं वि उवणीअं भाईरहीसलिलं ण काहेवि घरसामी हत्थेण घेप्पइ ।

दर्पः—अतिमहानयमपूर्वदंपत्योर्युवयोर्धर्मनियमः अपि च वयमाप्लुता गङ्गायमुनासङ्गमे पुण्यतमैश्च मन्त्रैः पुनः पुनः प्रोक्षिताः आदित्यवत्तेजस्विनां स्वयंप्रकाशविग्रहाणामस्माकं किं त्वया च्छायोपलभ्यते लभ्यते तु परं निरयपातः अहह सर्वलोकसम्भावितं सर्वाधिकं मामतिथिमिमां च परमहंसपरिव्राजिकामन्योन्यतनूनन्तत्वभावसंशयनिर्मोचनाय समधिगतावनादृत्य नूनमसौ ते पतिराश्रमापस्मारो मौनव्याजेन स्वमौढ्यमेव प्रच्छादयति ।

दम्भः—सभ्रूक्षेपं हुंकरोति ।

*कुहना—सरभसमुपसृत्य करतलेन मुखं पिधाय महप्पहाव धम्मद्धअ वाहुणिअमं जोग्गेण कम्मणा मोत्तूण जोग्गाणं अदिहीणं जोग्गं पडिवअणं दाअव्वं ।

मन्त्रसिद्धिपरिपन्थिनी च युवयोश्छाया महायोगिविग्रहे मा भूत् एवं खलु महात्मानोऽपि मुनिजना दूरे प्रणमन्ति तैरप्युपनीतं भागीरथीसलिलं नकदापि गृहस्वामी हस्तेन गृह्णाति ।

* महाप्रभाव धर्मध्वज बाहुयमं योग्येन कर्मणा मुक्त्वा योग्ययोरतिथ्योर्योग्यं प्रतिवचनं दातव्यं ।

अपूर्वदंपत्योः अदृष्टपूर्वदंपत्योः अकारपूर्वदंपत्योरिति च । संगमे संभेदे । स्वयंप्रकाशः अनन्याधीनप्रकाशः येषां तेषां उपलभ्यते किं नोपलभ्यत एवेत्यर्थः । निरये नरके पातः पतनं तु लभ्यते । अहहेत्याश्चर्ये । सर्वैः लोकैः लोकस्थजनैः संभावितं पूजितं सर्वेभ्य अधिकमन्योन्यं तनूनन्तत्वभावे संशयप्रशमाय । आश्रमापस्मारः—

आश्रमस्य अपस्मार इव वैकल्यहेतुः ।

करतलेन मुखपिधानं प्रणयकार्यं ।

प्राणसंयमनं प्राणायामं ।

असंभाष्यैः संभाषणं ।

डम्भः—प्राणसंयमनमभिनीय सहासमुद्घाट्य ।

(स्वगतं)—अकामोपनतमिदमसंभाव्यसंभाषणं—(प्रकाशं) रेरे व्रात्य-
ब्राह्मण मूढजनमूर्धाभिषिक्त स्वमौढ्यप्रच्छादकं मां प्रख्यापयसि
दिष्ट्या खलु मया तपस्संक्षयभीरुणा नैतावन्तं कालं शप्यसे शप्ताः
खलु मया कति कति भस्मसात्समपद्यन्त—अविदितपूर्व दुरा-
चार दूरं गच्छ गच्छ मा ते भून्मम दृष्टितेजसा भस्मीभावः ।

दर्पः—सक्रोधं रेरे मूढ द्विजातिरिति जातिबहुमानादत्र मया पादेन
शिरसि न ताड्यसे अपि च ।

तुण्डीरं मण्डलं मे कुलपतिरपि च स्कन्दभूपालवन्द्यः
क्षेत्रं सत्यव्रताख्यं क्षितितलतिलकं क्षुद्रकाञ्च्यग्रहारः ।
प्रख्यातः शिष्यभूम्ना दिशिदिशि भवता कूपकूर्मोपमेन
ख्याता वादाहवेषु स्थविर कथमहं न श्रुतो नापि दृष्टः ॥३६॥

(विहस्य)—अहो महादाम्भिक अविदितमदीयाचार किमिति दुराचार
इत्युपक्रोशसि, अथवा कः खल्वयं मया विना मत्प्रभावज्ञः
यस्य मे महायोगिनोऽपि अभिजनविद्यावृत्तेषु षोडशीमपि

व्रात्यः कर्मत्यागी । मूढजनानां मूर्धाभिषिक्त अधिपते दिष्ट्यादिवात् । तपस्सं-
क्षयात् भीरुणा एतावन्तं कालं न शप्यसे शप्तो न भवसि । अविदितपूर्व अज्ञातपूर्व
दुष्ट आचारो यस्य स दुराचारः ते भस्मीभावो मा भूत् ।

जातिं ब्राह्मण्यं ।

स्वोत्कर्षमाह अपिचेति—॥

तुण्डीरमिति—॥ मे मण्डलं तुण्डीरं कुलपतिस्स्कन्दभूपालवन्द्यः । स्कन्द-
भूपालेन वन्द्यः । क्षितेः तिलकनिभं सत्यव्रताख्यं क्षेत्रं अग्रहारः क्षुद्रकाञ्ची दिशि
दिशि शिष्यभूम्ना शिष्याणां बहुत्वेन प्रख्यातः । वादाहवेषु ख्याता अहं कूपकूर्मोप-
मेन भवता कथं न श्रुतः न दृष्टश्च । कूप एव वर्तमानः कूर्म इव क्वचित्स्थितः त्वं
अत एव मां न श्रुतवान् न दृष्टवांश्चेति भावः ॥ ३६ ॥

अविदितः मदीय आचारः येन स तथा तस्य संबुद्धिः दुराचार इत्युपक्रोशसि
मामिति शेषः । महायोगिनोऽपि यतो मम षोडशीं कलां नार्हन्ति अतएव

कलाचार्हन्ति किमुत पृथग्जनाः अत एव हि श्रोत्रियानपि त्रिवर्षपूर्वांश्च नमस्करोमि किञ्च वेत्थ मामकं धर्मप्रवर्तनाभिसन्धिम् ।

रथ्यावादविशङ्क्यमानजरठासम्बन्धिसम्भाषणात्
त्यक्ता हन्त पतिव्रता गुणनिधिस्सत्रासमम्बा मया ।
विद्यातश्च विवाहतश्च विदितादाचारतश्च क्षितौ
कूटस्थाभ्यधिकस्य मे किमधिकः को वा समः कथ्यते ॥३७॥

दम्भः—अरे ब्रह्मबन्धो दुर्विनीत दुराग्रह यद्येवं त्वमास्थितसमाचारः किञ्च परिव्राजिकाम्मामपि पितरमिव सर्वलोकाभ्यर्चितं विदित सकलवेदितव्यैर्महात्मभिरप्यविदितवैभवं त्रिवर्षपूर्वं श्रोत्रियं मां धर्मपत्नीं च मम पतिव्रतावृत्तिनियमेन प्रत्यवसितपरावरतत्त्वैरपि पितामहादिभिः क्रियासमभिहारेण कृतनमस्कारां किन्नाभिवादयसि ।

दर्पः—हे धर्मध्वज आत्मश्लाघापातकिन् अद्य खलु पूज्यपूजाव्यतिक्रमेण कतमां योनिं प्रतिपत्स्यसे श्वयोनिं वा चण्डालयोनिं वा अहमपि

"त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति" इतिस्मृतौ सत्यामपि तांश्च नमस्करोमि । धर्मप्रवर्तने अभिसन्धिं किं न वेत्थ जगति प्रसिद्धमपि किं न जानासीत्यर्थः ।

रथ्येति—॥ रथ्यायां वादेन भाषणेन विशङ्क्यमानायाः इयं रथ्यायामुच्चैर्वदति स्वैरिणी किमिति जनैः शङ्क्यमानायाः जरठायाः संबन्धिभिः संभाषणात् हेतोः मया पतिव्रता गुणानां निधिरप्यंबा माता सत्रासं जरठासंबन्धिभिरियं संभाषणं कृतवती किल तत्सम्बन्धिसम्बन्धात् अस्या मातृत्वप्रयुक्तनमस्कारादिकमप्यनर्हमिति त्रासेन सहितं यथा भवति तथा त्यक्ता विदितात् सर्वलोकप्रसिद्धात् आचारतश्च कूटस्थाभ्यधिकश्च मे को वा समः सम इति कथ्यते विद्यादिभिः कूटस्थादप्यधिकस्य मम कोवान्यः साम्यं लभेत साम्यस्याप्यभावे आधिक्यस्य का कथेत्याशयः ॥३७॥

ब्रह्मबन्धुः ब्राह्मणापशदः । आस्थितस्समाचारो येन स तथा विदितानिसकलानि वेदितव्यानि यैस्तैः । महात्मभिरप्यविदितं आनन्त्यादपरिच्छिन्नं वैभवं यस्य तं वृत्तेषु नियमेन प्रत्यवसितानि परावरतत्त्वानि यैस्तैः । क्रियासमभिहारेण पौनःपुन्येन ।

सर्वलोकसञ्चारी त्वदभ्यर्चकं क्वापि कमपि न पश्यामि (सोच्चै-हासं) भो जड वञ्चक ।

प्रजानां पतयो दृष्टाः पशूनां बृहतामपि ।
न च त्वमधिकस्तेभ्यो न चास्मान्बहुमन्यसे॥ १८॥

नूनं मदधिकजनपरिवादेन सहसैव निरयङ्गमिष्यसि ।

*कुहना *भअवइ एसो दुब्बम्हणो महेसिपरिवादेण विणासं पडिवज्जइ।

असूया—अयि धार्मिकपत्नि दुर्ब्राह्मणीव किमिति नामाभ्यागतमतिथिमधिक्षिपसि किन्तु अन्योन्यपरिवादिनावेतौ महानुभावौ तपामावाभ्यां सन्तव्यौ ।

दम्भः—सक्रोधं रेरे चाचाटवायस सारमेय इव वृथापर्यटनशीलोऽसि तथाहि ।

जातिमात्रशरणा बहिष्कृताः
केचिदाहृतजघन्यवृत्तयः ।

---

* (छाया) भगवति एष दुर्ब्राह्मणो महर्षिपरिवादेन विनाशं प्रतिपद्यते ।

आत्मश्लाघया स्वप्रशंसया पातकिन पूज्येषु पूजाव्यतिक्रमेण कपूयां कुत्सितां योनिं जातिं । कोऽसावित्यत आह श्वेति—॥ तद्य इह कपूय चरणाः कपूयां योनिमापद्यन्ते । श्वयोनिं सूकरयोनिं चण्डालयोनिं वा इति श्रुतिरनुसन्धेया । सर्वलोकसंचारीत्येतद्विशेषणं साभिप्रायं तस्योच्चारणेन उच्चैर्हासः ।

जड वञ्चकेति प्रत्येकं संबोधनं ।

प्रजानामिति—॥ प्रजानां पशूनां बृहतामपि पतयः बृहतां पतयः बृहस्पतयः त्वं तेभ्यो नाधिकः यथाप्यस्मान बहुमन्यसे ॥ १८ ॥

अधिकः उत्तमः ।

भगवति सन्यासिनि । एष दुर्ब्राह्मणो महर्षिपरिवादेन विनाशं प्रतिपद्यते ।

चाचाटः बहुगर्ह्यवचनः स चासौ वायसश्च तस्य संबुद्धिः । सारमेयः श्वा यथा इतस्ततो वृथा पर्यटति । सारमेय इति तत्साम्यमुक्तं । तदेव विवृणोति—।

जातीति—॥ जातिमात्रं ब्राह्मणत्वादिमात्रमेव शरणं रक्षकं येषां ते तथा मात्रचातज्जात्युक्ताचारे वैधुर्यं द्योत्यते स्वपक्षे जातिशब्देन हीनवस्तुभूयिष्ठगणकुल

रोषणा विपरिधाविनो मुधा
क्षेपयन्ति जनमुज्झितह्रियः ॥ ३९ ॥

दर्पः—(सहस्तास्फालनं, विहस्य) यथावस्थितवादिने मह्यं मर्कट इव किमिति कुप्यसि ।

दम्भः—रेरे स्तम्भ इव वृथास्थूलस्त्वं विश्ववृत्तान्तं न जानासि ।

मयि चरति कदाचित्सत्यलोकोपकण्ठे
सपदि सनकमुख्यैस्साकमभ्युज्जिहानः ।
सविनयविधूताङ्गस्सत्रपः क्षालितेन
स्वयमुदवहदर्घ्यं पाणिना पद्मयोनिः ॥ ४० ॥

कति कतीह पुरातनतापसाः
कमलसंभववंशसमुद्भवाः ।

पादप्रक्षालनाद्युचितस्थलं गृह्यते । तन्मात्रशरणाः तदेकनिलयाः बहिष्कृताः सद्भिः परित्यक्ताः अन्यत्र सर्वजनैरपि काष्ठलोष्टादिभिः दूरोत्सारिताः आदृता जघन्या वृत्तिर्व्यापारो यैस्ते तथा अन्यत्र आदृता जघन्यैः वस्तुभिः पुरीषादिभिः वृत्तिः वर्तनं जीवनं यैस्ते तथा रोषणाः अल्पेपि निमित्ते रोषवन्तः मुहुः विपरिधाविनः इतस्ततो धावन्तः उभयत्र समानमेतद्विशेषणद्वयं उज्झितह्रियः त्यक्तलज्जाः इवमपि तथा एवं भूताः केचिज्जनं जनिमद्वस्तुमात्रं क्षेपयन्ति दीनयन्ति एतदवलोकनमपि जनानां दीनाहेतुरिति भावः ॥ ३९ ॥

यथावस्थितं अर्थास्थितमनतिक्रम्य । स्तम्भ इव वृथास्थूलः यथा स्तम्भः स्थूलोपि न किञ्चिज्जानाति तथा त्वमपि विश्वस्यापि वृत्तान्तं न जानासि ।

कोऽसौ वृत्तान्त इत्यत आह—।

मयीति—॥ कदाचित् सत्यलोकोपकण्ठे मयि चरति सति पद्मयोनिः सनकः मुख्यः येषां तैः मुनिभिस्साकं सपदि अभ्युज्जिहानः अभ्युत्थितस्सन् सविनयं विनयेन सहितं यथा भवति तथा विधुतानि अंगानि येन स तथा सत्रपः सप्रकम्पः क्षालितेन पाणिना स्वयमेव अर्घ्यमुदवहत् ॥ ४० ॥

अन्यदप्याह—॥

कतिकतीति—॥ कमलसंभवस्य चतुर्मुखस्य वंशे समुद्भवः उत्पत्तिर्येषां ते

अतितरन्ति महान्त्यपि पातका
न्यहह मामकपादजलाप्लुताः ॥ ४१ ॥

कुहना—*सच्चं एअं दिट्ठं मए वि सहधम्मआरिणीए ।

दर्पः (स्वगतं) नूनमयमार्यो डम्भः इयमपि कुहना नखल्वन्येषामीदृ-
शच्चारित्रं अतिवदनं वा संभवति तदेतावेवास्मद्बन्धुभू-
तावभ्युपगमयामि (प्रकाशं) भगवति विश्ववेदिनि युक्ति-
सिद्धमिह किमपि भगवत्यै निवेदयामि—

परधनहरणप्रवीणभावा
कुटिलमतिः कुहनैव सेयमार्या ।
पशुवधपरिशेषनामयज्ञ-
स्स्ववशजनस्स्वयमेष डम्भ एषः ॥ ४२ ॥

तत्कथमेतत्सकाशाद्धर्मसंकटंमोक्ष्यावः ।

असूया—अहमप्येवं संभावयामि ।

---

* सत्यमेतद्दृष्टं मयापि सहधर्मचारिण्या ।

तथा पुरातनतापसाः मामकपादजलाप्लुताः कतिकति वत महान्त्यपि पातका-
न्यतितरन्ति अहहेति हर्षे ॥ ४१ ॥

आर्यः श्रेष्ठः अतिवदनं अत्युक्तिः ॥

युक्तिसिद्धं युक्तिभिस्सिद्धं किमपि तत्किमित्यत आह—॥

परेति—॥ परेषां धनस्य हरणे प्रवीणः समर्थः भावो अभिप्रायो यस्यास्सा
तथा पशूनां वधः मारणं परिशेषः नामयज्ञः नाममात्रेण यज्ञः नतु तद्युक्तक्रियाभिः
यद्वा नामनिमित्तभूतो यज्ञः वाजपेययाजी अतिरात्रयाजीत्यादिनाम्नां हेतुभूतयज्ञो
यस्य स तथा स्ववशः स्वाधीनः जनोयस्य स तथा ॥ ४२ ॥

धर्मसंकटं धर्मसंशयं ।

डम्भः—(सान्तर्हासं) युवामप्यहं युक्तितः स्थापयामि—

ध्रुवमत्र गुणोत्तरापवादी
ध्वनिसारस्स्वयमागतोऽसि दर्प ।
परिकल्पितवीतरागवेषा
तव भार्यैव भवेदसावसूया ॥ ४३ ॥

(नेपथ्ये) गृहपतिरतिथिश्चसत्यवादिनावेतौ गौडलाटधार्मिकौ ।

सर्वे सपत्यभिज्ञं परस्परमवलोक्य सन्तोषमभिनयन्ति ।

डम्भः—(सानन्दं) सखे दर्प अभिव्यञ्जिता वयमशरीरिण्या भारत्या ।

दर्पः—अवितथवादिनी खल्वेषा तद्दार्येणापराधो मामकः क्षन्तव्यः ।

डम्भः—मयापि खल्वपराद्धं ।

डम्भदर्पौ—अन्योन्यमञ्जलिं बध्नीतः निबध्नीतश्च—प्रियवचनं असूयाकुहने गाढं मिथ आश्लिष्यतः

डम्भदर्पौ—यथामनोरथमिह वयं यदृच्छया दैव्या समागताः अभिगन्तव्यस्त्वनन्तरं समये महाराजः ।

ततः प्रविशति महामोहो दुर्मतिश्च ।

युक्तिस्थापनं कथमित्यत आह—॥

ध्रुवमिति—॥ गुणैः विद्यावृत्तादिभिः उत्तरेषु श्रेष्ठेषु अपवदितुं दूषयितुं शीलमस्यास्तीति अपवादी ध्वनिः कण्ठध्वनिः सारः बलं यस्य स तथा परिकल्पितः वीतरागाणां परिव्राजकानां वेषो यया सा तथोक्ता ॥ ४३ ॥

गृहपतिः डंभः अतिथिः दर्पः गौडदेशे डंभप्राचुर्यं लाटदेशे दर्पप्राचुर्यं चेत्यवगन्तव्यं । गृहपतिरित्यादिका अशरीरिणो भारती ।

एषा पूर्वोक्ता । आर्येण ज्येष्ठेन ।

महाराजः महामोहः ।

तत एवमेताभ्यां सूचनानन्तरं दुर्मत्या सह महामोहः प्रविशति ।

नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि वेति लक्षणात् ।

महामोहः (विचिन्त्य) प्रिये महासाहसिकस्य कुलघ्नस्य विवेकस्य विध्वंसने कृतप्रतिज्ञेन मया समाधिसाकाङ्क्षपुरुषसंक्षोभणाय प्रेषितास्सिंहवनगुप्तिन्यायेन परस्पराभिरक्षिताश्च कामक्रोधादयः कालोपपन्नकातर्यकलुषितास्सैकतसेतव इव भग्नव्यूहाः प्रतिनिवृत्य कथमप्यस्मन्मुखमवलोकयितुमक्षमाः प्रतिदिशं प्रस्थाय प्रायोपवेशमास्थिता इत्युपश्रुतमस्माभिः तदिह भवत्या तत्प्रेयसी रतिजिघांसातृष्णास्तत्सकाशङ्गमयित्वा मामकास्ते मन्त्रिणस्समाश्वासयितव्याः ।

दुर्मतिः—* अ·अउत्त एव्वं एव्व ताओ ताणं समीवं गमिआओ ।

महामोहः—साधु प्रिये साधु यदस्मद्वल्लभोचितमनुष्ठितं भवत्या प्रत्याश्वस्तास्ते समरसमये समाहूतव्याः ।

दुर्मतिः—† एव्व एव्व ।

महामोहः—(विषादातिशयं नाटयन्) प्रिये अद्ययावदप्रतिहतकीर्तिरपत्रपेहमसदृशेन क्षुद्रात्मना विवेकेन सह विवादस्संवृत्त इति यथा त्वं नारीषु निस्समाभ्यधिका तथाहं पुरुषेषु । यतः ।

---

* आर्यपुत्र एवमेव तास्तेषां समीपं गमिताः ।

† एवमेव ।

कृतप्रतिज्ञेन तेन । समाधौ साकाङ्क्षस्य पुरुषस्य संक्षोभणाय । सिंहवनगुप्तिन्यायेन सिंहाक्रान्तं वनं दुराधर्षं भवति वनस्य गाढतया सिंहोऽपि दुराक्रमः एवं सिंहवनयोः परस्परं गुप्तिः सिंहवनगुप्तिः तस्याः न्यायेन । काले तस्मिन् काले उपपन्नं कातर्यं भयं तेन कलुषिताः सैकताः सिकतानिर्मिताः सेतव इव प्रायोपवेशं आमरणमनुत्थानं उपश्रुतमाकर्णितं । तत्प्रेयसीः तेषां कामक्रोधलोभानां प्रेयसीः रतिजिघांसातृष्णाः तेषां कामादीनां सकाशं गमयित्वा ।

अद्ययावत् एतावन्तं कालं इत्यर्थः अप्रतिहता कीर्तिर्यस्य स तथा । असदृशेन विवादो लज्जाहेतुः विवादश्च विवाहश्च समयोरेव शोभत इत्युक्तेः ।

कथमसदृशत्वं इत्यत आह यतेति—। निस्समाभ्यधिकत्वे हेतुमाह—॥

सुरदनुजगणास्स्वमूर्ध्नि नित्यं
निदधति शासनपत्रिकां मदीयां ।
प्रतिफलितलिपिप्रकारदीप्य
न्मणिमकुटांशुमषीरसानुलिप्ताम् ॥ ४४ ॥

अपि च ।

वर्गः स्वर्गसदां मया नियमितः क्षोणीभृतः किं पुनः
पद्माम्भोनिधिपर्वतेषु निहितास्तिस्रो मया मूर्त्तयः ।
विश्वं स्रष्टुमकर्तुमन्यथयितुं मद्भूरमोघक्रमा
सोऽहं कस्य वशे क एष न च मे किं कस्य वा कथ्यते॥४५॥

(स्वगतं) किं तावदद्यकेनापि हेतुना प्रदीप्यमाने विवेके प्रतिविधातव्यं अस्तु नन्वहं महामोहः (प्रकाशं) प्रिये यद्यपि च सर्वत्र मया प्रवर्त्तितास्समयभेदाः कैश्चिदौपनिषदापशदै रहस्करकिरणा इव घनैः किञ्चिदन्तर्धापिताः यद्यपि च कामादयश्चिकीर्षितवैकल्यजनितवैलक्ष्यवशाद्दनालक्ष्याग-

सुरेति—॥ सुराणां दनुजानां च गणाः प्रतिफलितानां लिपीनां प्रकारेण दीप्यद्भिः मणिभिः इन्द्रनीलैः कृतस्य मकुटस्य अंशुरेव मषीरसः तेनानुलिप्तां मदीयां शासनपत्रिकां आज्ञापत्रिकां मूर्ध्नि निदधति ॥ ४४ ॥

अन्यदप्याह—।

वर्गेति—॥ स्वर्गसदां देवानां वर्गः मयानियमितः एवं सति क्षोणीभृतः राजानः नियमिता इत्यत्र किं पुनर्वक्तव्यं तिस्रो मूर्त्तयः ब्रह्मविष्णुरुद्राः पद्मांभोनिधिपर्वतेषु कुशेशयदुग्धाब्धिकैलासेषु निहिताः विश्वं जगत् स्रष्टुं अकर्तुं पालयितुं अन्यथयितुं अन्यथा कर्तुं संहर्तुमित्यर्थः मद्भूः अमोघः फलवान् क्रमस्स्वभावो यस्यास्सा तथा सोऽहं कस्यपुरुषस्यवशे न कस्यापि मे वशे न कः सर्वोपि कस्य पुरुषस्य किंकथ्यते । मद्विभवस्य सर्वलोकाविदितत्वात् न किंचदपि कस्यचिद्वक्तव्य मिति भावः ॥ ४५ ॥

किं प्रतिविधातव्यमिति विचारः अस्तु । नन्वहमिति समाधानं । मयाऽर्वत्र प्रतिष्ठिताः समयभेदाः कैश्चिदन्तर्धापिताः तिरोहिताः यद्यपि तिरोहिता एव चिकीर्षितस्य वैकल्येन जनितं वैलक्ष्यं येषां ते तथा विपर्यस्य व्यत्ययेन कृत्वा ।

त्थमानते तथापि भेदमभेदञ्चवस्तूनां पूर्वपक्षसिद्धान्तौ च सर्वत्र विपर्यस्य विश्वं व्यामोहयामि अथवा पुनरहम-हङ्कारादिसंमतमपरमप्रमाणप्रधानमलौकिकार्थकल्पनादु-र्व्यसनहीनमर्थकाममात्रपुरुषार्थं सूक्ष्ममवितथं सिद्धान्तं गम्भीरयुक्तिभिरुत्तम्भयन् वृथोत्साहमेव जडमतिं विवेकं विधित्सामि ।

अहह ।

पृथिव्यापस्तेजः पवन इति तत्वानि मिलितै-
रमीभिश्चैतन्यं भवति मदशक्त्यादिवदतः ।
किमात्मा दृष्टोऽन्यः किमुत वपुषि ध्वंसिनि सुखं
तदेतद्वागीशस्समतनुत लोकायतमतम् ॥ ४६ ॥

उपनिषदपि खलु बलवदभिमतसमयबलीयस्त्वमभिसन्धाय व्यव-स्थापयति "असुराणां ह्येषोपनिष"दिति तदिह त्रय्यन्त-

---

स्थूलोऽहं कृशोऽहमित्यनुभवो अहंकारः आदिशब्देन ममेदं गृहक्षेत्रादिकमित्येवं रूप-ममकारो गृह्यते तत् संमतमपरमं आदिमं प्रत्यक्षं प्रमाणं प्रधानं यस्मिन् तं अलौकि-कानामर्थानां कल्पना सृष्टिरेव दुर्व्यसनं वृथायासः तेनहीनमर्थकामावेवपुरुषार्थौ यस्मिन् सः अर्थकाममात्रपुरुषार्थः तत्वेन सूक्ष्ममवितथं शास्त्रं सिद्धान्तं उद्भावयन्-वृथोत्साहं व्यर्थोत्साहं विधित्सामि विधातुमिच्छामि ।

प्रकृतमेव सिद्धान्तं सूचितः समुत्तंभयन् वक्तृविशेषादप्यस्य प्राबल्यं दर्शयति अहहेति—॥ हर्षद्योतकमिदं ।

पृथिवीति—॥ पृथिव्यादीनि चत्वार्येव तत्वानि मिलितैः युक्तैः मदशक्त्या-दिवदतः केषांचिद्वस्तूनां संमेलने मदजननसमर्था शक्तिरुत्पद्यते तद्वदेतेषामपि मिलितानां चैतन्यंजनितमस्ति अतः एतस्माच्चैतन्यात् अन्य आत्मा दृष्टः किं न दृश्यत एव एतद्वियोगे चैतन्यमपि नश्यति एतत् समुदायरूपे वपुषि ध्वंसिनि नष्टे सति किमुत सुखं न किंचिदपि सुखमस्ति अतः युक्तियुक्तोयं सिद्धान्तः वागीशः बृहस्पतिः तदेतत्लोकायतमतं समतनुत ॥ ४६ ॥

एतन्मतस्य प्राबल्ये उपनिषदपि प्रमाणमित्याह उपनिषदपीति—॥

बलवतामसुराणामभिमतस्य समयस्य बलीयस्त्वमभिसन्धायस्मृत्वा व्यवस्थाप-यति केयमुपनिषदित्यत आह असुराणामिति—। उपनिषत्सां प्रामाण्यं वेदान्त-

बौद्धैरुपनिषत्प्रामाण्यसमर्थनमपि अस्माकमरातिक-
रलिखितविजयपत्रायते ।

अपि च ।

स्वमतविपरीतमन्यैः
क्रोशति हृदये विधीयते स्वैरं ।
अमरगुरुशिक्षितार्थै-
रस्मत्सार्थैर्यथाहृदयम् ॥ ४७ ॥

दुर्मतिः-*अज्जउत्त पच्चक्खमत्तप्पमाणो बुहप्फइसिद्धन्तो बहुप्पमाणसाहि
अपरोक्खविसआणं बहूणं इअरसिद्धंताणं पुरओ कहं ठाइ ।

महामोहः—प्रिये नूनं स्वमतप्राबल्यबुभुत्सया परिपृच्छसि तदेत-
दाकर्ण्यताम् ।

परमनुगुणयन्तः पण्डितंमन्यवर्गा-
न्वितथमिव जल्पन्त्यागमाः किञ्चिदेते ।
विबुधगुरुमतेऽस्मिन् व्यक्तमुत्तभ्यमाने
मुषितनिखिलसारा मौनमुद्रां भजन्ते ॥ ४८ ॥

* आर्यपुत्र प्रत्यक्षमात्रप्रमाणो बृहस्पतिसिद्धान्तः बहुप्रमाणसाधितपरोक्षवि-
षयाणां बहूनामितरसिद्धान्तानां पुरतः कथं तिष्ठेत् ।

बौद्धैरङ्गीकृतं तदस्माकमत्यन्तमनुकूल मित्याह तदिहेति—। तदस्या उपनिष-
त्वादिश्च जगति अरातिकरलिखितविजयपत्रायते शत्रुकरलिखितविजयपत्रं भवति ।
मतान्तराणां स्वानुभवविरोधं लोकायतिकस्य तदभावं दर्शयति—।

स्वमतेति—॥ अन्यैः मतप्रवर्त्तकैः हृदये क्रोशति एवं नेति प्रलपति स्वैरं यथेच्छया
स्वमतविपरीतं स्वानुभवविपरीतं विधीयते क्रियते अमरगुरुणा शिक्षितार्थैः
निर्णीततत्त्वैः अस्मत्सार्थैः आस्माकैः यथाहृदयं यथानुभवं विधीयते ॥ ४७ ॥

स्वमतप्राबल्यस्य बुभुत्सया न त्वेतत् दौर्बल्यशंकया किन्त्वदित्यत आह—॥

परमिति—॥ एते आगमाः पण्डितंमन्यानां आत्मनः पण्डितत्वेन मन्य-
मानानां वर्गान्समूहान् परमनुगुणयन्तः अनुकूलान्कुर्वन्तः किंचिदवितथं जल्पन्ति
अस्मिन् विबुधगुरुमते व्यक्तमुत्तभ्यमाने प्रकाश्यमाने सति मुषिताः प्रतिक्षिप्ताः
निखिलास्साराः युक्तयो येषां ते तथा मौनमुद्रां भजन्ते ॥ ४८ ॥

न खलु सहस्रमपि प्रतिसूर्याः कदाचिदपि सूर्यमभिभवन्ति ।

दुर्मतिः—* अ॰ अउत्त पबलअमे दुमस्सिं पुरंदरपुरोहिदमए का मुत्ती को वा भोओ का वा देवआ ।

महामोहः—श्रूयतान्तावदवहितया ।

शरीरप्रलयो मुक्तिर्भोगस्तु रतिरुत्तमा ।
देवतास्तत्प्रदायिन्यस्त्रियस्तारुण्यभूषणाः ॥ ४९ ॥

एवञ्च देवि । परमार्थदर्शिन्यास्तवप्रत्यक्षत एवैते परिप्रश्नाः प्रत्युक्ताः अपिचास्माकं विवेकरूपवैरिविजयेएतासामेव प्रत्यक्षदेवतानां प्रसादः प्रधानकारणं

दुर्मतिः—† होदुणाम पसादो इत्थिआणं सल्लावजोग्गाणं सचेअणाणं देवआणं तेण कहं विवेओ विजेदुं तिरइ ।

महामोहः—इत्थंनाम ।

अपिलपसिरतानाप्यधीतागमाना
मपियमनियमाद्यैरन्वहं शिक्षितानां ।

---

* आर्यपुत्र प्रबलतमेऽस्मिन्पुरन्दरपुरोहितमते कामुक्तिः कोवाभोगः कावादेवता

† भवतु नाम प्रसादः स्त्रीणां सल्लापयोग्यानां सचेतनानां देवतानां तेन कथं विवेको विजेतुं तीर्यते ।

वक्तूनामित्युक्तं अत्र उत्तरमाह—॥

शरीरेति—॥ शरीरस्य प्रकृष्टो लयः प्रलयः विनाशः तारुण्यं यौवनं भूषणं यासां ताः तथा ॥ ४६ ॥

एवं ते परिप्रश्नाः प्रत्युक्ताः विवेकरूपस्य वैरिणो विजये भवतु नाम प्रसादः स्त्रीणां सल्लापयोग्यानां सचेतनानां अनेन प्रतिमारूपाभ्यो देवताभ्यो वैलक्षण्यं तेन कथं विवेको विजेतुं तीर्यते शक्यते अत्रोत्तरमाह—॥

अपीति—॥ अधीताः आगमाः यैस्तेषां यमनियमाद्यैः आद्यशब्देन आसनादयो गृह्यन्ते अत्र ।

ब्रह्मचर्यमहिंसाच सत्यास्थेयापरिग्रहाः ।
योवेत्तिनिष्कामो योग्यतां समनोनयत् ॥

शिथिलयति समाधिं शिल्पिहस्तानपेक्षं
वरतनुमयचित्रं वासनाभित्तिलग्नम् ॥ ५० ॥

पठन्ति चौपनिषदाः परिहृतविषयानुरागतया परमपुरुषमुपसद्य-
स्यापि जक्षणादिकमक्षीणविभूतिशालिनीभिरुपभोगञ्चेति
महदिदं सारस्यं नखलु वृश्चिकभयात्पलायमानैराशीविष
मुखे निपतितव्य ।

अपि च ।

तमिस्राशीतांशुस्तबकवियदावर्तघटितैः
प्रक्लृप्तानां रम्भामणिमुकुरतूणीरनलिनैः ।
स्मरन्तः केधैर्यं दधति युवतीनामभिमुखं
स्मरस्कन्धावार प्रचलितपताका प्रतिमुखां ॥५१॥

अहह, अनादि शुद्धतया संमतानां वैकुण्ठवैमानिकानां वैनते-
यादीनामाज्ञानसिद्धाः कतिकति विलासिन्यश्रूयन्ते, श्रूयतेकिलसकल-

---

स्वाध्यायशौचसन्तोषतपांसिनियतात्मवान् ।
कुर्वीत ब्रह्मणितथा परस्मिन्प्रवणं मनः ॥
एतेयमास्सनियमाः पञ्च पञ्चचकीर्तिताः ।
विशिष्टफलदाः काम्यानिष्कामानां विमुक्तिदाः ॥

इत्यादिकमनुसंधेयं । शिल्पिहस्ते यस्यापेक्षानास्तितत् शिल्पिहस्तानपेक्षं वासनैवभित्तिः तस्यां लग्नं वरतनुमयचित्रं समाधिं शिथिलयति ॥ ५० ॥

औपनिषदाः उपनिषत्संबन्धिनः वाक्यविशेषाः परिहृतः विषयानुरागः विषयेषु शब्दादिष्वनुरागः तस्यभावस्तत्ता तथा । जक्षणादिकं जक्षणं भक्षणादिकं आदिशब्देन क्रीडादिकं गृह्यते अक्षीणविभूतिशालिभिः स्त्रीभिः उपभोगं च पठन्ति जक्षत्क्रीडन्रममाणस्त्रीभिर्वायानैर्वानोपजननं इत्यादयः इतीदं महदुपहास्यं । परित्यक्तविषयानुरागस्यमुक्तस्य पुनरपि विषयानुभवप्रतिपादन मपहास्यमिति भावः । हेयतयापरित्यक्तस्य विषयानुरागस्य पुनरपि सेवनं दृष्टान्तेन निवर्तयति न खलु—इति । पुनरपि विवेकविजये हेत्वन्तरमाह— ॥

तमिस्रेति—॥ तमिस्रातमः तमिस्रादिघटितैः रम्भामणिमुकुरतूणीरनलिनैः

संसारनिवर्तकस्सर्वेश्वरो लक्ष्मीभूमिनीलानायकः, तदिह कामपुरुषार्थप्रतिक्षेपकैः कापेयवृत्तिभिः प्रतिभटभवनदिधक्षानिक्षिप्तेन पावकेन स्वनगरमपि दन्दह्यते, यश्चासौ मोक्षप्रद इति मुमुक्षुभिरुद्घुष्यते, स च-।

सत्वप्रवर्तकस्सन्
सहप्रियाभिः पुराण पुरुषोपि ।
बहुमुखभुजङ्गसङ्गी
विहरति विविधासुराजधानीषु ॥ ५२ ॥

ततश्चार्वाकपक्ष प्रतिक्षेपो विद्यदम्पतिसमर्थनञ्चेति शतप्रदान प्रतिक्षेपिणो महाप्राज्ञस्य विंशतिपञ्चकप्रदानवचनवदपहास्यं किंच ।

मूढग्राह्यान्मोक्षधर्मप्रपञ्चान्
निर्मातृणान्निष्प्रमाद प्रयुक्तः ।

प्रक्लृप्तानां युवतीनां स्मरस्कन्धावारे मन्मथसेनायां प्रचलितायाः पताकायाः प्रतिभुवां समानानां युवतीनां स्मरन्तः कैधैर्यं दधति युवतीनां स्मरन्त इत्यत्र अधीगर्थदयेशां कर्मेति कर्मणि षष्टी ॥ ५१ ॥

अनादिशुद्धतया नित्यशुद्धतया संमतानां वैकुण्ठवैमानिकानां वैकुण्ठपुरदेवानां विष्वक्सेनवैनतेयादीनां एषां अनादिशुद्धत्वं देवत्वं च

यत्र पूर्वे साध्यास्सन्तिदेवाः इत्यादिभि श्रुतिभिस्सिद्धं । आज्ञानसिद्धाविलासिन्यः कद्रासुकीर्तिप्रमतयः सकलानां चेतनानां संसारनिवर्तकः तत् यस्मात् मुक्तनित्येश्वराणामपि कामपुरुषार्थप्रावण्यं दर्शितं तस्मात्कारणात् कापेया कपिसम्बन्धिनीवृत्तिर्व्यापारो येषां तैः प्रतिभटभवनस्य शत्रुगृहस्य दिधक्षयादग्धुमिच्छया निक्षिप्तेन निहितेन स्वनगरमपि दन्दह्यते स्वानर्थपर्यवसायीदमज्ञात्वा कारणात्कापेय वृत्तित्वं न केवलमिदं भगवतः परत्वादिषु अर्चावतारेष्वपिकामपुरुषार्थ प्रावण्यमस्तीत्याह यश्चासाविति ॥

सत्वेति-॥ सत्वस्य सत्वगुणस्य प्रवर्तकः परमपुरुषोपि महान् प्रियाभिस्सह बहुमुखं यथा भवति तथा भुजंगसङ्गी धूर्तसङ्गवान् बहुमुखः सहस्रवदनः भुजङ्गः शेषः तत्सङ्गीति च विहरति ॥ ५२ ॥

ततः कारणात् शतप्रदानप्रतिक्षेपिणः शतदानं प्रतिक्षिपतः विंशतिपञ्चक प्रदानमिव अपहास्यं । महाप्राज्ञस्य महतः अप्राज्ञस्येत्यर्थः ।

मूढेति-॥ मूढग्राह्यान् तद्ग्राह्याः मूढा एवेत्याशयः मोक्षधर्मप्रपञ्चान् मोक्ष-

भोगप्राप्त्यै कल्पतेभूरिभूम्नां
ब्रह्मादीनां ब्रह्मचर्यप्रयासः ॥ ५३ ॥

कर्णौ दत्वा, किं ब्रवीतिकश्चित् ।

दाम्पत्यं सहजं समस्तजगतां पित्रोस्तदिच्छावशा
त्कामिन्यादिविभागक्लृप्तिरपि तत्कैंकर्यसिद्ध्यैनृणां ।
इत्थं शेषमशेष मथतुभवत्सारस्य संवर्द्धकं
वैरस्यं विदधातिहन्तविदुषां वैरोचनं दर्शनम् ॥ ५४ ॥

(सक्रोधं) कः कोऽत्रभोः उत्सार्यतामसौ दृष्टिगोचराद्दैष्टिकदिवाभीत इत्यवज्ञां नाटयति ।

दुर्मतिः—अ-अ उत्तममक्किल णिहिलाओ कामिणीओदासीओ, ताहिं एव तुह विवेअ विअओत्तिसंपञ्जणबहुमाणह्मि (विचिन्त्य) पच्चक्खसिद्ध परमाणन्द जुवइ संभोअप्पहाणं तुहसिघंतमुअंतोकिंतिठिरप्पहाणेसुत्ते सुत्तेसुम एसुप उरा अराजणाहोन्ति ।

(छाया) आर्यपुत्र, ममकिल निखिलाः कामिन्योदास्यः, ताभिरेव तवविवेकविजय इति संपन्नबहुमानास्मि, (विचिन्त्य) प्रत्यक्षसिद्धपरमानन्दयुवतिसंभोगप्रधानं तवसिद्धान्तं मुञ्चन्तः किमिति स्थिरप्रधानेषुतेषुतेषु मतेषु प्रचुरादराजनाभवन्ति

धर्मप्रतिपादकप्रबन्धान् निर्मातृणां ब्रह्मादीनां नियमादप्रयुक्तः अप्रमादेन अनुष्ठितः ब्रह्मचर्यप्रयासः भोगप्राप्त्यै कल्पते समर्थोभवति ॥ ५३ ॥

एतन्मतमसहमानस्य कस्यचिद्वैदान्त्यवादिनोमत मनुवदति किंब्रवीति इति—॥

दाम्पत्यमिति—॥ समस्त जगतां पित्रोः पद्मापद्मनाभयोः दाम्पत्यं सहजं स्वाभाविकं ।

त्वंमाता सर्वलोकानां देवदेवो हरिः पिता ।

इत्यादि स्मृतेः तयोरिच्छावशात् कामिन्यादिविभागक्लृप्तिरपि तद्विषयकैंकर्यसिद्ध्यै भवति इत्थमुक्तेनप्रकारेण अशेषविभूतिद्वयमपितयोश्शेषभूतं अथ तु भवतः सारस्य सरसत्वस्य संवर्धकं वैरोचनं चार्वाकदर्शनं विदुषां वैरस्यं विदधाति ॥ ५४ ॥

दैष्टिकः आस्तिकः स एव दिवाभीतः घूकः । स्थिरं अर्चाविग्रहः प्रधानं प्रतिपाद्यं येषां तेषु समयेषु पाञ्चरात्रादिषु ।

महामोहः—प्रिये अविचारितप्रवृत्तोऽयमास्तिकवेतालानामन्धपरंपरान्यायः

अमरगुरुप्रणीतमनपायमपोह्य मतं
विविधकुतर्कजालकलहायितकौतुकिनः ।
कपिलहिरण्यगर्भकणभोजन बुद्धजिन
प्रमुखसमर्थितेषु समयेषु भजन्तिरतिम् ॥ ५५ ॥

अपि च

चरमितरदप्यशेषं चन्द्र-
कनयतस्स्वभावचित्र मिदं ।
किं वानिरूपणीयं कण्टकतै-
क्ष्ण्यादिकारणङ्कविभिः ॥ ५६ ॥

अविचारितः सदसद्विचाररहितः प्रवृत्तः आस्तिकाः अस्ति परलोकादिकमिति शास्त्रप्रामाण्यमभ्युपगच्छन्तः एव वेतालाः पिशाचाः तेषामन्धपरंपरान्यायः । कस्यचिदन्धस्य आदौ पीतश्शंख इति प्रतीतिर्जाता ततो अन्यः तस्मै अन्धाय तथा उपदिशति सोऽप्यन्यस्मै तथा सचान्यस्मै एवं इत्थंतेषामन्धानां पीतश्शंख इति बुद्धिरविशिष्टा भवति अयमेव अन्धपरंपरान्यायः ।

अमरेति—॥ अमराणां गुरुः वागीशः तेनप्रणीतमनपायं अपायरहितं मतमपोह्यविविधाश्चते कुतर्काश्च तेषां जालं तेन कलहायिते कलहवदाचरिते कौतुकिनः इच्छावन्तः कपिलस्सांख्यप्रवर्तकःहिरण्यगर्भः योगप्रवर्तकः कणभोजनः कणादः बुद्धो जिनः प्रमुखाः प्रधानाः येषां तेतत्प्रमुखाः पाशुपताः तेभ्यस्समुत्थितेषु समयेषु रतिं प्रीतिं भजन्ति । कपिलादि समयानां युक्तिवैधुर्येपि केषांचिदन्धपरंपरान्यायेन तेष्वादर इति भावः ॥ ५५ ॥

जगद्वैचित्र्यस्य स्वभाविकत्वात् समयवैविध्यं तत्र तत्र केषां चिदादरश्च युज्यत इत्याह अपि चेति—॥

चरमिति—॥ चरं जङ्गमं इतरत् स्थावरं इदमशेषमपि चन्द्रकनयतः चन्द्रकं यथा स्वभावत एवचित्रं तन्न्यायेन स्वाभवचित्रं स्वाभाविकस्य कारणनिरूपणाऽत्वयुक्तमित्याह किं वेति । कविभिः बुद्धिमद्भिः कण्टकतैक्ष्ण्यादेः कारणं निरूपणीयं किं वा अनिरूपणीयमेवेति भावः आदिशब्देन पावकौष्ण्यादीनां ग्रहणं । तदुक्तं भगवता पराशरेण ।

इत्थं नामदुस्त्यजस्स्वभाववादः, कार्यकारणभावश्च काकतालीय-
न्यायमनुसरति एवमपि ।-

अतत्तदिति वा न तत्तदिति वा वृथोद्यत्कथा
कनत्कथककत्थनक्रमविकल्पितप्रक्रमा ।
जगद्विपरिवर्तिनी जनपदेषु जोघुष्यते
कुतर्कशतशर्करानिकरकर्कशा पद्धतिः ॥ ५७ ॥

इत्थमुपप्लुतेऽपि जगति ।

चिरसेवनतोषितेन धात्रा
निपुणस्थानविदा निवेदितार्थः ।
असुरोपनिषद्रहस्यमग्र्यं
प्रथयामास विरोचनः प्रजानाम् ॥ ५८ ॥

शक्तयस्सर्वभावानां अचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः ॥
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता इति ॥ ५६ ॥

तन्तुवैचित्र्यस्य स्वभाव एव निमित्तमिति वादः दुस्त्यजः ननु तन्तुगतशौक्ल्यादेः पटगतशौक्ल्यादिकारणत्वं दृश्यते तत्कथं स्वाभाविकत्वमुच्यत इत्यत्र आह कार्येति ॥ क्वचित्काकागमनेन तालफलं पतति नतावता सर्वदातालफलपतनस्य काकागमनं हेतुः एवं कार्यकारणभावश्च कादाचित्क इति भावः ॥ एवमपि युक्तिशून्यानास्तिकवेतालानां सरणी दुर्वादिविकत्थनबृंहिता जोघुष्यत इत्याह—॥

अतदिति—॥ केन चिद्वादिना इदमतत् तन्नभवतीत्युक्ते प्रतिवादिना तदित्युच्यते केनचित् यत्र तत् तत्स्वभावं नेत्युक्ते अन्येन तत् तत्स्वभावमित्युच्यते । आद्यं स्वरूपपरं द्वितीयं स्वभावपरं एवं वा एवं वा वृथा उद्यन्त्यां कथायां कनतां सोत्साहं यथा प्रकाशमानानां कथकानां विकत्थनक्रमैः असंबद्धप्रलापपरंपराभिः विकल्पितः विरुद्धतया कल्पितः प्रक्रमो यस्यास्सा तथा जगतां विपरिवर्तिनी संमोहजननी कुतर्कशतान्येव शर्करानिकराः क्षुद्रोपलनिकराः तैः कर्कशा पद्धतिः वैदिकमार्गः जनपदेषु जोघुष्यते भृशं घुष्यते ॥ ५७ ॥

उपप्लुते पीडितेऽपीति ।

चिरेति—॥ चिरं सेवनेन उपासनेन हेतुनातोषितेन निपुणं यथाभवति तथा

अत्र च ।

करणविलयरूपामुक्तिरित्युक्तमाद्यै
वितथमितिमयाऽन्यद्वार्त्तिके विन्ध्यवेशि ।
स्तनयुगलबृहत्त्वस्थापनीयस्वभूम्ना
बहुगुणविभवेन ब्रह्मणाभोगसाम्यम् ॥ ५९ ॥

दुर्मतिः—अ अ अउत्त एव्वं तुह्मेहिं रक्खिज्जन्तं जीअलोअं पीडन्ति णिक्कारणविद्देसा परसिध्धन्त परिवाडीपल्लवपड्डिआ ।

महामोहः—भवतु किमत्र शङ्कितं न खलु पाटच्चराः प्रकृतिं मुञ्चन्ति, नचाप्रमत्तमतयस्तैरुपहन्यन्ते ।

पठन्तस्त्रय्यन्तान्परिहसनकाकुंविदधतां
भजन्तस्ताटस्थ्यं परिभवितुमिच्छन्तुमहतः ।
उदन्तश्शान्तानामयमितिचजल्पन्त्वभिमतं
किमन्तर्दुर्दान्तैः कृपणकथकैरेभिरिह नः ॥ ६० ॥

(छाया) आर्यपुत्र एवं युष्माभीरक्ष्यमाणं जीवलोकं पीडयन्ति निष्कारणविद्वेषाः परसिद्धान्तपरिपाटीपल्लवपतिताः--

स्थानविद्या अत्यन्तप्रतिष्ठाविद्या धात्रानिवेदितार्थः उपविष्टतत्त्वः यमसुरोपनिषदां रहस्यं विरोचनः प्रजानां प्रथयामास प्रकाशितवान् अनेनास्य प्राबल्यमुक्तं ॥५८॥

करणेति—॥ आद्यैः आचार्याद्यैः करणविलयरूपा करणं देहेन्द्रियादिः तद्विलय रूपमुक्तिरित्युक्तं तद्वितथमिति मया अन्यदेव मुक्तिरिति वार्त्तिके विन्ध्यवेशिस्थापितं ।

स्तनेति—॥ स्तनयोः युगलस्य बृहत्त्वेन स्थापनीयः स्वभूमा यस्य तेन बहुगुणः विभवो यस्य तेन ब्रह्मणाभोगसाम्यं ॥ ५९ ॥

पाटच्चराः चोराः । प्रकृतिं स्वभावं न मुञ्चन्ति खलु । अप्रमत्तमतयः तैर्नोपहन्यन्ते च प्रमत्तास्तु अपहन्यन्तां नामेति आशयः । एते तावत् यथेच्छं कुर्वन्तु नतेरस्माकं हानिरित्याह ।

पठन्ति इति—। त्रय्यन्तान्पठन्तः परिहसनकाकुं परिहसन प्रकारान् विदधतां कुर्वन्तु ताटस्थ्यं माध्यस्थ्यं भजन्तः महतः परिभवितुमिच्छन्तु अयं शान्तानामुदन्त इत्यभिमतं स्वाभिमतं यत्किञ्चित् जल्पन्तु अन्तर्मनसि दुर्दान्तैः कृपणैः स्वाभिमतार्थकलुब्धैः कथकैः एभिः नः अस्माकं किं न किंचिदपीत्यर्थः ॥ ६० ॥

(विचिन्त्य) प्रिये अद्यतावदस्मत्सिद्धान्तपुनःप्रतिष्ठापनपटीयांसः पुरुषा गवेषणीयाः, कः कोऽत्र भोः—

(दम्भादयः) त्वरितमुपसृत्य, अमी वयमागता इत्युपसीदन्ति ।

महामोहः—(स्वगतं) स्वकुलहितैषिभ्यो भवद्भ्यः ।

दम्भदर्पौ—सप्रश्रयं, महाराजत्वत्प्रसादात्सर्वत्राप्रतिहतगतयस्समागतास्मः, किङ्कर्तव्यमनेन किङ्करजनेन ।

महामोहः—कामादीनामिदानीं कावार्त्ता ।

दम्भः—(स्वगतं) किं राज्ञे विज्ञापयामि । (प्रकाशं) देवदुर्मतिवल्लभ "सत्यं राजसुशोभत," इति प्रियेतरदपि दृष्टं ब्रवीमि-वेद्भिकामस्य लोभस्य चाहमधुनातनीमवस्थां, तयोश्च ।

अनन्तविषयस्पृहाजलधिसंप्लुतेमानसे
वसन्तसमये स्थितेमलयमारुतेजीवति ।
सकृद्विहितसौप्तिक प्रतिनिवृत्तिवैलक्ष्यतः
प्रसुप्त इवहन्तनस्पृशति पञ्चबाणश्शरान् ॥६१॥

अद्यतावत् अद्यैव अस्मत्सिद्धान्तस्य चार्वाकमतस्य पुनः प्रतिष्ठापने पटीयांसः समर्थाः पुरुषाः गवेषणीयाः अन्वेषणीयाः । दम्भादयः इत्यादिशब्देन दर्पकुहनादयो गृह्यन्ते । अप्रतिहता अप्रतिबद्धागतिर्येषां ते तथा । अनेन किंकरजनेन किंकरैरस्माभिरित्यर्थः ।

कावार्ता कोवृत्तान्तः ।

विज्ञापयामि किं । प्रियादितरत् प्रियेतरत् अप्रियमपि दृष्टं ब्रवीमि । न ब्रूयात्सत्यमप्रियं इत्यस्यापवादः । सत्यं राजसुशोभते इत्येतत् । अधुनातनी इदानीं वर्त्तमानां तयोश्चावस्थां इति शेषः ।

अनन्तेति ॥ मानसे अनन्तानां असंख्यानां विषयाणां शब्दादीनां स्पृहैव जलधिः तेन संप्लुतेऽपि आप्लुते सति वसन्तसमये स्थिते सति मलयमारुते जीवति सति सकृदेकदा विहितसौप्तिकस्य प्रतिनिवृत्तिः व्यावृत्तिः तज्जन्यं यद्वैलक्ष्यं व्रीला तस्मात् पञ्चबाणः प्रसुप्त इव शरान् स्पृशति ॥ ६१ ॥

अन्यस्मिन्नपि कैमुत्यमिदमावेदयामि ।

पुरुषस्य विवेकविप्रलम्भात्
स्वशरीरेपि विरज्यमानबुद्धेः ।
कृपण प्रतिनन्दनीयवृत्तिः
किमिवालम्बनमाश्रयेतलोभः ॥ ६२ ॥

दर्पः—देव दुर्मतिपण्डित, अहं पुनः क्रोधस्य सांप्रतिकीमवस्थिति मद्रात्तं "याथातथ्येन पण्डित"मिति नीतिमनुसरन्यथानुभूतमेवावेदयामि॰ यथासौ ।

बिसप्रदलपत्रलद्रुहिणसृष्टिभङ्गक्रिया
पुरस्कृतयुगत्रयभ्रुकुटिताण्डवाडम्बरः ।
विरक्तिविषवल्लरीव्यतिकरेणरोषस्स्वयं
सुषुप्त इववर्त्तते सुभटकेलि सौवस्तिकः ॥ ६३ ॥

विषादे अन्यस्मिन् लोभेपि कैमुत्यं कैमुत्यन्यायसिद्धं किन्तदित्यत आह ॥

पुरुषस्येति—॥ विवेकविप्रलंभात् विवेककृतवञ्चनायाः हेतोः स्वशरीरेपि विरज्यमाना बुद्धेः पुरुषस्य कृपणैः कदर्यैः प्रतिनन्दनीया वृत्तिर्यस्य सतथा लोभः किमिव आलम्बनमाश्रयेत भजेत । स्वदेहेपि विरक्तस्य पुरुषस्य वशीकरणेनकश्चिद वकाशो लोभस्येति भावः ॥ ६२ ॥

साम्प्रतिकीं सम्प्रति वर्त्तमानामवस्थितिं अवस्थां । राज्ञः पुरतः कथमप्रियं वक्तव्यं इत्याशङ्क्य आह याथातथ्येति—॥ याथातथ्यं यथातथात्वं तेन यथाभूतं वस्तुस्थिति मनतिक्रम्य असौलोभः यथावर्तते तथा कथयामीति शेषः । तदेवाह—

बिसप्रेति—॥ बिसप्रदलैः चतुर्दशभुवनैः पत्रलायाः संजातपत्रायाः द्रुहिण सृष्टेः चतुर्मुखसृष्टेः भङ्गक्रियया पुरस्कृते पुरोनिहिते युगत्रये प्रवृत्तो भ्रुकुटिताण्डवा डम्बरः भ्रूभङ्गताण्डवसंरम्भो यस्य स तथा चतुर्दशभुवनात्मक ब्रह्माण्डभङ्गस्य क्रोधभ्रुकुटीसंरम्भः पूर्वभावीत्यर्थः सुभटानां महाशूराणां केलेः पराक्रमस्य सौव स्तिकः स्वस्तिवाचकः रोषेण किलशूराणां पराक्रमप्रकर्षः एवं भूतोरोषः विरक्तिरेव विषवल्लरीविषलतातस्याः व्यतकरेण संपर्केण प्रसुप्त इव वर्तते निश्चेष्टो वर्तत इत्यर्थः ॥ ६३ ॥

महामोहः—सविषादं विहस्य । अहो विवेकस्य कुलघातिनो दुर्मन्त्रितमेतत् यथाऽसौ सर्वत्र निरवकाशस्स्यात् तथास्माभिरवहितै विश्वमिदमधर्मेण व्यापनीयं, स्वकुलसंरक्षणप्रवृत्तानामस्माकं स्वयमधर्म एव धर्मः, पठन्ति चैतिहासिकाः "स एव धर्मस्सोऽधर्मस्तंतं प्रतिनरं भवेत्, इति" एवमुपप्लुतावस्थानो विवेकस्स्वयज्वानति प्रबलस्सुखेन साधनीयः, अथवा कोऽयं विवेकः, नखलु शाकुटस्यलवने शङ्कुलायाः कियानिव भारः, न चैषीकतूलमिन्धनयितुं वह्निना संरभ्यते, (विमृश्य) प्रिये कुलधर्मपालिनि स्वदभिमतवृत्ते समगुणास्यमेव पश्य यावज्जीवं प्रारब्धकर्मापरित्यागं ।

कामस्ताम्यतु कोपलोभसहितः कालेसमभ्येतु वा
रक्षस्संयति राघवस्थितिमहं व्यङ्क्ता विवेकाहवे ।
कालस्त्वेषरथो भवत्विह कलिस्त्वं सारथिर्दुर्मते
दम्भस्संप्रति जैत्रदुन्दुभिरसौ दर्पस्तथा कङ्कटः ॥ ६४ ॥

अप्रियश्रवणेन विषादः तद्गूहनार्थं हासः । कुलघातिनः कुलघ्नस्य व्यापादनीयं विनाश्यं । कथमधर्माचरणमित्यत आह स्वकुलेति— । अधर्मस्य धर्मत्वे ऐतिहासिकं वचनं प्रमाणयति पठन्ति च इति ऐतिहासिका इतिहासनिष्ठाः किं तद्वचनमित्यत आह स एवेति—॥ नरं प्रति स एव धर्मः स एव अधर्मश्च भवेत् । अधिकारिभेदायत्ता धर्माधर्मव्यवस्थेति भावः उपप्लुतं उपद्रुतं अवस्थानं स्थितिः यस्य स तथा स्वयं चानतिप्रबलः अस्मदपेक्षयेति भावः । साधनीयः जेयः अयं विवेकः कः किंवीर्यः । शाकुटस्य शाकविषस्य शङ्कुलायाभारः कियान् नाल्पोपि भवतीत्यर्थः । इषीकतूलं इन्धनयितुं इन्धनं कर्तुं दग्धुं वह्निना संरभ्यते संरम्भः न क्रियते । प्रारब्धस्य कर्मणः कार्यस्य अपरित्यागमेव आह ॥

काम इति—॥ कोपलोभसहितः कामः ताम्यतु ताम्तोऽभवतु वा काले युद्धकाले समभ्येतु वा असौ विवेकाहवे विवेकेन युद्धे रक्षस्संयति राक्षसयुद्धे राघवस्थितिं व्यङ्क्ता व्यक्तीकरिष्यामि । राघवः स्थैर्येण स्थित्वा राक्षसानवधीत् तथाहमपि स्थित्वा विवेकादीन् हनिष्यामीत्यर्थः । इहयुद्धे कलिः कालो रथो भवतु त्वं सारथिर्भवेरिति शेषः । संप्रति दम्भः जैत्रदुन्दुभिः दर्पः कंकटः कवचः ॥ ६४ ॥

दम्भः—महाराज स्वायत्तसिद्धेस्तव किमायत्तमस्मासु ।

कस्तुभ्यं रणरङ्गखेलनकलामातिष्ठतेतिष्ठते
कश्चप्रेप्सति कामतन्त्रनियतस्वैरायवैरायितं ।
येन क्षोदयितुं क्षमां प्रभवति क्षेप्तुं कुलक्ष्माभृतः
पातुं सप्तसरस्वतोऽपि भवता साकूतमालोकितः ॥६५॥

तथापि वयं त्वदाज्ञप्तास्त्वदधीनवृत्तयो यथासामर्थ्यं वर्तिष्यामहे, कपयोऽपि काकुत्स्थस्योपकुर्वन्ति, वल्लवा अपि वासुदेवस्य साह्यमाचरन्ति ।

महामोहः—अभिमतमेव युष्माकमहमादिशामि ।

दम्भ त्वमद्य नियतो निजधर्मगुप्त्यै
पुण्यापगापरिसरान्पुनराश्रयेथाः ।
गाढोपलक्षितविरक्तिमदेषु गर्व-
स्तन्वीत वासमनघेषु तपोवनेषु ॥ ६६ ॥

स्वायत्ता स्वाधीना सिद्धिः कार्यसिद्धिः यस्य तस्य तव अस्मासु सचिवेषु किमायत्तं न किंचिदपीति भावः ।

स्वायत्तसिद्धिः सचिवायत्तसिद्धिश्चेति द्विविधो राजा । तत्र स्वायत्तसिद्धेः सचिवायत्तसिद्धित्वा भावं विशदयति ॥

क इति—॥ रण एव रङ्गं तस्मिन् खेलनकलां क्रीडनविद्यां आतिष्ठते कुर्वते तुभ्यं कः कोवातिष्ठते आत्मानं प्रकाशयन् तिष्ठति । कामतन्त्रे कामशास्त्रे नियतः स्वैरः स्वच्छन्दविहारः यस्य तस्मै तुभ्यमित्यनुषङ्गः यश्च वैरायितं वैरवदाचरितं विरोधं प्रेप्सति प्राप्तुमिच्छति येन भवता साकूतमालोकितः पुरुषः क्षमां भूमिं क्षोदयितुं घूर्णयितुं कुलक्ष्माभृतः कुलपर्वतान्क्षेप्तुं उन्मूलयितुं सप्तसरस्वतः सागरान् पातुमपि प्रभवति शक्नोति ॥ ६५ ॥

तथा तेन प्रकारेण त्वया आज्ञप्ताः त्वदधीना त्वदायत्ता वृत्तिः येषां ततथा यथासामर्थ्यं सामर्थ्यं सामर्थ्यमनतिक्रम्य स्वनैच्यं तन्महत्तां च दृष्टान्तद्वयेन विशदयति

कपयोपीति—॥ युष्माकमभिमतमेव दिशामि किन्तदित्यत आह—

दम्भेति—॥ निजधर्मस्य दम्भवर्धनस्य गुप्त्यै गाढं यथा भवति तथा उपलक्षितः दृष्टः विरक्तः मदः येषु तेषु तपोवनेषु वासं तन्वीत तनोतु ॥ ६६ ॥

दम्भदर्पौ—स्वीकृतोऽयं स्वामिसमादेश इति सभार्यौ निष्क्रान्तौ।

महामोहः—(स्वगतं) किन्नामारातिविहताबाद्यं साधनं ननुप्रत्यवमृष्टं

प्रज्वलति जाठराग्नौ त्वपि नन्यथा वचातुर्विध्यं हव्यं।
प्राणाग्निहोत्रमेकं परिपालयितास्मि दुर्मतिसहायः॥६७॥

ततश्च जात्याश्रयनिमित्तदुष्टैरिष्टैरेव द्रव्यैर्मृष्टाहारविहारे दुष्टचेष्टे पुरुषे कथमिव विवेकस्य विजयाशंसा।

प्रकाशं।

अलं मेरुस्तोमैरलमपि च कैलासनियुतै-
रलं द्वीपैरष्टादशभिरखिलैर्वापि भुवनैः।
अखण्डैर्ब्रह्माण्डैरपि न खलु तृप्तिर्भवति मे-
विरुन्धानध्वंसं त्वभिनिविशते संप्रति मनः॥६८॥

अरातीनां विहतौ नाशे आद्यं साधनं किं नामेति विचारः। ज्ञात्वा वचनं ननु प्रत्यवमृष्टमिति प्रत्यवमर्शः प्रत्यभिज्ञा।

किंतदित्यतः आह—॥

प्रज्वलतीति—॥ प्रज्वलति दीप्यमाने जाठराग्नौ चातुर्विध्यं लेह्यचोष्य खाद्यपेयरूपेण चतुःप्रकारं हव्यं यथा वा उक्तमार्गेणाक्षिपन्सन् एकं प्राणाग्निहोत्रं प्राणादिविषयमग्निहोत्रं परिपालयितास्मि॥ ६७॥

अनेन अग्निहोत्रपरिपालनेन किंभविष्यतीत्यत आह ततश्चेति—॥

ततः अग्निहोत्र परिपालनात् जात्यादुष्टानि कलञ्जादीनि आश्रयदुष्टानि अशुचिस्थल जातानि निमित्ततोदुष्टानि एकादश्युपरागादि निमित्ततो निषिद्धानि द्रव्याणि इष्टैः अभिमतैः द्रव्यैः मृष्टौ पूर्णौ आहारविहारौ यस्य तस्मिन् विहार शब्दोत्र विसर्गपरः मृष्टाच प्रतिहता चेष्टा यस्य तस्मिन् पुरुषे एवं भूते सति कथमिव विवेकस्य विजयाशंसा विजयेच्छा जात्याश्रय निमित्तात् दुष्टादनात् कायशुद्धिर्विवेक इत्यस्य विरोधित्वात् एतदा चास्य विवेकस्य विजयाशंसा नास्त्येवेतिभावः।

स्वाभिप्रायमाह—।

अलमिति—॥ मेरूणां हेमाद्रीणां स्तोमैः कैलासानां रजत गिरीणां नियुतैः अष्टादशभिः द्वीपैः अखिलैरपि भुवनैः अखण्डैः अशेषैः ब्रह्माण्डैरपि मे तृप्तिर्न भवति भवति खलु नैतेषु मम मनो निविशते अपितु संप्रति विरुन्धानस्य शत्रोः ध्वंसं

दुर्मतिः—* अमच्चाएव्व पुणो अरादिविध्वंसणे, पेसणेण अणुगहणिज्जा ।

महामोहः—प्रिये कृत्याकृत्य वेदिनीखल्वसि अहमपि तथामन्त्रयामि-तदाहूयतामन्तःपुरेकश्चिदन्तरङ्गपरिजनः ।

दुर्मतिः—† हला दुव्वासणे इदोहोहि ।

ततः प्रविशति दुर्वासना ।

दुर्वासना—‡ एसाहं उवट्ठिअह्मि आणवेउमहाराओ रण्णीअ ।

महामोहः—भद्रे ब्रूहि मद्वचनादधिगतगणितविद्यान् करणाधिकारिणः आदिशति भवतो महाराजाधिराजपरमेश्वरो दुर्मत्यासह महामोहः, कामक्रोधलोभमदमात्सर्यदम्भस्तंभेभ्यस्सप्तभ्यस्सचिवेभ्यस्सप्तमुक्तिक्षेत्रतया प्रसिद्धाराजधान्यस्ससागराश्च-सप्तमहाद्वीपादत्तामहामोहेनेति लिख्यतां ।

---

* अमात्याएव पुनरातिविध्वंसने प्रेषणेनानुग्रहणीयाः—

† सखि दुर्वासने इतोभव ।

‡ एषाहं उपस्थितास्मि आज्ञापयतुमहाराजो राज्ञीच ।

अभिनिविशते मेर्वादिभ्यस्सर्वेभ्योपि शत्रुवधएव* ज्यायस्त्वेन अभिमत इति भाव. ॥ ६८ ॥

अमात्या एव पुनरराति विध्वंसने प्रेषणेन अनुग्रहणीयाः ।

मन्त्रयामि मन्त्रे । अन्तः पुरेवर्त्तमानः कश्चिदन्तरङ्गजनः ।

अगणिता अविज्ञाता गणितविद्यागणितशास्त्रं येस्तान् करणाधिकारिणः गणकान् ब्रूहि किमित्यत आह आदिशतीति—॥ महाराजानां अधिपती राज्ञां परमेश्वरः उत्कृष्टशास्ता कामादिभ्यस्सप्तभ्यस्सचिवेभ्यः मुक्तिक्षेत्रतया प्रसिद्धाः सप्तराजधान्यः अयोध्यादिकाः ससागराः सप्तद्वीपाश्च महामोहेन दत्ता इति विलिख्यतां ।

अत्रसप्तराजधान्यः ।

> अयोध्या मथुरा माया काशीकाञ्चीह्यवन्तिका ।
> पुरी द्वारवती चैव सप्तैता मुक्तिदायिकाः ॥

इत्युक्ताः । सप्तद्वीपास्तु ।

अपि च ।

स्वकीयाख्यामात्रच्छुरणपरिणह्यद्भयभरान्-
बहिष्कृत्येदानीं विजहदधिकारान्क्रतुभुजः ।
यदृच्छावाक्येपि व्यवहरतु लोकोयमखिलो
नमस्स्वस्तिस्वाहा स्वधमिह महामोहविषयं॥९६॥

इति ।

दुर्वासना—* अं आणवेहि भट्टाभट्टिणीओ ।

इति निष्क्रान्ता ।

नेपथ्ये—विजयतां देवः ।

भुक्तिक्षमं समयमेकरुचिं वितन्वन्-
पुंसान्निजप्रतपनेन गतिप्रतीपः ।

---

* यदाज्ञापयति भर्ता भर्त्री च—

जंबुप्लक्षश्चयौ द्वीपौ शल्मलिश्च अपरोद्विज
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥

इत्युक्ताः । सप्तसागरास्तु ।

एतेद्वीपाः समुद्रैस्तु सप्तसप्तभिरावृताः ।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैस्समं ॥

इत्युक्तं । अन्यदप्याह अपिचेति—॥

तत्किमित्यत आह—॥

स्वकीयेति—॥ स्वकीयाख्यामात्रस्य स्वशब्दो महामोहपरः महामोह इति नाममात्रस्य च्छुरणेन संपर्केण परिणह्यन् विपुलीभवन् भयभरो येषां तान् विजहद-धिकारान् प्रतिमन्वन्तरं जहदधिकारान् क्रतुभुजः देवान् बहिष्कृत्य विहाय अखि-लोयं लोकः यदृच्छावाक्ये अबुद्धिपूर्वव्यवहारे नमस्स्वस्तिस्वाहाशब्दान् महामोह-विषयान् व्यवहरतु महामोहाय नमः महामोहाय स्वस्ति महामोहायस्वाहेति लिखतु इतिलिख्यतामिति पूर्वेणान्वयः ॥ ९६ ॥

यदाज्ञापयतिभर्ता भट्टिनी च ।

नेपथ्ये वैतालिकः । विजयतां देवइत्युक्त्वा सूर्यस्य महामोहेन साम्यं वदति ।

भुक्तीति—॥ भुक्तिः भोजनं भोगश्च तत्क्षमं तद्योग्यं एका मुख्या रुचिः प्रीतिः

आशाविशेषमपरं प्रतिपत्स्यमानो
मोहेश्वर त्वमिव भाति मयूखमाली ॥ ७० ॥

इह च ।

उपहरति सूपकर्ता
महतो मोहस्य दुर्मतिप्रेष्यः ।
बलरिपुवरुणगृहाभ्यां
स्वाद्यं धारान्तमुचितमाहारम् ॥ ७१ ॥

महामोहः—(कर्णान्दत्त्वा) प्रियेप्राणशब्दाभिलप्यानां सर्वशरीरव्यापिनीनां सर्वसिद्धान्तसंमतानां देवतानां समर्चन समयमावेदयति वैतालिकः तत्प्रविशावश्शुद्धान्तम् इतिनिष्क्रान्तौ ।

कान्तिश्च यस्य तं समयं सिद्धान्तं कालं च वितन्वन् निजेन प्रतपनेन प्रतापेनातपेन च पुंसां गतेः सन्मार्गस्य गतागतिरूपायाः च प्रतीपः । अपरमन्यं पश्चिमं च आशायाः इच्छायाः दिशः च विशेषं प्रतिपत्स्यमानः मयूखमाली सूर्यः त्वमिवभाति ॥ ७० ॥

इह अस्मिन्समये च ।

उपहरतीति—॥ सूपकर्तासूदः दुर्मतेः प्रेष्यः बलरिपु वरुणयोः गृहाभ्यां पञ्चमीद्विवचनं इदं स्वाद्यं स्वादियस्यतं धकाररेफौ अन्तौ चरमौ यस्यतं उचितं योग्यं आहारं महतो मोहस्य उपहरति आनयति बलरिपु गृहात् सुधां वरुणगृहात् सुरांच उपहरतीति भावः ॥ ७१ ॥

प्राणशब्दाभिलप्यानां प्राणशब्दवाच्यानां सर्वैस्सिद्धान्तैस्संमतानां देवतानां प्राणापानव्यानोदानसमानानां येषां प्राणशब्दाभिलप्यत्वं प्राणस्य पञ्चवृत्तित्वादुपपन्नं सर्वशरीरव्यापित्वंच ।

हृदि प्राणो गुदेपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥

इत्युक्तं । समर्चनसमयं समर्चनवेलां आवेदयति शुद्धान्तमन्तःपुरं ।

इति सङ्कल्पसूर्योदयव्याख्यायां प्रभावल्यां पञ्चमोऽङ्कः ।

श्रीमते वेदान्तगुरवे नमः ।

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये दम्भाद्युपालम्भोनाम पञ्चमोऽङ्कः ।

श्रीमते भगवते भाष्यकारायमहादेशिकायनमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

श्रीअम्बिकाचरणचक्रवर्त्ति द्वारा काशी महामंडल शास्त्रप्रकाशक समिति यन्त्रे मुद्रितं ।